420

प्रायश्चित्तमयूखः

Title	Prayashchitta Mayukha
Author	Nilkantha son of Shankar
Editor	Bhatta Meemansaka
Year, Vols.	
Publisher	
Remarks	

420

प्रा॰म॰

॥१॥ ॥श्रीगणेशाय नमः॥ श्रीरविर्जयति॥ नमामि भास्वत्पदपंकजं तत् श्रीनीलकंठोहमयत्नकुर्वे॥ स्मृत्येप
देशात् गुरुशंकरस्य विनिर्णयं पापविशुद्धिहेतु॥१॥ प्रतारकैरद्दतमंत्रकिंचिन्मयात्तु निर्मूलतयात्तदु
क्तं॥ ऊनातितानी नहि तेन कश्चित् खपुष्पहीपवितिर्निहीयते॥२॥ पापविशुद्धिहेतुत्वं प्रायश्चित्तस्याह
याज्ञवल्क्यः॥ विहितस्याननुष्ठानान्निंदितस्य च सेवनात्॥ अनिग्रहाच्चेंद्रियाणां नरः पतनमृच्छति॥ तस्मात्तेने
ह कर्तव्यं प्रायश्चित्तं विशुद्धय इति॥ अनिग्रहादिति पर्युदासः सेयह्रार्थं॥ विहिताननुष्ठाननिषिद्धसेवननिमित्ते
विहितं कर्म प्रायश्चित्तं पारक्षपापनाशकं कर्म प्रायश्चित्तमिति॥ तत्र तु पापपुरुषादावतिव्याप्तौ॥ कर्तव्यंग
त्वेष प्रायश्चित्तेऽव्याप्तेश्च एवं प्रायश्चित्तपदस्य रूढत्वे योगमप्याहांगिराः॥ प्रायो नाम तपः प्रोक्तं चित्तं निश्चय
उच्यते॥ तपो निश्चयसंयुक्तं प्रायश्चित्तमिति स्मृतमिति॥ यत्तु पद्मधरमिश्रभक्तपाध्यायप्रद्युम्नरानंदकृतौ प्राय रामः
पापं विजानीयाच्चित्तं तस्य निरोधनमिति पेठु॥ इदं च प्रायश्चित्तं निमित्ते विधानान्नैमित्तिकं पापनाशक ॥७९॥
तया काम्यं च॥ अत एव बृहस्पतिः॥ प्रायश्चित्तं यत्क्रियते तन्नैमित्तिकमुच्यते॥ इति जाबालः॥ अतः काम्यं

नैमित्तिकं च प्रायश्चित्तमिति स्थितिरीतिः एवं च सर्वांगपमहांरासामर्थ्येप्यधिकारो विरुद्धः॥ अत्राधिकारस्त्रैव
र्णिकानां तावद्विहत्वाद प्रतिबद्ध एव॥ शूद्रस्याप्याहतुः शंखलिखितौ॥ कृच्छ्राणि द्विजातीनामेव नादरस्य
कामं धर्मेष्वेर प्रतिषिद्धः साधारणो हि धर्मो नियमश्चेति॥ कृच्छ्राणि काम्यानि धर्मेष्वेः प्रायश्चित्तार्थि
नः॥ याज्ञवल्क्यः॥ शूद्रोऽधिकारहीनोपि कालेनानेन शुध्यतीति॥ अधिकारहीनो जपहोमाधिकारशून्य
॥ कात्यः प्रायश्चित्ताधिकरणे तस्य विशेषमहांगिराः॥ तस्माच्छूद्रं समासाद्य सदा धर्मपथे स्थितं
प्रायश्चित्तं प्रदातव्यं जपहोमविवर्जितमिति॥ स एव॥ शूद्रः कालेन शुध्येत गोब्राह्मणहिते रतः॥ दानैर्वाप्युपवा
सैर्वा द्विजशुश्रूषया तथेति॥ यत्तु मिताक्षरायां स्मृत्यंतरे॥ कृच्छ्रूपेतानि कार्याणि सदा वर्णत्रयेण तु॥ कृच्छ्रं
षेऽन्ते शुश्रूषस्यानाधिकारो विधीयत इति॥ तत्काम्यकृच्छ्रपरं॥ यत्तु मनुः॥ न शूद्रे पातकं किंचिन्न च संस्का
रमर्हति॥ नास्याधिकारो धर्मेस्ति न धर्मात्प्रतिषेधनमिति॥ तद्व्याख्यामाह मेधातिथिः॥ द्विजाधिकारिकमंत्रा
भंत्राप्रकरणं लशुनादिभक्षणे पापं नास्ति विहितविवाहाद्यतिरिक्तसंस्कारं च नार्हति॥ उपवासादावेत

प्रा॰म॰
॥२॥

स्यन नित्योधिकारः। तदकरणान्न प्रत्यवैति। तस्मादेव धर्मादस्य प्रतिषेधनमिति नास्ति करणे त्तु द्वयोरपि
चेति वदंति केचिद्विद्वांसः। स्त्रीणां शूद्रसामानतामिति स्मृतसंहिताद्युक्तेः। शूद्राणां तु सधर्माणः सर्वेपध्वं
सजाः स्मृता। इति मतेध्वस्तानां व्यभिचारजानां चाधिकारः। अत एव प्रायश्चित्तमपि शूद्रवदेव विष्णुः।
विप्रे तु सकलं देयं पादोनं क्षत्रिये स्मृतं। वैश्येर्द्धं पादशेषस्तु शूद्रजातिषु शस्यइति। तदेकामकृतविषय
मिति माधवः। भविष्ये यमांगिराः। पर्षद्या ब्राह्मणानां तु सराज्ञां द्विगुणा मता। वैश्यानां त्रिगुणा प्रोक्ता पर्षद्वच्च
व्रतं स्मृतमिति। भविष्ये चतुर्गुणा तु शूद्राणां पर्षदुक्ता महात्मभिः। पर्षद्वच्च व्रतं प्रोक्तं शुद्धये पापकर्म
णामिति। एतच्च प्रतिलोमापवादेषु द्विगुणत्रिगुणेह मइतियाज्ञवल्क्योक्तेर्दंडाधिक्यानुमितदोषगौ
रवात्प्रातिलोम्यकृतचतुर्विधसाहसपरं। द्विगुणं त्रिगुणं चैव चतुर्गुणं तथापि च। क्षत्रविट्शू
द्रजातीनां ब्राह्मणस्य वधोव्रतमिति प्रजापत्युक्तेर्विप्रवधे च। अश्रमिणां विशेषमाहांगिराः। गृहस्थो राम:
क्तानि पापानि कुर्वंत्याश्रमिणोपरे। शौचवच्छोधनं प्रोक्तं सर्वाद्ब्रह्मनिदर्शनादिति। शौचवद्द्विगुणादि। त ॥७९४॥

पाच मनुः। एतच्छौचं गृहस्थस्य द्विगुणं ब्रह्मचारिणः। त्रिगुणं तु वनस्थानां यतीनां च चतुर्गुणमिति। गृह
स्थोक्तिः स्नातकोपलक्षिका। अन्यथा विधुरादेः प्रायश्चित्तमेव न स्यात्। ब्रह्मनिदर्शनं तत्त्वज्ञानं। ज्ञानोत्प
त्यनंतरं तत्पूर्वं प—— नेनैव नाश्यते। ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुतेऽर्जुनेति भगवद्गीतोक्ते
ः। ब्रह्मचारिणो द्विगुणोक्तिः षोडशाद्वर्षादूर्ध्वं षोडशवर्षपर्यंतं बालत्वाहांगिराः। अशीतिर्यस्य वर्षाणि बालो वाप्यून
षोडशः। प्रायश्चित्तार्द्धमर्हंति स्त्रियो रोगिण एव चेति। आदिपर्वणि। आचतुर्दशकाद्वर्षान्न भविष्यति
पातकं। परतः कुर्वतामेव दोष एव भविष्यति। अंगिराः। अर्वाक् तु द्वादशाद्वर्षादशीतेरूर्ध्वमेव वा। अर्ध
मेव भवेत्पुंसां तुरीयं तत्र योषितामिति। अत्रोच्चावचावधितारतम्यं न्यायतो ज्ञेयं। यत्तु विष्णुः स्त्रीणाम
र्धं प्रदातव्यं वृद्धानां रोगिणां तथा। पादो बालेषु दातव्यः सर्वपापेष्वयं विधिरिति। तदुपनयनादर्वाक् ज्ञेयं। शं
खः। ऊनैकादशवर्षस्य पंचवर्षात्परस्य च। प्रायश्चित्तं चरेद्भ्राता वान्यः सुहृज्जनः। अतो बालतरस्या
स्यतापराधो न पातकं। राजदंडो न दातव्यः प्रायश्चित्तं न विद्यते इति। कुमारः। मद्यमूत्रपुरीषाणां भक्षणे।

प्राम॰
॥३॥

नाक्तिकश्चन॥ दोषस्त्वापंचमाद्वर्षादूर्ध्वं पित्रोऽस्तु गुरोरिति गौतमः॥ प्रागुपनयनात्कामचारकामवादकामभ-
क्षा इति सुरापाननिषेधस्तु जातमपि यदिति स्थितिरिति कुमारवाक्यादनुपेतस्य यो बालो मद्यं मोहात्पिबे
द्यदि॥ कृच्छ्रत्रयं गुरोः कार्यं माता माता तत्पापि बेतिमतेष्वानुपेतस्य दोषे॥ वसेत्येवेति विज्ञानेश्वरः
ए०८ तदूर्ध्वं च न द्वयस्य पंचमवर्षपर्यन्तमुत्तरपरतयाप्युरेयपक्षे तत्रानुपेतस्य दोषः॥ वर्षचतुष्टयपर्यंतं न दोष इ
ति तु युक्तं॥ यत्तु स्मृत्यंतरे जातमात्रः शिशुस्तावद्यावदष्टौ समा वयः॥ स हि गर्भसमो ज्ञेयो व्यक्तिमात्रप्रदर्शि
तः॥ भक्ष्याभक्ष्ये तथा ज्ञेये वाच्यावाच्ये तथानृते॥ तस्मिन्न काले न दोषः स्यात्स यावन्नोपनीयत इति॥ तन्मद्ये
तरविषयं॥ इदं चाद्यपादादिपरिमाणमसुषद्विष्टमौलिकवादशाह्निकाद्येवं पेरस्यप्रवर्तते॥ न तु ज्ञाति
याद्विनिमित्तकद्वैगुण्याद्यपेक्षया॥ ब्रह्मचारित्वानिमित्तकं द्वैगुण्याद्यप्येवं त्र्यर्धपाददैगुण्यादिविधीनामुप
जीव्योपजीवकभावेन परस्परा… चनयामौलिकविधिमात्राज्जोचनेनैव प्रवृत्तेः॥ प्रयोजकादीनां फलमा
हापस्तंबः॥ प्रयोजयितानुमंता कर्ता चेति स्वर्ग — रकफलेषु कर्मसु भागिन इति॥ पैठीनसिः हंतामंतो

राम:
॥७५॥

पदेष्टा च तथा संप्रतिपादकः॥ प्रोत्साहकः सहायश्च तथा मार्गानुदेशकः॥ आश्रयः शस्त्रदाता च भक्तदाता च न
क्तदाता॥ विकर्मिणां॥ उपेक्षकः शक्तिमांश्च दोषवक्तानुमोदकः॥ अकार्यकारिणस्तेषां प्रायश्चित्तं प्रकल्प
येत्॥ हंता साक्षाद्धंता मतानुमंता प्रवर्तकः उपेक्षा मर्मोद्घाटनादिकृत संप्रतिपादकः पलायमानमपि
नमुपर्कधनपरेभ्यो हंतारं यो रक्षति॥ प्रोत्साहकः स्तावकः सहायः सहगंता॥ अनुमोदको हंतुर्हर्षम
नुयोक्ष्यति॥ भक्तपरमौषधादेरप्युपलक्षकं॥ एते च निषिद्धा क्रियोद्देशेनोक्तास्ते च दोषभाजो नान्यथा॥ तथा
च याज्ञवल्क्यः॥ औषधं स्नेहमाहारं ददद्गोब्राह्मणे द्विज॥ दीयमाने विपत्तिः स्यान्न स पापेन लिप्यते॥ तथा दा
हच्छेदशिरावेदप्रयोगैरुपकुर्वतां॥ द्विजानां गोहितार्थं तु प्रायश्चित्तं न विद्यते इति॥ औषधदाने विशे
षमाहांगिराः॥ औषधे तु न दोषोस्ति स्नेहच्छयानु पिबेद्यदि॥ अनया दीयमाने तु प्रायश्चित्तं न संशय इति॥ उ
द्देशुमरिणफलकमनुष्यत्वादनेन तु विष्णुः॥ आकुण्टताडितेवापि धनेवापिधने वापि वियोजितः॥ यमुद्दिश्य त्य
जेत्प्राणांस्तमाहुर्ब्रह्मघातकमिति॥ तथा॥ ज्ञातिमित्रकलत्रार्थं सुहृत्क्षेत्रार्थमेव च॥ उत्तराईतदेव॥ अ

प्रा॰म॰
॥५॥

यं वा क्रोशकादिनिमित्तीत्युच्यत इति निबंधकृत। तेन निमित्ती पादमात्रं दध्यादिति पादप्रायश्चित्तमेवतस्य भव
ति। यत्तु संबंधेन विना देवस्वमुक्तवादेन क्रोपित इति वार्षिकं प्रायश्चित्तमनुक्रमस्य न विषयो क्रिःसापरिहा
सकृताक्रोशपराण्नविषये। पुत्रशिष्यतथाचार्याशासतश्चेन्मरणं यदि। नरास्तातत्र दोषेण लिप्यते राजसत्तम
इदं च पुत्रादीनुपक्रम्य प्राप्तापराधास्ताड्याःस्यूरज्ज्वा वेणुदलेन वा। पृष्ठतस्तु शरीरस्य नोत्तमांगे न वक्ष
सि। अतोन्यथातु प्रहरन्चौरस्याप्नोति किल्बिषमिति मनुक्तायां मृत्तौ ज्ञेयं। अधिकशासने तु दोष एव
निमित्तिदोषमपवदति विष्णुः। उद्दिश्यकुपितो विप्रस्तोषितः श्रावयेत्सुनः। तस्मिन्मृते न दोषोस्ति द्वयोरु
श्रावणे कृते। तोषितो निमित्तिना। द्वयोरुश्रावणे कृते न दोष इति संबंधः। द्वयोस्तु नेकोपलक्षणं। मदनरत्न
यस्य कस्य चिद्रुश्रावणे कृते द्वयोराक्रोशकात्मघातयोर्द्वेषिणो नास्त्यात्याह। विष्णुः। असंबंधेन यः क
श्चिद्द्विजः प्राणान्समुत्सृजेत्। तस्यैव तद्भवेत्पापं नतु यं परिकीर्तयेत्। बृहस्पतिः। आकुष्टस्तु यदाक्रोशं
स्ताडितः प्रतिताडयन्। हत्वाततायिनं चैव तातता यीनभवेन्नरः। याज्ञवल्क्यः। हत्वात्रयं गुरुं कुर्यात्रि

रामः
७९६

यते प्रहितो यदि तिस्त्र संप्रति पादकारयत्वनुग्राहकस्य व्यापरं बाहुल्या दौन्मौलिकमेव पादेन। आज्ञाप्रार्थ
नादिना प्रयोजकस्यार्द्धं प्रहृतप्रवर्त्तकस्यानुमंतुः सार्द्धपादं प्रयोजयित्वानुमंता कर्त्ता चेति स्वर्गनरकफले
तु कर्मसु भागिनो योन्नूयआर मते स्मिन्फलविशेष इत्यापस्तंबोक्तेः। एतेषां प्रायश्चित्ते यत्नायं तु ग्रंथकारा एव प्रमा
णं। तिरस्कृतो यदा विप्रो हत्वात्मानं मृते यदि। निर्गुणः सहसाक्रोधाद्गृहक्षेत्रादिकारणात्। त्रैवार्षिकं व्रतं कु
र्यात्प्रतितो मांसरस्वती। गच्छेद्वापि विशुध्यर्थं तत्पापस्येति निश्चितं। बृहस्पतिः। नाततायिवधे हंता किल्बि
षं प्राप्नुयात्क्वचित्। विनाशार्थिनमायांतं घातयन्नापराध्नुयात्। वसिष्ठः। अग्निदो गरदश्चैव शस्त्रपाणिर्धनापहः।
क्षेत्रदाराहरश्चैकरास्त्रपाणिर्धनापहः। क्षेत्रदाराहरश्चैव षडेते ह्याततायिनः। अपरार्के व्यासः। उद्यतासिविषा
ग्निं च शापोद्यतकरं तथा। आथर्वणेन हंतारं पिशुनं चैव राजसु। भार्यातिक्रमिणं चैव विद्यात्सप्ताततायिनः। य
शोवित्तहरानन्यानाहुर्धर्मार्थहारकान्। कात्यायनः। अनाहूतारिन पूर्वं यस्त्वपराधे प्रवर्त्तते। प्राणव्यापराधे
च प्रहर्त्तस्याततायिनः। अनाहूतारितोऽनपकृतः तेन पूर्वकृतापराधस्य मारणाद्युद्यतस्य नाततायिनेतिध

प्रा॰भ॰ ।५। धेदोषएव॥आततायिवधेदोषाभावश्चगोविप्रातताथिभिन्नाविषयइतिमिताक्षरापरार्कादौ॥नततायिवधे
दोषोन्यत्र॥गोब्राह्मणादितिसुमंतूक्तेः॥कल्पतरौतु॥आततायिन्यदोषोन्यत्रगोब्राह्मणात्॥यदाहन्यात्प्राय
श्चित्तंनस्यादितिपाठः॥अत्रयुगांतरेयुद्धेविप्रायश्चित्ताभावः॥युद्धंविनाहननेतुप्रायश्चित्तं॥कलौतुयुद्धेपिह
ननेप्रायश्चित्तं॥आततायिद्विजाग्र्याणांधर्मयुद्धेनहिंसनमितिकलिनिषेधेतुपाठात्॥प्रपंचितंवैतत्त्राद
चरणैः॥कलिवर्ज्यनिर्णयेऽस्माभिश्चैवोत्तरेव्यवहारमयूखे॥आततायिवधेप्रायश्चित्तंभविष्ये॥हत्वातुप्रहरंतंवै
ब्राह्मणंवेदपारगंकामतश्चरेद्वीरहाद्वादशाब्दव्रतमुत्तममिति॥अथकामाकामकृतपापप्रायश्चित्तव्य
वस्था॥बृहस्पतिः॥कामाकामकृतंत्वेवपातकंद्विविधंस्मृतं॥पुरुषामेइयाच्चैवनिष्कृतिर्द्विविधास्मृतेति॥य
त्तुयाज्ञवल्क्यवाक्ये॥प्रायश्चित्तैरपैत्येनोयदज्ञानकृतंभवेत्॥कामतोव्यवहार्यस्तुवचनादिहजायते॥ते
इत्यज्ञानपदेतदप्यकामपरं॥अतएवतत्स्मृतियोभिरूपंकामतःपदंसंगच्छते॥एवंवाक्यांतरीयाण्यबुद्धिज्ञा
नाभिसंधिपदानिकामपराणि॥अबुधप्रज्ञानानभिसंधिपदानिचाकामपराणि॥तेनबलात्कारितेपापेस्य रामः ७८१

पिज्ञानेनद्विगुणंप्रायश्चित्तं॥तत्प्रयोजकामाभावात्॥अत्रकामकृतपापस्यव्यवहारनिरोधकत्वकल्पतिका
चेतिशक्तिद्वयमपिनश्यतिप्रायश्चित्तेन॥कामकृतस्यव्यवहारनिरोधकैवनश्यति॥नतुनरकानुकूलेतिवि
ज्ञानेश्वरादयोनिबंधकृतः॥एतच्चयेषुसहव्यवहारोनिषिद्धस्तत्परं॥तानिचाहगौतमः॥ब्रह्महसुरापगुरुतल्प
गमातृपितृयोनिसंबंधागस्तेननास्तिकनिंदितकर्माभ्यासिपतितात्यागपतितत्यागिनःपतिताःपातकसं
योजकश्चेतिएतेषांवव्यवहारोनिषिद्धोनान्यत्र॥एनस्विभिरनिर्णिक्तैर्नार्थंकंचित्समाचरेदितिमानवीये
मेनस्विपदमपिब्रह्महत्यादिपरमेव॥इतरपापेषुतुनरकानुकूलापिनश्यते॥सर्वरहस्यपापेषुतुब्रह्महत्यादि
प्रकारेषुमरणांतिकप्रायश्चित्तेचैवं॥व्यवहारनिरोधनाभावेनतदनुकूलशक्त्यभावात्॥आशंकाराचार्य
स्तुकामतोव्यवहार्यस्त्विमंकारप्रश्लेषेणेदंयाज्ञवल्क्यवचोव्याहिस्तुनयथापिस्मृतेराचाराध्यायेतिसूत्रेकृत
प्रायश्चित्तेनैष्ठिकब्रह्मचर्यादिपरं॥आरूढोनैष्ठिकंधर्मंयस्तुप्रच्यवतेपुनः॥प्रायश्चित्तंनपश्यामियेनशुध्येत्स
आत्महेति॥आरूढपतितंविप्रंमंडलाच्चविनिःसृतं॥उद्बद्धंकृमिदष्टंचस्पृष्ट्वाचांद्रायणंचरेदितिचस्मृतेरिति

प्रा॰म॰

॥६॥

येनस्तुघेव्यवहारयोग्योनवेत्तत्प्रायश्चित्तेनपत्रपामीति कृतप्रायश्चित्तमपिआरूढपतितादिकंस्पृष्ट्वाचांद्रा
यणंकुर्यादितिवाक्यद्वयार्थइत्याहुः॥ तदुक्तंचवाचस्पतिमिश्रैः बालघ्नादिपरमप्याहुः॥ बालघ्नांश्चकृ
तघ्नांश्चविशुद्धानपिधर्मतः॥ शरणागतहंतॄंश्चनसंपिबेदितिस्मृते॥ नसंपिबेन्नव्यवहरेत्॥ अतएवयाज्ञव
ल्क्यः॥ शरणागतबालस्त्रीहिंसकान्संविशेन्नतु॥ चीर्णव्रतानसंपितः कृतघ्नसहितानिमान्॥ तेनाचार्यम
तेऽवकीर्णिनैष्ठिकादिनिर्बालघ्नादिभिश्चकृतेप्रायश्चित्तेनरकानुकूलाशक्तिर्नश्यते॥ व्यवहारनिरोधि
काहस्स्येवाइतरपापेषुकामकृतेष्वपिशक्तिद्वयमपिनिरूपतेद्विगुणप्रायश्चित्तेन तदाहांगिराः॥ विहितंयदः
कामानांकामात्तद्विगुणंभवेत्॥ महापापेतुकामकृतेमरणमेव॥ तथाचसएव॥ यःकामतोमहापापंनरः
कुर्यात्कथंचन नतस्यनिष्कृतिर्दृष्टाभृग्वग्निपतनादृते॥ तथाप्राणांतिकंतुयत्प्रोक्तंप्रायश्चित्तंमनीषिभिः॥ तत्का
मकारविषयंविज्ञेयंनात्रसंशयः॥ व्यासः॥ कामतोब्रह्मणवधेनिष्कृतिर्नास्तिजीवतः॥ यस्तुसर्वपरित्यज्याप्यवज्र रामः
वंचरेद्व्रतंसविशुद्धः शुनोलोकान्विप्रागच्छेन्नसंशयः॥ अथतंत्रप्रसंगे॥ तत्रानेकनिमित्तेषुप्राजापत्यादीनां ॥७९६॥

समानातीयानांप्रायश्चित्तानांदेशकालकर्तृतंत्रं॥ तत्रैवैकस्मिन्निमित्तेप्राजापत्यद्वयमेकत्रैकमितिविशेषग्रह
णेद्वयमेवकार्यं॥ तेनैवकप्राजापत्यकार्यमपिसिध्यतीतिप्रसंगसिद्धिः॥ एवंपरदारेब्राह्मणश्रोत्रियस्येतिसामा
न्यतःपरदारमात्रगमनेश्रोत्रियपत्नीगमनेचश्रोत्रियपत्नीगमननिमित्तकंवार्षिकमेवलंकार्यंतेनैववार्षि
कसिद्धिः॥ शंखलिखितौ॥ गुप्तापांवैश्यायामवकीर्णःसंवत्सरंत्रिषवणमनुतिष्ठेत्तदत्रियायांद्विवर्षेब्राह्म
णंत्रीणिवर्षाणीति॥ अत्रतिसृष्वप्यवकिरणेषुब्राह्मणीनिमित्तकंत्रैवार्षिकमेवकार्यमिति॥ निमित्तानांव्या
प्यव्यापकभावेपिव्याप्यनिमित्तेनव्यापकनिमित्तस्यप्रसंगतःसिद्धिः॥ यथा॥ अवगूर्यचरेत्कृच्छ्रमतिकृच्छ्रंनिपात
ने॥ कृच्छ्रातिकृच्छ्रोऽसृक्पातेकृच्छ्रोऽभ्यंतरशोणिते इति॥ अत्रास्रक्पातनेसत्यवगूर्यचरणनिपातनयोर्व्यापकयोर्नष्टप्र
त्त्वनिमित्तप्रायश्चित्तप्रयोजकतेति॥ ब्रह्महत्याप्रायश्चित्तेनतुतत्प्रकरणेतत्रवायोवक्ष्यते॥ अथप्रायश्चित्ताति
देशाः॥ सत्रविधः॥ तत्रवाचनिकंतावत्समाह याज्ञवल्क्यः॥ यागस्थक्षत्रविड्घातीचरेद्ब्रह्महणिव्रतं तावद्रूप्याति
देशमप्यातिहस्तएव॥ पितुःस्वसारंमातुश्चमातुलानींस्नुषामपि॥ मातुःसपत्नींभगिनींआचार्यतनयांतथा

प्रा॰म॰
॥७॥

आचार्यपत्नीं स्वसुतां गच्छंस्तु गुरुतल्पग इति॥ सामान्यातिदेशमप्याह स एव॥ गुरूणामध्यधिक्षेपो वेदनिंदा सु-
हृद्वधः॥ ब्रह्महत्यासमं ज्ञेयमधीतस्य च नाशनमिति॥ अत्र सम्यातिदेशोऽर्द्धता दृष्य वाचनिकायोस्तु पादोनं
राजसमो मंत्रीत्यादौ किंचिद्धीनं एवं समपदप्रयोगात्॥ महापातकातिदेशविशेषणां च पातकसंज्ञाकृत्वा-
त्॥ महापातकतुल्यानि पापानि कानि यानि तु तानि पातकसंज्ञानि तत्सुन्नमुपपातकमिति॥ पातकानां महा-
पातकन्यूनत्वप्रतिपादनार्थ इति विज्ञानेश्वरादय॥ अत्र केचित्॥ इषा वे काहे समानमितरथैवेनेति वाचनि-
कानिर्देशेन्यूनत्वाप्रतीतेरिहापि न्यूनतेति॥ राजसमो मंत्रीत्यादौ तु न्यूनत्वं प्रत्यक्षगम्य॥ अस्तु वा सन प्राष्टे-
न्यूनताप्रतीतिकलहः पादोनार्द्धादीयत्तात् निष्प्रमाणिकेति॥ अत्रास्मज्ज्येष्ठभ्रातृचरणाः॥ महापातकतुल्ये-
षु पातकसंज्ञेषु विशेषतः प्रायश्चित्तानुक्तेस्तदर्के न्याय्यमर्थवादे महापापजन्यनरकाद्यवगतेः प्रायश्चि-
त्तेऽप्यर्द्धताकल्पनोतमेवार्थं वादमाहांगिरा॥ पातके तु सदृशं स्यान्महत्सु द्विगुणं तथा॥ उपपापे तु री-
पंस्यान्नरकं संख्ययेति यत्तु विष्णु॥ अतिपातकिनः पर्यायेण पञ्चस्वंते कल्पं मन्वंतरं महापातकिनः

राम:
॥७[illegible]॥

अनुपातकिनश्चोपपातकिनश्चतुर्युगमितितदस्यासपरं॥ अनुपातकं महापातकतुल्ये पातकसंज्ञं॥ ताडु
प्य वाचनिकातिदेशेतु पादोनमेव॥ ब्राह्मणीपुत्रस्य क्षत्रियायां मातरि गमने पादहान्या द्वादशवार्षिकमेव
मन्यवर्णास्वितिमिताक्षरोक्तिस्मृत्यादोनं द्वादशाद्दमुक्तं तच्च नकेवलं हीनवर्णमात्रगमन एव किंतु मा-
तुः सपत्नीमित्याद्युक्तसर्वतादृष्य वाचकातिदेशविषयं सर्वेषां समानधर्मत्वात्॥ यथाहोशनः॥ बहूनामे-
कधर्माणामेकस्यापि यदुच्यते सर्वेषां तद्भवेत्कार्यमेकरूपा हि ते स्मृता इति॥ अत एव मिताक्षरायां रज-
कादीनां पंचानां गमने चांद्रायणप्रायश्चित्तमापस्तंबोक्तमुक्त्वा रजकश्चर्मकारश्च नटो बुरुड एव च॥ कैव-
र्तमेदभिल्लाश्च सप्तैते अंत्यजाः स्मृता इति सप्तांत्यजस्त्रीगमने पि तदेव प्रायश्चित्तमुक्तं नो वाक्यबलादुक्तमि-
तियुक्तमुत्यशंति॥ एतेनातिदेशे संपूर्णप्रायश्चित्तं वदंतो शूलपाणि नवदेवाश्चप्यपास्तौ॥ किंच सर्वत्र द्वाद-
शाद्दविधित्सायां स्मृतिषु तदुपदेशगौरवस्यात् ननु क्वचिदुपदेशः क्वचिदतिदेश इति प्रयोजने द्वै-
विध्यं न चात्र न्यूनतातिरिक्तसौपादिचिक्कस्तार्द्धपूर्णमासिकातिदेशस्याहादि प्रयोजनमस्ति यत्र नवदेवः

प्रा०म०

॥८१॥ ःसाम्योक्तिर्यदा॥ अन्यथा ब्रह्महत्यासुरापानसमेषु मिथ्या॥ कर्षोक्तिर्वेदनिंदा द्विर्षपि वादरशाष्टं स्यात्॥ क्व
चित द्विशेषमनुष्यहरणे मनुना चांद्रायणादि स्वल्पप्रायश्चित्तांतराम्नानं चेति द्रपि वा॥ मिथ्या॥ क्तर्षोक्ति
वेदनिंदा द्विशुद्धादशाद्यपेक्षयाद्दस्ये ष्टत्वा न्मनूक्ताल्पप्रायश्चित्तस्यनीच मनुष्यापहारत्वाच्च॥ इत्युति द
त्र॥ अथ पापिनामनुतापाक उच्यते॥ यम॥ पतितैः सह संयुक्तश्च कृतघ्नो गुरुतल्पग॥ एते पतंति सर्वेषु नर
केष्वनुपूर्वकः॥ महापातकसंयुक्ता युगं तिष्ठंत्यधोमुखा॥ रौरवे कूटसाक्षी च यश्च मिथ्याभिशंसकः॥ कुल
याद्दे पल्लवादीस च पच्यंते नराः॥ कुलघ्नादेकुलसंदेहे स एव न्यासापहर्त्ताऽश्च मतिविषमो यश्च वृत्तिषु
तप्तकुंभे स्वस्गगामी गोघ्नो राजभटाश्च ये॥ राजभ्रंश्मा राजबलेनोपद्रवकाः॥ महाज्वाले दुहितरं स्नुषां
गत्वा च मातरं॥ अजाविकं शौकरिकस्तेनश्चक्रो धनो नरः॥ रंगोपजीवी पशुहो त्रुक्तनीयामयाचकः॥ अमद्दो
वांताशी विप्रो धर्मपुरस्कृतः॥ अगम्यागामी गरदो नरकं त्वावलं व्रजेत्॥ त्राकूपक्षिपोकः॥ वांतावपुक्तो हेमा रामः
दौ विष्णुना देशो गोत्रं कुलं विद्यामंत्रार्थयो निवेदयेत्॥ वैवस्वते पुधर्मेषु वाताभ्रास पकीर्त्तितः॥ सर्वज्ञाव ॥ ८००॥

यमित्येवमभिमाना नरताः नराः॥ वांताशिनः परित्याज्याः श्रोत्रिये दाने च लंपटाः विदविक्रयिणो ये च श्लोके विक्रयि
णस्तथा॥ वेदानां दूषका ये च समयानां च दूषकाः॥ दूषका धर्मशास्त्राणां हेतुवादकृतस्तथा॥ एते विहं
गमे घोरे पच्यंते पापकारिणः॥ समयानां दूषकाः संन्यूय यस्य वृत्ति पितार्थ व्यतिक्रमकारिणः॥ सर्वविक्र
यकर्त्तारो मित्राणां भेदकारकाः॥ निर्मर्यादाश्च कर्दमे कर्दमे च यसंयुताः॥ कोटरे विनिपात्यंते बंधुभक्ताश्च
वाणिजाः॥ बंधकभक्ताः बंधकपाठकाः॥ विमुखे पतिते घोरे मर्यादां यश्च लंघते॥ खरवान्गघ्नो गोघ्नश्च लमि
नस्वं व्रजंति ते॥ विमुखपुत्रानिंदि सुपरा स्तु रवः॥ पतिते पुद्गरावेति शेषः॥ एकाकी मिष्टमश्नाति वंचयि
त्वा सुहृत्सुतान्॥ दारान्नत्यातिथींश्चैव तथा संबंधीबांधवान्॥ उत्सन्नपितृदेवेष्टः पशुघाती च यो वृथा॥
लालके नरके घोरे दुर्गंधे यांति ते नराः॥ मानकर्मकुर्जातश्च स्वर्णकार विक्रीत्सकाः॥ पतंति नरके घोरे कूटक
र्णविशेषतः॥ देवब्राह्मणविद्वेष्टा गुरुं यश्चावमन्यते॥ अवाक्शिरः स पद्यंते रक्तं दूषयते च यः॥ मांसं मद्यं
सुगंतां स्तांन्न वस्त्रं घृतं पयः॥ विक्रीणाति य एतानि स तु पूयवहं व्रजेत्॥ अगारारामदाही च उखपाप॥

प्रा·म·
॥९९॥

ष्ठदेवच। पतंति कुण्डेतु कृतघ्नाः हांनिका नराः। म्र ऽ द हत्संतु यः क्रयातपा यो गुरुदूषकः। सीधुकृन्मधुकृ
द्दंडाकर्मकारो निराकृति। दंडी निषिद्धदंडग्राही। कर्मकारः कर्मकाराधिष्ठाता। निराकृतिरस्वाध्यायः अ
तिनीहाश्चंडवृत्तिरुपघातः परश्च वा। रूपेनजीवी कालहिकः पुत्रो पाध्याय एव च। द्यूतसंव्यवहारी च प्रा
णिहिंतासताश्चरये वैतरिण्यां निपात्संते ये नरा बंधुघातकाः। अतितीक्ष्णाश्चलुद्ध। चंडवृत्तिर्वधबंधादि
वृत्तिः। उपघातपरः परोपहतिप्रवणः। अवोमायावी कालहिकः कलहः पुत्रोपाध्यायः पुत्रउपाध्यायो
यस्य सतथा। असत्प्रतिग्रहीता रत्तथैवायाज्ययाजनः। नक्षत्रैर्जीवते यश्च सोधकारं प्रपद्यते। अन्नातदम
को यश्च ब्राह्मणो वृषलीपतिः। गोष्ठ्यो द्धहस्तिदमको मित्रध्रुक्कस्तु च कस्तथा। असिपत्रवने घोरे यतंते घोर
ग्निका नराः। अप्राप्तदमकोऽयोग्यदमकः। गोष्ठ्येद्धहस्तिदमकः सार्द्धत्रिवर्षस्य सतथोक्तः। औरभ्रिकामेषाजी
विनः। वृषापवर्जितो यश्च सेतुभेत्ता च सूचकः। आश्रमत्यागितो यश्च सोग्निं प्रपद्यते कृत्याकरा निकृत्यंते रामः
नरा अन्नतवादिनः। गजाचश्रुतिलोपी च संदंशं नरकं व्रजेत्। मृगव्याधस्तमो घोरं क्रूरकर्मा चिवाधुषिः। म १० ॥६०२॥

द्यंतेश्पमराबलैस्तीक्ष्णातुंडैश्च वायसैः। ब्रह्मविक्रयिणो येच ब्रह्मवान्निघ्नते च ये। क्रयविक्रय विक्रयक
र्ता च वार्धुषिः सोमविक्रयी। गुरुंश्चये न्यवमन्यंते वा कुर्वंत्त ऊर्यंति वा। विकर्मणः पापरता शौचाचारविवर्जि
ताः। अगोप्तारः कुलद्व्यापरस्तानां च नाशकाः। कन्यानां दूषकाश्चैव समयानां च दूषकाः। क्रोधनाः पाप
लीलाश्च लुप्तायेकृत्स्नगामिनः। स्कंदंते च दिवास्वप्ने व्रतिणो ब्रह्मचारिणः। सर्वे ते नरके घोरे पात्यंते पाप
कारिणः। अगोप्तारोऽवरक्षणीयानामिति शेषः। कुलद्व्याः छलेनार्जितधनाः। कृत्स्नगामिनः सर्वता
द्वैवर्णिकाः। मनुः। बहून्वर्षगणान्घोरान्नरकान्प्राप्य तत्क्षणात्। संसारात्प्रतिपद्यंते महापातकिनस्त्वि
ति याज्ञवल्क्यः। मृगाश्च शूकरोष्ट्राणां ब्रह्महा योनिमृच्छति। खरपुल्कसवेनानां सुरापो नात्र संशयः। पुल्क
स वेनौ चंडालवद्दोषौ। कृमीकीटपतंगत्वा स्वर्णहारी समाप्नुयात्। तृणगुल्मलतात्वं च क्रमशो गुरुतल्पग
ः। सएव ब्रह्महा क्षयरोगी स्यात्सुरापः श्यावदंतकः। हेमहारी तु कुनखी दुश्चर्मा गुरुतल्पगः। यो येन संसंव
सेत्तेषां मतल्लिंगो निजायते। फलविशेषार्थं पोनरतो वस्या। अथ पर्षत्। लघुपराशरः। चत्वारो वा त्रयो वापि

वेदवंतोग्निहोत्रिणः ब्राह्मणानां समर्था ये पर्षत्सा हि विधीयते अनाहिताग्नयोन्ये ये ॥ वेदवेदांगपारगा
॥ पंच त्रयो वा धर्मज्ञाः परिषत्संप्रकीर्त्तिता वेदव्रतेषु स्नातानामेकोपि परिषद्भवेत् ॥ यमः एको द्वौ वा त्र
यो वापि यद्ब्रूयुर्धर्मपावकाः ॥ स धर्म इति विज्ञेयो नेतरेषां सहस्रशः ॥ मनुः त्रैविद्यो हैतुकस्तर्की नैरुक्तो
धर्मपाठकः त्रयश्चाश्रमिणः पूर्वे परिषत्स्याद्दशावरा हैतुको मीमांसकः ॥ अंगिराः सचैलं वाग्यतः स्नात्वा
क्लिन्नवासाः समाहितः क्षत्रियो वापि वैश्यो वा पर्षदं ह्युपतिष्ठति ॥ अधिकारीमात्रोपलक्षणमिदं उपस्था
पयतः शीघ्रमात्मीमान्धरणीगतः ॥ गात्रैश्च शिरसा चैव न च किंचिदुदाहरेत् पराशरः ॥ पापं विख्यापयेत्पापी
दत्वा धेनुं तथा वृषं इदं तूपपातकविषयं महापापादिष्वधिकं कल्प्यमिति मिताक्षरा स्वल्पपापे तत्रैव
तस्मात् द्विजः प्राप्तः पापः सद्यः स्नातः सवाससि विख्याप्य यथा पंचकस्य किंचिद्दत्वा व्रतं चरेत् किंचिद्दत्वाप
पं विख्याप्य व्रतं चरेदादित्यव्यः विष्णुः पादव्रते वस्त्रदाने कृच्छ्रार्द्धे तैलकांचनं पादहीने तु गामेकां कृ
च्छ्रे गोमिथुनं स्मृतं अत्र सर्वे धर्मविवेकाकार इत्यादि ग्रार्पनापर्षत्सु दक्षिणा च वक्ष्यते पद्यतो देवलः पाप

कृत्वा कृतं पापं कृत्स्नमाख्याय संसदि तत्स्नानेन याचेत निष्कृतिं तस्य कर्मणः ॥ अंगिराः कृत्वा पापं न गु
जीत त्रिरात्रमहरेव वा कुर्याद्ब्राह्मणशुश्रूषामाप्रदानाद्व्रतस्य तु एतच्च पर्षदुपस्थानं प्रकाशप्रायश्चित्त ए
व न रहस्ये ॥ विख्यातदोषः कुर्वीत पर्षदोनुमतं व्रतं अनभिख्याततद्दोषस्तु रहस्यं तु तमाचरेदिति याज्ञ
वल्क्योक्तेः ॥ प्रकाशेपि पर्षदः संभवे स्वयमेव कुर्यात् ॥ मनुः मतिपूर्वमनुद्देश्यं प्राणांतिकमितिस्थितं मति
पूर्वमपंमरणार्थं पृच्छतीति ज्ञात्वा अंगिराः ॥ ततस्ते प्रणिपातेन दृष्ट्वा तं समुपस्थितं ॥ वृद्धाः पृच्छंति किं का
र्यमुपविश्य पार्श्वतः स्थितं ॥ किं ते कार्यं वदास्माभिः किं वा मृगयसे द्विजः तत्वतो ब्रूहि तन्नो वै सत्यं हि गतिरात्म
नः यदि चेद्दुष्कृतं सत्यं नियतं प्राप्स्यसे शुभं पर्यागतोस्मि सत्येन न त्वं मिथ्यामिकहिंचित् एवं तैः समनुज्ञातः
सर्वं ब्रूहि द्दोषतः ॥ विश्वामित्रः जातिशक्तिगुणापेक्षं सकृत् बुद्धिकृतं तथा अनुबंधादि विज्ञाय प्रायश्चित्तं प्रक
ल्पयेत् उपदेशश्च पर्षदंतर्गतेन पर्षदनुमतेनैकेन शिष्टेन कार्यः तथा चांगिराः आहूयाप्याह्वये देकं प
र्षदा यो नियोजितः उपदेशप्रवर्त्तिका य इति मदनापितामहचरणा अस एव ब्राह्मणो ब्राह्मणानानुज्ञापि

याणां पुरोहितः । वैश्यानां याजकश्चैव प्रायश्चित्तं समादिशेत् । सएव । अगुरुः क्षत्रियाणां यो वैश्यानां चाप्ययाजकः
प्रायश्चित्तं समादिशन् पतत्यकृच्छ्रं व्रतं चरेत् । सएव । तथा शूद्रं समासाद्य सदा धर्मपुरस्सरं । प्रायश्चित्तं प्रद
तव्यं जपहोमविवर्जितं । जपहोमौ चांगप्रधानरूपाविवक्षातः । पर्षदंतर्गतसोपदेष्टा कर्ता प्रायश्चित्तमा
हहारीतः । प्रायश्चित्तं तु निर्दिश्य कथं पापात्प्रमुच्यते । यत्पवित्रं विजानीयाज्जपेद्वा वेदमातरं । अंगिराः
वचः पूर्वमुदाहार्यं यथोक्तं धर्मकर्मभिः । पश्चात्कार्यानुसारेण ब्राह्मणाः कुर्युरनुग्रहं । वचः प्रायश्चित्तविधाय
कं अनुग्रहः प्रायश्चित्तन्यूनता पराशरः । दुर्बलेऽनुग्रहः कार्यस्तथैव बालवृद्धयोः । अतोऽन्यथा भवेद्दोषस्त
स्मान्नानुग्रहो भवेत् । देवलः । प्रायश्चित्तं यथोद्दिष्टमशक्त्या तद्ब्रूयात्तु नः । स्यते तु यदहस्यापि पूजानुग्रहकारणा
त् । एको नार्हति तत्कर्तुं मनुः चान्तोऽप्यनुग्रहे । धर्मज्ञा वदन्त्यो विप्राः कर्तुस्त्वनुग्रहं । स्नेहाद्वा यदि वा लोभाद्भयाद
ज्ञानतोऽपि वा । कुर्वंत्यनुग्रहं येषु तत्पापं तेषु गच्छति । पूजानुग्राह्यस्य पूज्यत्वे अनुग्रहरूपन्यूनतावधि माहारी   रामः
तः । तस्मात्कृत्स्नमथाप्यर्द्धं पादं वापि विधानतः । ज्ञात्वा बलाबलं कार्यं प्रायश्चित्तं प्रकल्पयेदित्यनुग्रहरूत्वे   ॥८०३॥

त्यर्धपादहारेण योज्यं त्र्यधोतिकर्तव्यतः । विष्णुः । सर्वपापेषु सर्वेषां व्रतानां विधिपूर्वकं । ग्रहणं संप्रवक्ष्यामि प्रा
यश्चित्ते चिकीर्षिते । दिनांते नखरोमादीन् प्रवाप्य स्नानमाचरेत् । भस्मगोमयमृद्वारि पंचगव्यविकल्पितैः
मलापकर्षणं कार्यं ब्राह्मणेन च विशुद्धये । दंतधावनपूर्वेण पंचगव्येन संयुतं । व्रतं निशामुखे ग्राह्यं बहि
स्तारकदर्शने । आचम्यातःपरं मौनी ध्यायन्दुष्कृतमात्मनः । मनःसंतापनात्तीव्रमुद्वहेच्छोकसंततः इति
रोमश्मश्रु आदिनाकेशग्रहणं ब्रह्मस्तैरौचं पापनिर्हरणं पंचगव्येनेति । भस्मादिसमस्तस्यैव पंचगव्या
देरनुवादात् भस्मादिस्नानापेक्षयापि दंतधावनस्य पूर्वत्वसिद्धिः । आचारोऽप्येवं पितामहचरणाश्च । व्रत
होमा बहिः पुंपंचगव्यप्राशनमिति महार्णवादौ । प्रायश्चित्तसंकल्प इति माधवशूलपाणी । घृतप्राशनमि
तिकल्पतरुः । नु पक्षे शनखास्त्र्वं घृते प्राप्य विस्मृध्यतीति शंखलिखितोक्तेः । पूर्वमित्यस्याग्रेण घ्रात्वा त्वावि
शुध्यतीति वा पाठः । तदा न घृतप्राशनं वहियामान् । जाबालिः । आरंभे सर्वकृच्छ्राणां समाप्तौ च विशेषतः
आज्येनैव बहिःशालाग्नौ कुर्याद्धुतीः पृथक् । आदौ कुर्याद्धुतांते च गोहिरण्यादिदक्षिणा देयेति शेषः । अ

प्रा॰ म॰ ॥१२॥ त्रविल्लदैवतया पित्रादिदेवतावाध॰ सांकल्पत्वाच्चार्घ्यावाहनताग्नौकरणावनेजनपिंडत्यागवाचनानां बाध
इत्युक्तं मस्मत्कृते श्राद्धमयूखे समासौ चेति। श्राद्धं कुर्यादित्यत्राप्यन्वेति। अत्र पाणिस्तु गोहिरण्यादिदक्षि
णामिति पाठः। तदा प्रायश्चित्तांतर एव। गोहिरण्यादिदक्षिणां कार्यं नादावित्यर्थः। स्त्रीणां तु नाग्निहोम एव
न भवति तस्यैव प्रकृतत्वात्। लौकिके त्वग्नौ तु भवत्येव स च विप्रद्वारा इति केचित्। वसो॰ पेव्रतं होमस्तु
र्यस्तानजपादिकं विप्रैः संपादितं यस्य संपन्नं तस्य तत्फलमिति पराशरोक्तेः। तन्न। अस्य पाठस्य तु जप
होमादिषु स्त्रीशक्तौ विप्रतिरूपप्रतिनिधिनियममात्रार्थत्वात्। प्रायश्चित्तांगजपहोमयोस्तु निषेधादेव प्राप्ते
स्तन्नतस्याप्रवृत्तिः। यदपि वाराहे। अमंत्रस्य तु शूद्रस्य विप्रो मंत्रेण गृह्यत इति तस्यापि पुरश्चार्षत्वेपि प्र
प्रयोरेव जपहोमयोः प्रवृत्तिः। एते जपन्मदनरत्नमहार्णवयोः। स्त्रीशूद्रजे विप्रद्वारा समंत्रको जपहोमो रामः
भवत इति तत्त्वरांस्तं पराशरः। स्त्रीशूद्रस्य तु शुद्ध्यर्थं प्राजापत्यं समाचरेत्। पंचगव्यं च कुर्वीत तत्स्नात्वापी ॥८०५॥
त्वा शुचिर्भवेत्। स्त्रीणां पंचगव्यस्य विहितप्रतिषिद्धत्वाद्विकल्पः। शूद्राणां तु नित्यं भवत्येव। शूद्र॰

स्यापि विकल्प इति महार्णवे। तन्मात्रस्य स्त्रीयदगर्भनिषेधान्नवृत्तेः। यत्तु स्त्रीशूद्रास्तप धर्माण इति त
द्विशेषाभावे स्त्रीशूद्रयोः समानधर्मत्वप्रतिपादनार्थं। अस्ति चात्र शूद्रे। पंचगव्यस्य विशेषविधिः। य
त्तु। पंचगव्यं पिबेच्छूद्रो ब्राह्मणस्तु सुरां पिबेत्। उभौ तौ तुल्यकर्माणौ पूषारव्ये नरके वसेतत्। इतिस्म
त्रिवचनं शूद्रस्य मन्त्रवन्निषेधपरं। वपने विशेषमाह वसिष्ठः। कृच्छ्राणां व्रतरूपाणां श्मश्रुकेशांनिवाप
येत्। अक्षिरोमशिखावर्जमिति। काम्यकृच्छ्रादौ वपनं नेति मदनपारिजाते। गोवधे तु पराशरः। प्राजापत्यं
चरेत्कृच्छ्रं गोघाती व्रतमुत्तमं। सशिखं वपनं कार्यं त्रिसंध्यमवगाहनमिति। विशेषमाह संवर्तः। पादेरो
मवपनं द्विपादे श्मश्रुणोपि च। त्रिपादे तु शिखावर्जं सशिखं तु निपातन इति। सधवानां विशेषमाह व
सिष्ठः। केशानां नास्ति नारीणां वपनं व्रतयज्ञयोः। गोवधादिषु सर्वेषु छेदयेदंगुलद्वयं। सधवानां तु ना
रीणां मंगलकारायसर्वदा। केशसंधारणं प्रोक्तं प्रायश्चित्ते द्विजोत्तम इति। अंगुलत्रयमिति क्वचित्पा
ठः। अत्र सधवा यदा विधवानां सर्ववपनं कार्यं। अत्र विशेषमाह पराशरः। वपनं नैव नारीणां नानुव्र

प्रा०म०
॥२३॥

आजपादिकं। न गोष्ठे शयनं तासां न च सारं न जगवाजिनं। सार्वान्केशान् समुद्धृत्य समुद्धृत्य छेदयेदंगुलद्वयं
सर्वत्रैवहि नारीणां शिरसो मुंडनं स्मृतं। वासिष्ठे आदिपदं प्रायश्चित्तांतरपरं तेन प्रयागादौ मुंडनं चोपवा
सम्ब सर्वतो पेयेयं विधिरिति। देवलाद्युक्तेः सर्वमुंडनमेव। वेणीवेणीप्रदाने तिलिंगदाचाराच्च तीर्थांत
रेणा भवतीत्यन्ये। तन्न। अपरार्के तु हरस्तु रवः प्राङ्मुखो वा वपनं कारयेत्सुधीः। केशश्मश्रुलोमन
खादुदकां स्नानि वापयेत्। दक्षिणे कर्समारभ्य कुर्मायं पापसंचरेये शिखा येन वसंस्कारे शिखा धेतं शि
रो वपेत्। पापसंचये तन्निमित्ते प्रायश्चित्ते तैत्तरीयके आसुरं वपनं निदित्वा दैवेन कर्म उक्तः। दैयान्यन्कम्यत
उपपक्षा वपेव वपंत। अपर श्मश्रूण्यपि केशान् निति। मानुष्येपि तत्रैव। मनु प्रकम्य आश्मश्रूण्ये वपंत। अथोप
पक्षा वप केशा निति। अन्त्राधानेष्टि सोमेष्टु दैवो। तत्र तस्य विधानात्प्रायश्चित्ते तु दैव मनुष्ये विकल्पेत
न। आप्लुदक संस्थतायैव शिखा श्मश्रूपपदेशो वपवावामावृति। इदं च वपनं निषिद्धकालेपि कार्यं च शौरं राम:
निमित्तकं कार्यं निषेधे मत्यपि ध्रुवं। पित्रादिमृतियात्रासु प्रायश्चित्ते चतीर्थके इति स्मृतेः। निषेधाश्च ॥६०५॥

वृद्धगार्ग्य। रव्यारसौरिवारे षष्ठ्यां रात्रौ पाते व्रते तेष्ट निश्रा द्वादश प्रतिपद्रिक्ता भद्रा। क्षौरेषु वर्जयेत्। नन्द्वा द्वितीयाद्याः
न करणं तिथि मासाह वर्षांत। व्यासः। नक्षत्रे तु न तु कुर्वीत यस्मिन् जातो भवेन्नरः। न प्रोष्ठपदयोः। कार्यं नैवा
ग्नेये तु भारते दारुणेषु तु सर्वेषु दुष्टतारां तु वर्जयेत्। व्यासः। विवाहमौंजीचूडासु वर्षमर्धं तदर्धकं। अंतर्वत्न्यां
च जायायां नेष्यते केशवापनमित्याद्यनेक निषेधाः। समयमयूखे उक्ताः। तथा जीवत्पितृकेणापि कार्यं मुंडनं
पिंडदानं च प्रेतकर्म च सर्वशः। न जीवत्पितृकः कुर्यात् गुर्विणीपतिरेव चेति दक्षाय निषेधस्य रागप्राप्तविषय
त्वाद्विधिस्पृष्टे न बाधात्। यस्तु तस्त्विदं दक्षस्मृतौ निबंधे वानुपलंभान्निर्मूलं। शौरवं। राजा वा राजपुत्रो
वा ब्राह्मणो वा बहुश्रुतः। केशानां वपनं कृत्वा प्रायश्चित्तं समाचरेत्। केशानां रक्षणार्थं तु द्विगुणं व्रतमाच
रेत्। द्विगुणे व्रत आचीर्णे दक्षिणा द्विगुणा भवेत्। यत्तु विद्वद्विप्रनृपस्त्रीणां नेष्यते केशवापनं। ऋते महा
पातकिनो गोहंतुश्चावकीर्णिन इति। तत्र विज्ञानेश्वरः। महापातकातिरिक्तेषु राजादीनां वपनेतास्ते
व महापातकादौ नित्यं राजादेरपि वपनमेवान्यत्र तु वपनानिच्छायां व्रतद्वैगुण्यमिति। अन्ये तु महापातका

दौ नित्यं राजा देरपि वपनमेवान्यत्र तु वपनानिच्छायां व्रत द्वैगुण्यविधिरित्याङ्कः॥ इयं च वपनाद्येतिकर्त्तव्यताऽप्र
प्राजापत्यप्रभृतिष्वेव भवति न ततोऽल्पेषु तत्पाचयैवाऽनस्मि॥ द्वादशाहे संपूर्णे वपनमिति॥ वपनग्रहणं चे
ति कर्त्तव्यतांतरस्याप्युपलक्षणं॥ तथा च याज्ञवल्क्यः॥ कुर्यात्त्रिषवणस्नायी कृच्छ्रं चांद्रायणं तथा॥ पवित्र
णि जपेत्पिंडान् गायत्र्याचाभिमंत्रयेदिति॥ निवर्त्तमानवपानसाहचर्यात्तं च गव्यादेरपि निवृत्तिः॥ अत एव
न्यूने पादव्रते वस्त्रमिति वै अवे वस्त्रादि मात्रदानोक्तेरपीदमवगमवगम्यते॥ अथ पूर्वोक्तस्य स्नानादि स्नान
प्रयोगः॥ लिंगे॥ ईशानेन शिरोदेशे मुखं तत्पुरुषेण तु॥ हृदोदेशमघोरेण गुह्यं वामेन सुव्रतः॥ सद्येन पादौ
सर्वांगं प्रणवेन तु शोधयेत्॥ अत्रेशानादिपदेनेशानः सर्वविद्यानामित्यादयो मंत्रा उच्यंते॥ चतुर्थ्यंत॥
नि नमोंतानीशानादिन्येवमंत्रा इत्यन्ये॥ भूमिरिति नमः॥ जलमिति नमः॥ स्थलमिति नमः॥ व्योमेति नमः॥ म
हविवारदं नमस्येति पंचमात्रा ईशानादिमंत्रस्थान इत्यपरे॥ विष्णुः॥ अयमग्निमिति स्नानमाचमनस्तेन वा
पुनः॥ गोमयेनलेपयेत्प्राज्ञः सोदकेनत्विदमिति॥ योगी॥ त्रिधाकृत्वा मृदं तां तु गोमयं च विशेषतः अधमोत्तम रामः ॥८०६॥

धानांगगानांक्षालनं चतैः॥ कौर्म्ये॥ गोमयस्य प्रमाणं तु येनांगं लेपयेत्तत इति॥ अथ मृत्तिकास्नानं॥ जमदग्निः॥ अ
श्वक्रांते रथक्रांते विष्णुक्रांते मृत्तिकामाहरेच्छनैः॥ नमो मित्रस्येत्यादि वर्णये त्वम दौ करौ॥ गंधद्वारामिति ज
ल्पस्त्वात्स्वं गात्रमनुलेपयेत्॥ शिवपुराणे॥ अश्वक्रांत इति स्मृत्वा मंत्रेणामंत्र मृत्तिका॥ उद्धृतासीति मंत्रे
ण सुसमाहितः॥ नमो मित्रस्येति कृत्वा दर्शयित्वा च भानवे॥ आरुह्येति च गात्राणि समालभ्य द्विरामेत्॥ अनु
लेपने मंत्रांतरमाह योगी॥ आलभेत मृदं गात्राणि इदं विष्णुरिति स्वचाम्लत्यरिमाणे कौर्म्ये॥ मृत्तिका च समुद्दिष्ट
त्वार्द्रामलकमात्रिकेति॥ क्रमउक्तो नारदेन॥ आयुष्कामः शिरो पंमृदा कुर्याद्द्विजः पुरा॥ आकामः पादयोर्यो चं मृ
दा पूर्वं समाचरेत्॥ पारस्करः॥ एका पातु शिरस्थाल्ये द्वाभ्यां नाभेस्तथोपरि॥ मृद्भिश्च तिसृभिः कार्यं षड्भिः पादौ
तथैव च॥ कटिवस्त्ररुजं घाश्च पादौ च तिसृभिस्तत॥ तथा हस्तौ परिक्षाल्य द्विराचामेत्समाहितः॥ योगीः मृ
द्भिश्च गात्राणि क्रमात्प्रक्षाल्य वनेजपेत्॥ शीर्षाद्यानानि सर्वाणि स्मरन् विष्णुमनामयं॥ कटिवस्त्ररुजं घे च
चरणौ च त्रिभिस्त्रिभिः॥ तथैव हस्तावाचम्य नमस्कृत्य जलं ततः॥ यत्किंचिदमितिमंत्रेणनमस्येत्प्रयतांज॰

प्रा॰म॰ नि॥ अत्र विरुद्धानां मत्संख्यादीनां यथाशाखं व्यवस्थेति दिङ्मात्रम्॥ इति मलस्नानविधिः॥ अनंतरं चतुर्थं म
॥२५॥ वारिस्नानमुक्तं॥ तत्र मंत्रो ब्रह्मांडपुराणे॥ आपो अस्मानिति उक्त्वा भास्कराभिमुखः स्थितः॥ इदं विष्णुर्जपित्वा च
प्रतिस्रोतो निमज्जति महार्णवे तु वै कस्यकौ होमं त्रा उक्तौ इदमापः प्रवहतेति ऋकू॥ आपो हि ष्ठेति त्र्यृचे वेति
तत्र मूलं मृग्यं॥ अनंतरं पंचगव्यस्नानानि उक्तानि॥ तत्र तद्ग्रहणमंत्रा मात्स्ये॥ सावित्र्यादाय गोमूत्रं गंधद्वारेति वै
गृपहृत॥ आप्यायस्वेति च क्षीरं दधिक्राव्णेति वै दधि॥ तेजोसीति घृतेन तु देवस्य त्वेति चोदकं॥ कुशमिश्रज
पेद्विद्वान् पंचगव्येन वेत्तत इति पाराशर्ये तु तेजोसीत्याज्यं देवस्य त्वा कुशोदकं॥ पंचगव्यमृचा पूतं स्थापयेद
ग्निसन्निधाविति द्वितीयश्लोक उक्तः॥ देवस्य त्वेत्यनंतरमुन्निर्षिंचामीति वाक्यशेषः पूरणाय इति निबंधकृत॥
यद्यपि मात्स्ये देवप्रतिष्ठायां देवस्नानार्थं पंचगव्यग्रहणे एते मंत्रा उक्ताः॥ पराशरेण च ब्रह्मकूर्चप्रकरणे त
थाप्युपन्यस्तापि कुशोदकसहितानां षण्णां गोमूत्रादीनां पंचगव्यनवेद्यत इति॥ पंचगव्यमृचा पूतमिति चैवं रामः
च पंचगव्यमितिपरिभाषेति मन्यते॥ तस्याश्च प्रकरणेन नियमाभावे द्युत्रयं पंचगव्यविनियोगस्तत्रैव मंत्राद्य ॥६०७॥

वगंतव्यं॥ अन्यथा गव्यामितित द्वितस्य गव्यश्रृंगतक्रादिमाधारणेनते नापि स्नानं स्यात्॥ केचित्तु मलापकर्ष
णं कार्यं बाह्यशौचोपसिद्धये इति बाह्यशारीरमलशोधनमात्रार्थत्वादमंत्रकमिच्छंतीत्याहुः॥ जमदग्निः॥ हिरण्य
श्रृंगं वरुणमित्योपोभिपपद्यते॥ सुमित्रा इत्यया म्रत्वा उर्मिंन्याः सुवर्हि क्षिपेत्॥ यद्यपांक्रूरमित्यपस्त्विरा
जो अंतुपाणिना॥ प्रायश्चित्ताचरणपर्यंतं धर्मानाह शंखः॥ प्रायश्चित्तमुपासीनो वाग्यतस्त्रिरुपस्पृशेत्॥ ए
कवासार्द्रवासार्द्रवा सावा मध्याह्नस्थंडिले शयः स्थानवीरासनी मौंजी दंडकमंडलुः॥ नैष्ठचर्याग्निकार्यं चे
कूष्मांडैर्जुहुयाद्धृतं॥ उपस्पर्शस्नानमित्यपराके॥ दिवा स्थितारात्रौ चोपवेशनं वीरासनमिति विज्ञाने स्मृतः॥ कुश्र
घनाभ्ययेण होरात्रमुपवेशनमेवेति शूलपाणिः॥ कूष्मांडैर्यद्देवादेवहेडनमित्याद्यैः॥ मनुः॥ स्थानासनाभ्यां
विहरेदशक्तोधःशयीत वा॥ वसिष्ठः॥ महाव्याहृतिभिर्होमः सावित्र्यावान्वहं स्वयं कर्तव्यः पावनः सम्यक् सर्पिषा
चतिस्नेस्तथा॥ द्वाभ्यां व्याहृतिगायत्र्योः अविकल्पमित्यपराके तत्रैव प्रयुंजातरुच्छ्रादिव्रतमाचरन्॥ वैश्वंपया
यनः॥ ऋषभं विरजं चैव वस्तु द्ववतो ह्यघमर्षणं॥ गायत्रीं वा जपेद्देवीं पवित्रां वेदमातरं॥ शतमष्टशतं वा पि सह

प्रा.म.
॥१६॥

स्नमप्यवापरं सम्यग्वं स्नात्वोपतिष्ठेदादित्यंसौरीमित्यकृतांजलिः॥ गौतमः रौरवेवौधाजयेन्नित्यं प्रयुंजीत रौर
ववैधाजयेसामनी षट्त्रिंशन्मते जपहोमादियत्किंचित्कृच्छ्रोक्तं सन्नवेन्न चेत्॥ सर्वं व्याहृतिभिः कुर्यात् गा
यत्र्या प्रणवेन वा हारीतः सूर्याय देवताभ्यो वै निवेद्य व्रतमाचरेत्॥ निवेदनमग्ने व्रतपते व्रतमित्यादिमंत्रेण
त्यपरार्के पराशरः॥ प्रायश्चित्तेषु सर्वेषु कुर्याद्ब्राह्मणभोजनं॥ भक्त्या वित्तानुसारेण प्रायश्चित्तानुरूपतः
अ सहस्रादशाताद्यादशाताद्दशांतमथवा जपेत्॥ ॐकाराद्यं ततोभ्यस्य गायत्रीमथवाश्रुतं अतक्ते प्रा
यश्चित्तमन्यद्वारापि कार्यमिति प्रायश्चित्तविवेके ब्राह्मे रोगी वृद्धस्तपो गंडकुर्याद्यदि नैव तं तस्य देति कुर्यात्कारये
त् पाराशरः॥ व्याधिव्यसनिनि श्रांते दुर्भिक्षे डामरे तथा उपवासो व्रतो होमो द्विजसंपादितानि वै शुद्धिकरा
णि विशेषः डामरं परचक्रादि व्रतांते कर्तव्यमतामाह पराशरः पंचगव्यं पिबेच्छूद्रो ब्रह्मकूर्चं कुर्वंति यमः प्राय
श्चित्ते व्यवसिते कर्ता यदि विपद्यते शुद्धस्तद्दहरेवासौ इह लोके परत्र चेति॥ अंगिरा अपि पदं पंचरेद्धर्मम राम:
प्राप्य म्रियते व्रतं सतत्पुण्यफलं प्रेत्य प्राप्नुयान्मनुरब्रवीत्॥ सतत्पुण्यफलं प्रेत्यमनुप्राप्नुयान्मनुरब्रवीत्॥ ८०७

छागलेयः॥ पूर्वं व्रतं गृहीत्वा तु नाचरेत्कामामोहितः जीवन् भवति चांडालो मृतः श्वा चाभिजायते लोभान्मोहा
त्प्रमादाद्वा व्रतभंगो भवेद्यदि उपवासत्रयं कुर्यात्पाके शमुंडनं प्रायश्चित्तमिदं कृत्वा पुनरेव व्रती भवेत्॥ वाशिष्ठ
ःसमुच्चये अथ समाचरणः प्रयोगः तत्र प्रायश्चित्तं तावत् रोगी वृद्धो बालादिर्षण्डं पंच वर्षान्न्यूनं पादः षो
डशवर्षाधिकवृद्धचारिणो द्विगुणं यतौ चतुर्गुणं अत्र विड्भुजायापादपादहानिः॥ निमित्तिनः पादः
अनुलोमानां मातृतुल्यं प्रतिलोमानां शूद्रतुल्यं स्त्रीशूद्रयोरंगप्रधानजपहोममंत्रं तरहितं प्रात्यास्यापा
श्च प्राजापत्ये धेनुरेका देया न्यूनं तत्वा तद्वच्च त्वारिंशन्माषात्तदर्द्धं वा हेमरूप्यं वै तावत् पंचपुराणं त्रिपुराणं
वा रूप्यं द्वात्रिंशद्गुंजः पुराणः द्वादशविप्रभोजनं शुक्लकेशस्य द्वादशास्तानुनि प्राणायाम शतद्वयं पावके ष्टि
ः पावना वेति एकस्मिन्ब्राह्मणे प्राजापत्यम्नाया त्रिगुणः अतिकृच्छ्रे द्विगुणः त्रिशात्प्राजापत्यसमम
हमित्यादि प्रायश्चित्तसदाचारादि क्रियां तिथ्यौ दिनांते पराह्ने पिवाह्ने नीश्चतुरः पंचसप्तदशवापि प्रातादि
ताश्च नान्यान्वारा कमेवा ध्यात्मविदं वर्षत्वेनोपवेश्य पतेत्यो गो वृषौ तत्र क्रुष्यं वा दत्वा साष्टांगं नमो ब्राह्मणाय

प्रा०म०

॥१७॥ तप्रदक्षिणां कृत्य सर्वधर्मविवक्तारो गोप्तारो सकला द्विजाः। ममेदं देहसंशुद्धिं कुर्वंतु द्विजसत्तमाः। मया कृतं
महाघोरं ज्ञातमज्ञातकिल्बिषं। प्रसादः क्रियतां मह्यं शुभानुज्ञां प्रयच्छथ। पूज्यैः कृतपवित्रोहं भवेयं द्विज
सत्तमैरिति मंत्रान्पठित्वा प्रार्थयेत् नाचारात्। ततः सम्यक्तत्छक्तिं विचार्य संमत्या तत्तत्प्रायश्चित्तविधिवा।
क्यमुक्त्वाशक्तस्त्रीबालवृद्धरोग्यादिष्वनुग्रहं कृत्वान्यानानुवादकविप्रद्वारामुककर्मजन्यपापनाशार्थ
मिदं प्रायश्चित्तं मम सकाशसकप्रसाम्नायेन त्वया कार्यं तेन त्वं शुद्धो भविष्यतीति। सर्वप्रायश्चित्तेषु तु न कजन्मप्र
भृति अद्य यावत् ज्ञानकामाकामसकृदसकृत्कृतकायिकवाचिकमानसिकसांसर्गिकातिपातकलघुप
तकसंकटीकरणमलिनीकरणपात्रीकरणजातिभ्रंशकरप्रकीर्णकपापानां मध्ये संभावितानां ज्ञानाज्ञानार्थं षडब्द
मशक्तौ त्र्यब्दं मशक्तौ त्र्यब्दं सार्धाब्दं सार्धं वा प्रायश्चित्तं त्वं कुर्विति। अयं चोपदेशो व्रतकर्त्रा पुस्तकपूजने सभ्येभ्यश्च तद्
दृष्ट्रेन गोदाने च कृते वा स्वयं कार्य इति संप्रदायः। ततः कर्ता मासपक्षादि स्मृत्वा मम जन्मप्रभृत्यद्य यावदिता राम:
दि प्रायश्चित्तानि संततपूर्वांश्च मुक्त्वाहं करिष्ये इति संकल्प्य यानि कानि च पापानि ब्रह्महत्यासमानि च ॥८०॥

केशानाश्रित्य तिष्ठंति तस्मात्केशान्वपाम्यहमिति मंत्रमुक्त्वा कक्षोपस्थशिखावर्जं क्रमेण श्मश्रुपपक्षकेशानुद
कंतस्मान्वापयेत्। यतिविधवादीनां सशिखं वपनं ब्रह्महत्यादिष्वपि सशिखं सर्वांगलोम्नां च। सधवानां द्व्यंगुल
केशाग्रछेदनं राजतत्पुत्रबहुश्रुतविप्राणां। इष्टं वापयित्वा पुबलामित्यादिना च दंतधावनं कृत्वा दश
स्नानानि कुर्यात्। तत्र भस्मस्नानं ईशानः सर्वविद्यानामिति शिरसि तत्पुरुषायेति मुखे अघोरेभ्योथ घोर
भ्य इति हृदि वामदेवायेति गुह्ये सद्योजातमिति पादयोः। प्रणवेन सर्वांगे यद्वा ॐ ईशानाय नमः शिरसि
तत्पुरुषाय नमो मुखे अघोराय नमो हृदि वामदेवाय नमो गुह्ये सद्योजाताय नमः पादयोः। प्रणवेन सर्वा
गें अग्निरिति भस्म जलमिति भस्म स्थलमिति भस्म स्थलमिति भस्म व्योमेति भस्म सर्वं ह वा इदं भस्मेति
मंत्रैः। क्रमाच्छिरआदिषु ततो गोमयमादाय त्रिधा कृत्वा सूर्याय प्रदर्श्य अग्रमग्रे चरंतीनामोषधीनां वने वने ता
सामृषभपत्नीनां पवित्रं कायशोधनं तन्मे रोगांश्च शोकांश्च नुद गोमय सर्वदेति मंत्रेणैकं न भागेन नाभेरध
:परेणानेन मूर्धमाकंठमन्येन च शिरः क्षालयेत्। मानस्तोके इति वा मंत्रः। ततोश्वक्रांते रथक्रांते विष्णुक्रांते वसुं

प्रा॰ म॰
॥१र्द॥

धरे॥ मृत्तिके हर मे पापं यन्मया दुष्कृतं कृतमिति॥ मृत्तिकामभिमंत्र्य॥ उद्धृतासि वराहेण कृष्णेन शतबाहुना॥ मृ
त्तिके ब्रह्मदत्तासि काश्यपेनाभिमंत्रिता॥ मृत्तिके हर तत्सर्वं यन्मया दुष्कृतं कृतं॥ मृत्तिके देहि मे पुष्टिं त्वयि स
र्वं प्रतिष्ठितं॥ त्वया हृतेन पापेन जीवामि शरदः शतमिति ब्रह्मांडोदयमंत्रेण खनित्वा नमो मित्रस्येति सूर्यं प्रदर्श्य
त्रिधा कृत्वैकस्माद्भागात्स्वल्पं च तस्मात् वा मृदा पादयोः जंघोरुकटिबस्तिषु प्रत्येकं च तत्र॥ गुह्ये षट् उदरकु
क्षिपृष्ठवक्षो हस्तकंठेषु द्वे द्वे शिरस्येका॥ मृत्परिमाणमार्द्रामलकमात्रं॥ ततश्चापोऽस्मान्मातरः इदं विष्णु
रिति ताभ्यां देवस्य त्वेति मनेन वा स्नात्वा स्नात्वा गायत्र्या गोमूत्रेण॥ गंधद्वारेति गोमयेन॥ आप्यायस्वेति गोदुग्धे
न॥ दधिक्राव्ण इति दध्ना॥ तेजोसि शुक्रमस्यमृतमसि धामनामासि प्रियं देवानामनाधृष्टं देवयजनमित्या
ज्येन॥ देवस्य त्वेति च कुशोदकेन स्नायात्॥ पंचैतानि द्रव्याणि पिप्पलानाम्य मंत्रकाण्यपि च कार्याणि॥ ततो हिरण्यशृं
गं वरुणं प्रपद्ये तीर्थं मे देहि याचितः यन्मया भुक्तमसाधूनां पापेभ्यश्च प्रतिग्रहः यन्मे मनसा वाचा कर्म राम:
णा वा दुष्कृतं कृतं तन्न इंद्रो वरुणो बृहस्पतिः सविता च पुनंतु पुनः पुनरित्येनाभ्यां तीर्थं प्रार्थ्य॥ ॐ नमो नार ॥र्द१०॥

यणेत्यष्टाक्षरेण तीर्थकल्पं ॐ भूर्भुवः स्वरिति त्रिराचम्य सकृन्निमज्ज्य आयाव्रत इत्येतया व्याहृतिभिर्गाय
त्र्या जलमभिमंत्र्यापामार्गदूर्वाकुशैः कांडात्कांडादिति द्वाभ्यां प्रणवव्याहृतिगायत्र्यापोहिष्ठाभिर्मार्जयित्वांतर्ज
ले ऋतं चेति तृचं जपित्वा त्रिर्निमज्ज्य देवर्षिपितृतर्पणं तत्प्रशुक्लं वासो धृत्वाग्निधिकैर्विधैः रावाहमाग्नौ करणस्व
धावाचनहितं पार्वणविधिना श्राद्धं कुर्यात् तत्र सर्वेषां पितृत्वेषु विष्णोरेव पूजा॥ ततएकां गां हिरण्यं च त्वर
क्षव्याहृतिभिराज्यमग्नौ त्वष्टाविंशतिसंख्यया जंकमाद्यग्निवायुसूर्यप्रजापतिदेवतं हुत्वा ब्रह्मकूर्चं हो
ममपि कुर्याद्वावराज तत्र ताम्रेण लाक्षे पात्रे वा पत्रे हरणाया कृष्णाया वा गोमूत्रं पंचतमितमष्टमाषमितं
वा गायत्र्याहाय श्वेतायाः क्षं गुष्ठार्द्धमितं षोडशमाषमितं वा गोमयं गंधद्वारामिति ताम्राया हेमवर्णायाश्चापा
यः सप्तपलं द्वादशमाषमितं गोमयाद्विगुणं गोमूत्रान्त्रिगुणं वा आप्यायस्वेति रक्तायाः कृष्णाया वा दधि त्रिपल
लं दशमाषमितं गोमयात् चतुर्गुणं गोमूत्राद्विगुणं वा दधिक्राव्ण इति कपिलाया नीलाया वा घृतमेकप
लमष्टमाषमितं गोमयात् चतुर्गुणं वा तेजोसि शुक्रमिति कुशोदकं च पलमितं चतुर्माषमितं वा देवस्य

प्रा·म·
॥२९॥ वेति गृह्णीयात्। गोमूत्रादिकापि लब्धानां हां। अलाभेगव्यमात्रं। एतन्मंत्रांतेगृह्णामीति वाक्यशेषः। ततः आपोहि
ष्ठेति हस्तेनालोड्य मानस्तोक इति यज्ञियकाष्ठेन निर्मथ्य सप्तवारं कुशैः त्रिभिः पलाशपत्रैर्वाजुहुयात्। मं
त्रास्तु इरावती धेनुमती हि भूतं पृथिव्या इदं न ममेति त्यागः। इदं विष्णुः विचक्रम इदं होमः। मानस्तोके रुद्राय
शान्तो देवी। अग्न्यग्नये स्वाहा। सोमाय स्वाहा। इरावते स्वाहा। गायत्र्या सवित्रे। प्रजापते न त्वदेतान्यो।
प्रजापतय इदं। ॐ स्वाहा प्रजापतय इदं। अयं च ब्रह्मकूर्चहोमो तेप्रमाणवान्। ततः स्विष्टकृदादिहोमशेषस
माप्य तारकोदये होमावशिष्टं पंचगव्यं प्रणवेनालोड्य प्रणवेनैव निर्मथ्य प्रणवेन पीत्वा तस्योपदिष्टं सक
ल्पितं प्रायश्चित्तं साङ्गाद्यपासं भवत्वाम्नायेन वाक्यपूर्ववद्याहूतिभिराज्यहोमं ब्रह्मकूर्चहोमविष्णु
श्राद्धं च कृत्वा गोहिरण्यादिदक्षिणां च दत्वा शिसाद्दणमारमानीय गोभ्यो दत्वा तात्रिर्नीक्षितेशुध्येत्।
इति श्रीमीमांसकशंकरभट्टात्मजभट्टनीलकंठकृते भास्करे प्रायश्चित्तमयूखे साधारणप्रायश्चित्तप्र राम।
योगः। अथ कृच्छ्रादिस्वरूपं। याज्ञवल्क्यः। एकभक्तेन नक्तेन तथैवायाचितेन च। उपवासेन चैकेन पा ॥८१२

दकृच्छ्र उदाहृतः। यथाकथंचित्त्रिगुणः प्राजापत्योऽयमुच्यते। एषएवातिकृच्छ्रः स्यात्पाणिपूरान्नभोजनः इति
लघुकृच्छ्रस्यैव शिशुकृच्छ्र इतिनामांतरं। यथाकथंचित्। अत्र तु भोमः पूतिजो मोहंउकलितवदा वृत्तः।
स्वस्थानविहितधर्मे च। एता अतुरोपि पक्षान्तस्मृतरमिश्रान्यथाकथंचित्सदेनैवसंजयाल्लयोगः। मास संख्याम
हापत्नं वा सा पंचविंशतिर्ग्रासाः प्रातः षड्विंशतिः स्मृताः चतुर्विंशतिरायाच्याः परं निरशनं स्मृतं। कुक्कुटांडप्र
माणाः स्युर्यथावास्यं विशेत्सुखं। पराशरोपि। सायं तु द्वादश ग्रासाः प्रातः पंचदश स्मृताः इति। पूर्वोक्ते चतुर्वेश
तिमतेतु प्रातस्तु द्वादशायासायं पंचदशैव तु। अयाचितेतु द्वावष्टौ परं वै मारुताशन इति। ग्रासौ च संख्या
नंरशाकपाविकल्पः। अतिकृच्छ्रे उपवासभिन्नत्रनवदिनभोजनेषु पाणिपूरान्नविधिः। पाणिपूरमेकग्रासमि
तं एकैकं ग्रासमश्नीयात् त्र्यहाणि त्रीणि पूर्ववत्। त्र्यहं चोपवसेदंत्यमतिकृच्छ्रं चरन् द्विज इति मनूक्तेः। सां
गं प्राजापत्यमाह गौतमः। हविष्यान्नप्रातराशान्भुक्त्वा तिस्रो रात्रीर्नाश्नीयात्। अथापरं त्र्यहं नक्तं भुंजीताथाप
रं त्र्यहं नक्तं च न याचेताथापरं त्र्यहमुपवसेत्तिष्ठेदहनि रात्रावासीत क्षिप्रकामः सत्यं वदेदनार्यैर्न संभा

प्रा॰म॰

॥२०॥

षेतरौरवयो धाजयेन्नित्यं प्रयुंजीतानुसवनमुदकोपस्पर्शनमापो हि ष्ठेति तिसृभिः पवित्रवतीभिर्मार्जयीत हि
रण्यवर्णाः शुचयः पावका इत्यष्टाभिरथोदकतर्पणं नमो हमाय मोहमाय मंहमाय धून्वते तापसाय पु
नर्वसवे नमो मौंज्यायौर्व्याय वसुविदाय वसुविदे सर्वविदाय नमः पराय सुविदे सर्वविदाय नमः पराय
सुविदे सर्वविदाय नमः पराय सुपारदाय पारयिष्णवे नमो रुद्राय पशुपतये महते देवाय त्र्यंबकायैकचराया
धिपतये हरये सर्वायेशानायोग्राय वज्रिणे घृणिने कपर्दिने नमः सूर्यायादित्याय नमो नीलग्रीवाय शितिकं
वाय नमः कृष्णाय पिंगलाय नमो ज्येष्ठाय श्रेष्ठाय वृद्धायेंद्राय हरिकेशायोर्ध्वरेतसे नमः सत्याय पावक
वर्णाय कामाय कामरूपिणे नमो दीप्ताय दीप्तरूपिणे नमः सौम्याय पुरुषाय महापुरुषाय मध्यमपुरु
षाय ब्रह्मचारिणे नमश्चंद्रललाटाय कृत्तिवाससे नमः इत्येतदेवादित्योपस्थानमेतदेवाज्याहुतयो द्वाद रामः
शरात्रस्यांते चरुं श्रपयित्वैताभ्यो देवताभ्यो जुहुयादग्नये स्वाहा सोमाय स्वाहाग्नीषोमाभ्यामिंद्राग्निभ्यामिंद्राय विश्वे ॥९२२
भ्यो देवेभ्यो ब्रह्मणे प्रजापतये ग्नये स्विष्टकृत इत्यंते ब्राह्मणभोजनमेतेनातिकृच्छ्रो व्याख्यात इति नमो

मायेत्यायदस्त्र्योदशमंत्रान् नमः पूर्वान् नमोंतान् श्चेति हरदत्तः कौथुमब्रह्मरोवतथैव पावः त्र्यपकृच्छ्रातिकृ
च्छ्रः याज्ञवल्क्यः कृच्छ्रातिकृच्छ्रः पयसा दिवसानेकविंशतिमिति पयोजले चरेत्कृच्छ्रातिकृच्छ्रं तु पिबेत्तोयं च
शीतलमिति ब्रह्मांडपुराणात् अथ पराकः स एव द्वादशाहोपवासो न पराकः परिकीर्तित इति मासोपवा
सकृच्छ्रमाह जाबालः चांद्रनं त्या समेकं तु महापातकनाशनमिति पावकृच्छ्रमाह हारीतः गोपुरीवातय
यान अन्नमासमेकं समाहितः व्रतं तु यावकं कुर्यात्सर्वपापप्रणुत्तये तप्तकृच्छ्रमाह मनुः तप्तकृच्छ्रं चरन्विप्रो
जलक्षीरघृतानिलान् प्रतित्र्यहं पिबेदुष्णान्सकृत्स्नायी समाहितः पराशरः षट्पलं तु पिबेदंभस्त्रिपलं
तु पयः पिबेत् पलमेकं पिबेत्सर्पिस्तप्तकृच्छ्रो विधीयते तप्तकृच्छ्रस्तु शंखलिखितौ एष एव शीतैः शी
तकृच्छ्र इति ब्रह्मकूर्चमाह जाबालः अहोरात्रोषितो भूत्वा पौर्णमास्यां विशेषतः पंचगव्यं पिबेत्प्रातर्ब्रह्मकू
र्चविधिस्मृतः प्राजापत्यः पालाशं पद्मपत्रं च ताम्रं वाथ हिरण्मयं गृहीत्वा सादयित्वा च तथा कर्म समाच
रेत् पाराशरः गोमूत्रं कृष्णवर्णाया श्वेतायाश्चैव गोमयं पयश्च ताम्रवर्णाया रक्ताया गृह्यते दधि कपि

प्रा॰मा॰
॥२२॥

ज्याया घृतं ग्राह्यं सर्वं कापिलमेव चेति स एव मूत्रमेकपलं दद्यादंगुष्ठार्धं तु गोमये क्षीरं सप्तपलं दद्याद्दधि
त्रिपलमुच्यते। घृतमेकपलं दद्यात्पलमेकं कुशोदकं गवां वर्णांतरस्य पंचगव्यपरिमाणस्य च बोधक
वाक्यानि ग्रंथांतरे द्रष्टव्यानि तद्दर्पणप्रयोगे स्माभिः संगृहीतं। पराशरः आपो हि ष्ठेति चालोड्य मानस्तो
के ति मंत्रयेत्। स एव सप्तावरास्तु ये दर्भा अच्छिन्नाग्राः शुकत्विषः। नैरुद्धृत्य च होतव्यं यथाक्रमं विधाति प्रजा
पतिस्त्वा ख्यापयित्वा पञ्च दर्भेषु पालाशैः पत्रकैरपि तत्समुद्धृत्य होतव्यं देवताभ्यो यथाक्रमं पराशर
: इरावती इदं विष्णुर्मानस्तोके च शंवती एताभिश्चैव होतव्यं हुतशेषं पिबेद्द्विजः। प्रजापतिः अग्नये चैव सोमाय
सावित्र्या च तथैव च प्रणवेन तथा कृत्वा स्विष्टकृच्च तथैव च मरीचिः अग्नये स्वाहा सोमाय स्वाहा इराव
ती इदं विष्णुः मानस्तोके गायत्र्या प्रजापते न त्वदेतान्यन्यो तानी त्वाज्याहुतीरग्नौ जुहुयात्। पराशरः आलोड्य
प्रणवेनैव निर्मथ्य प्रणवेन तु। उद्धृत्य प्रणवेनैव पिबेच्च प्रणवेन मरीचिः पालाशेन च पत्रेण विल्वप रामः
त्रेण वा पिबेत् तृतीयं ताम्रपात्रं वा ब्रह्मयात्रागितानि वै। वृद्धपराशरः यत्त्वस्थिसंगतं पापं देहे तिष्ठ ॥९२॥

ति मानवे। ब्रह्मकूर्चो दहेत्सर्वं प्रदीप्ताग्निरिवेन्धनमिति पानदिने चोपवासः ब्रह्मकूर्चोपवासश्च दहत्य-
ग्निरिवेंधनमिति पराशरोक्तः अथ सांतपनं शंखः गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकं एकरात्रोप
वासश्च कृच्छ्रं सांतपनं स्मृतं एतदेव त्र्यहाभ्यस्तं यतिसांतपनं स्मृतं। महासांतपनं माह याज्ञवल्क्यः पृ
थक् सांतपनद्रव्यैः षडहः सोपवासकः सप्ताहेन तु कृच्छ्रोयं महासांतपनं स्मृतः यमः एतान्येव च पापानि
एकैकं च त्र्यहं त्र्यहं अतिसांतपनं नाम श्वपाकमपि शोधयेत्। द्वादशाहोयं त्र्यहं पिबेत्तु गोमूत्रं त्र्यहं वै
गोमयं पिबेत्। त्र्यहं दधि त्र्यहं क्षीरं त्र्यहं सर्पिस्ततः शुचिः पंचदशाहोयं जाबालः एकैकमेतदेव हि त्रि
रात्रं तु पयोजयेत् त्र्यहं चोपवसेदंत्यं महासांतपनं विदुरिति एकविंशतिरात्रोयं वज्रकृच्छ्रं महागिरा। गो
मूत्रेण समायुक्तं यावकं चोपयोजयेत् एकाहेन तु कृच्छ्रोयमुक्तस्तं गिरसात्वयं सर्वपापहरो दिव्यो ना
म्ना वज्र इति स्मृतं इति पूर्वपक्षः तपयो दधित क्रायेस्त्रया वाराहे विकल्पः अथ तुलापुरुषकृच्छ्र
: शंखः पिण्याकवामतक्रांबुसक्तूनां प्रतिवासरं उपवासांतराभ्यासात् तुलापुरुष उच्यते। अथ चां

प्रा॰म॰
२२

ायणं॥ यम॥ वर्द्धयेत्पिंडमेकैकं शुक्ले कृष्णे च ह्रासयेत्॥ एतच्चांद्रायणं नाम यवमध्यं प्रकीर्तितं॥ एकै
कं ह्रासयेत्पिंडं कृष्णे शुक्ले च वर्द्धयेत्॥ एतत्पिपीलिकामध्यं चांद्रायणमुदाहृतं॥ त्रींस्त्रीन्पिंडान्समश्नी
यान्नियतात्मा दृढव्रतः॥ हविष्यान्नस्य वै मासमृषिचांद्रायणं स्मृतं॥ चतुरः प्रातरश्नीयाच्चतुरः सायमेव च। पि
ण्डानेतद्द्विजातीनां शिशुचांद्रायणं स्मृतं॥ पिंडानष्टौ समश्नीयान्मासं मध्यंदिने रवौ॥ यतिचांद्रायणं ह्येतत
त्सर्वकल्मषनाशनं॥ यतिचांद्रायणमिति संज्ञामात्रं तेन न यतिमात्रस्यैवाधिकारः॥ किंतु सर्वेषां॥ एवं शि
शुचांद्रायणेपि यवपिपीलिकामध्ययोस्तिथिवृद्धौ ह्रासे वा ग्रासानामपि ह्रासवृद्धी॥ तथा च विष्णुः॥ ग्रासा
नाप्यविकारमश्नीयात् चंद्रकलाभिवृद्धौ क्रमेण वर्द्धयेद्धानौ च ह्रासयेदमावास्यायां च नाश्नीयादिति॥ एतेन
यत्कस्यचित्कृच्छ्रसपादाण्ण्याहेतुः कृष्णप्रतिपदि पंचदश ग्रासाः ततएकैकह्रानावमावास्यायामेकोग्रा
सः॥ शुक्लप्रतिपदादिषु ग्रासवृद्धिरिति॥ अमावास्यां न भुंजीत एष चांद्रायणे विधिरिति पराशरोक्तेश्च राम:
सामान्यचांद्रायणमाह स एव यथाकथंचित्पिंडानां तिस्रोशीतिरश्नीयात्मासमन्यच्चांद्रायणमिति १४॥

प्रतिदिनं संख्यानियमानादरेण मासे न चत्वारिंशदुत्तरं शतद्वयं ग्रासानश्नीयादिति सर्व॥ पिपीलिकायवच
मध्यभिन्नचांद्रायणेषु दिनांतरेष्वारंभो न प्रतिपद्येव ग्रासपरिमाणमाह याज्ञवल्क्यः॥ तिथिवृद्ध्याचरे
त्पिंडान्शुक्ले शिख्यंडसंमितान्॥ त्रिरवामपूरः चांद्रायणादिकरणे पराशरः॥ कुक्कुटांडप्रमाणं तु ग्रासं वै प
रिकल्पयेत्॥ शंखस्तु॥ आर्द्रामलकमात्रास्तु ग्रासा इंदुव्रते स्मृताः॥ इति॥ एतेषां च परिमाणं नां विकल्पः॥
एकादश्यादौ नित्यप्राप्त उपवासस्तावच्चांद्रायणविधिना बाध्यते॥ एतस्य धर्माय चरेदेतच्चंद्रस्यैति सलोकता
मिति काम्यत्वात् ग्रहणादि निमित्ते विहितत्वेन नैमित्तिकत्वाच्च॥ काम्यत्वे कादश्याद्युपवासोन्य द्वार
कारणीयः॥ प्रतिनिधिना धर्मकृतेपि फलप्राप्तेः॥ कातीयनादिभिरुक्तत्वात्॥ वचनान्नित्यस्मात्कृते समयमयूरके
ष्ट्यानि॥ अयं चैकादश्याद्युपवासबाधः॥ सामान्यचांद्रायणभिन्नेष्वेव॥ तत्र प्रतिदिनं ग्राससंग्रहणनियमाभाव
त्॥ गौतमः॥ अथातश्चांद्रायणं तस्योक्तो विधिः॥ कृच्छ्रे वपनं व्रतं चरेच्छ्वोभूतां पौर्णमासीमुपवसेदाप्यायस्व संते
पयांसि नवोनव इति चैताभिस्तर्पणमाज्यहोमो हविषश्चानुमंत्रणमुपस्थानं चंद्रमसो यद्देवा देवहेडनमि

प्रा.म.

॥२२॥

तिचतस्रश्चिराज्यं जुहुयाद्देवकृतस्येत्यंते समिद्भिः ॥ ॐ भूः ॥ भुवः ॥ स्वः ॥ तपः ॥ सत्यं ॥ यशः ॥ श्रीः ॥ ऊर्क् ॥ इट् ॥ ओज
ः ॥ तेजः ॥ पुरुषः ॥ धर्मः ॥ शिवः ॥ इत्येतैर्ग्रासानुमंत्रणं मनसा नमः स्वाहेति वा सर्वग्रासप्रमाणमास्याविकारेण
चरुभैक्षसक्तुकणयावकशाकपयोदधिघृतमूलफलोदकानि चरोत्तरप्रशस्तानि ॥ पौर्णमास्यां च
पंचदशग्रासान्भुक्त्वा एकैकापचयेनापरपक्षमश्नीयात् ॥ अमावास्यायामुपोष्यैवैकोपचयेन पूर्वप
क्षमिति बौधायनः ॥ अथातश्चान्द्रायणकल्पं व्याख्यास्यामः ॥ शुक्लचतुर्दश्यामुपवसेत् कृष्णचतुर्दश्यां वा केश
श्मश्रुलोमनखानि वापयित्वाऽपि वचेत्याशिषमः ॥ आयसतैजसे पात्रे च कौत्सन्नं विवर्जयेत् ॥ असुरा
णां हि तत्पात्रं देवपात्रमचक्कं कं च कौत्सन्नं घटशरावादि स एव ॥ अनुकल्पमस्थितं ग्रासं सावित्र्या चाभि
मंत्रयेत् ॥ अन्नमास्यैव प्राणाग्निहोत्रमाह बौधायनः ॥ अन्नप्राणायेति मंप्रथमं ॥ अपानायेति द्वितीयं
व्यानायेति तृतीयं ॥ उदानायेति चतुर्थं ॥ समानायेति पंचमं ॥ यदा चत्वारस्तदा द्वाभ्यां पूर्वौ ॥ यदा त्रयस्तद
द्वाभ्यां पूर्वं ॥ यदा द्वौ तदा द्वाभ्यां सेवोत्तरमेकं सर्वैरिति ॥ ग्रासद्वयपक्षे त्रयममाद्यैस्त्रिभिरंत्यं द्वाभ्यामेकपक्षे

राम:

॥८१५

सर्वैरेकमित्यर्थः ॥ अथ प्रयोगः ॥ चतुर्दश्यां कृतनित्यक्रियः पूर्वाह्णे प्राणानायम्य मासपक्षाद्युल्लिख्यामु
कपापक्षयकामः श्रीकामो देवताप्रीतिकामो रसायनादिसिद्धिकामो वा अमुकं चांद्रायणं करिष्य इति
संकल्प्य अग्ने व्रतपते व्रतं चरिष्यामीत्यादिमंत्रैर्व्रतमादित्याय निवेद्य केशश्मश्रुलोमनखानि
श्मश्रूण्येव वा वापयित्वा तद्दिनमुपोष्य परदिनेऽमावास्यां चेत्तत्राप्युपोष्य पौर्णमास्यां चेत्पंचदशग्रासान्भुंजीत
ततश्चमोत्तरपक्षेऽपचयः ॥ पौर्णमोत्तरपक्षेऽपचयो ग्रासानां प्रतिदिनमुदिते चंद्रे आप्यायस्व सोमंत
र्पयामि सते पयांसि सोमं तर्पयामि नवो नवो चं ऋतुपस्थापयेद्देवादेवहेडनमिति च तस्मिन्नग्नौ च माज्यं जु
हुयात् सर्वाग्रासयेन ममेति त्यागः ततो देवकृतस्येति त्रिभिः समिद्भिर्यंहृत्वा ॥ ॐ भूः ॥ भुवः ॥ स्वः ॥ तपः ॥ सत्यं ॥ श्रीः ॥
ऊर्क् ॥ इट् ॥ तेजः ॥ ओजः ॥ पुरुषः ॥ धर्मः ॥ शिवः ॥ इत्येतैः पंचदशभिरेकैकंक्रमेण पात्रस्थं ग्रासमनुमंत्र्य मन
सा नमः स्वाहेत्युक्त्वा सर्वाननुमंत्रैकैकमंगुल्यग्रे गृहीत्वा सावित्र्यानुमंत्र्य भक्षयेत् ॥ तत्र प्रथमदिन एक
ग्रासभक्षणे प्राणाय स्वाहेत्यादयः पंचापि मंत्राः ॥ द्वयोर्ग्रासयोराद्यैस्त्रिभिः मंत्रैरेकं द्वाभ्यां मंत्राभ्यामपरं ॥ त्रि

प्रा॰ म॰
॥२४॥

षुयासेषु द्वाभ्यां द्वौ एकैकेनांत्य। चतुर्थ द्वाभ्यां पूर्वेण एकैकेनान्या तु। पंचम्योधिकाया मासत्रयमेव भक्षणाया समा
प्तौ भ्रम ब्राह्मणभोजयित्वा गां दक्षिणां दद्यात्। मासमाग्निव्रतहं त्रिषवणं स्नानं सैप मंत्रैः कृतं जलैरादित्योप
स्थानं गायत्र्याव्याहृतिभिः कूश्मांडैर्वाज्यहोमः। द्विवास्थितिः। रात्रावुपवेशनं अशक्तौ शयनं यथाशक्ति
आपोहिष्ठेति सूक्तं। एतोन्विंद्रं स्तं चेति तृचं। शान्नो इंद्राग्नी मन्तिनो मिमीतां। सुनेमा देवजना। ऋषभं विरजं रौरवयौ
धाजयेसाम नीच पवेत। एतेषां मसंभवे गायत्री व्याहृती। एवं वाजपेत्। एतच्च विप्रभोजनदक्षिणादानाजि
यांतं सर्वेष्वपि प्राजापत्यादिव्रतेषु तुल्यं। इति चांद्रायणव्रतप्रयोग। अथ सोमायनं मार्कंडेय। गोक्षीरं स
प्तरात्रं तु पिबेत्स्तनचतुष्टयात्। स्तनत्रयात्सप्तरात्रं सप्तरात्रं स्तनद्वयात्। स्तनेनैकेन षड्रात्रं त्रिरात्रं वा
युनुपवेत्। एतत्त्रिंशद्दिनसाध्यं चतुर्विंशतिदिनसाध्यमाह चतुर्थी पञ्चं तिच तु स्तनेनत्रिरात्रं। त्रिस्त
नेनत्रिरात्रं द्विस्तनेनत्रिरात्रं एकस्तनेनत्रिरात्रं। एकस्तनपञ्चत्तिपुनश्चतुःस्तनांत। यातेसोमश्चतुर्था
तत्रस्तस्यै स्वाहा। एवं पंचमीषष्ठ्यासेवं यथापोक्तिर्थिहोमा। एकमासोर्पणे नोग्या। पूतत्वं चंद्रमसस्य

राम:
॥६२६

मानतां सामानलोकतां सायुज्यं गच्छति समाप्ते ब्राह्मणतर्पणं दक्षिणादानं वा चतुर्थ्यादिकृत्यं। समानता। तुल्य
त्वं समानपतान्यस्यं चंद्रत्वं सायुज्यं चंद्राभेदः। सर्वेषां कृच्छ्राणां फलार्थत्वमप्याह यमः॥ —कामः पुष्टिकाम्य
स्वर्गकामस्तथैव च। देवताराधनपरस्तथाकृच्छ्रं समाचरेत्। रसायनानि मंत्राश्च तथा वै वौषधानि च। त
स्य सर्वदानानि कृच्छ्रकर्तुर्न संशय इति। अथ प्राजापत्यादि प्रत्याम्नायः। तत्र तावच्चांद्रायणद्वादशाष्ट
दिव्रतविषयेष्वपि पापेषु प्राजापत्यकल्पनामाह चतुर्विंशमतेऽशनसौ। यत्रोक्तं यदा वा त्रेनोक्तमिह यातकनाश
नं प्राजापत्येन कृच्छ्रेणशोधयेन्नात्र संशयः। प्राजापत्यव्रतं तत्रानुरोधेन त्वशक्तो वा प्राजापत्यप्रत्या
म्नायः। षट्त्रिंशतिमते कृच्छ्रो देयः पुनश्चैव प्राणायामशतद्वयं। तिलहोमसहस्रं तु वेदपारायणं तथा
विप्रा द्वादश वा भोज्याः पावकेष्टिस्तथैव च। अन्या वा पावमानेष्टिः समाम्नाकृमनीषिणः। अपरार्के स
मिह्रतह्विर्षान्नं तिलान्वामारू ताशनः। कृत्वा द्वादशसाहस्रं गायत्र्या कृच्छ्रमाप्नुयादिति। द्वादशाभिरधि
कं सहस्रं द्वादशसहस्रं। याज्ञवल्क्योपि। यत्र यत्र च संकीर्णमात्मानं मन्यते जनः। तत्र तत्र तिलैर्होमो गा

यच्चाध्यापनं तथा। संकीर्णपापयुक्तं याचनं दानं तिलैरित्यत्रापि संबध्यते। तिलदानमित्यर्थः। वेदपाराय
णं संहितापारायणं। अयुतगायत्री निरस्यांतरितत्वात्। संहिताध्ययनं यावत्तं कालं सावित्रीजपेदिति
अपरार्के पि चेतःस्मृतेश्च पराशरः। कृच्छ्रोयुतं तु गायत्र्या उदवासस्तथैव च। धेनुप्रदानं विप्राय सममेतच्च
तुष्टयमिति। उदवासो होरात्रमिति महार्णवे। मार्कंडेयः। प्राजापत्यक्रियाशक्तौ धेनुं दद्यात्पयस्विनीं। धे
नुराभावे दातव्यं मूल्यं न संशय इति। संवर्तः। गवामभावे दातव्यं तुल्यं तुल्यं न संशय इति। मूल्यमुक्तं मा
धवीये ब्रह्मपुराणे। गवामभावे निष्कं स्यात्तदर्धं पादमेव वा। रूप्यपरिमाणे निष्कं परिभाषामाह या
ज्ञवल्क्यः। निष्कं सुवर्णाश्चत्वार इति। सुवर्णचतुष्टयसमतोलितं रूप्यं निष्कमित्यर्थः। लीलावत्यां। वराटका
नां दशकद्वयं चेत्सा काकिणी ताश्च पणश्चतस्रः। ते षोडश द्रम्म इहावगम्यो। द्रम्मैस्तथा षोडशभिश्च निष्क इ
ति। मूल्यांतरमपि प्रायश्चित्तविवेके षड्विंशन्मते। धेनुः पंचभिराढ्यानां मध्यानां त्रिपुराणिका। कार्षाप
णैकमूल्या हि पवित्राणां प्रकीर्तिता। दरिद्राणामिति क्वचित्पाठः। पुराणं द्वात्रिंशत्कृष्णलमितरजतं

देकृष्णलेस्मिन् मध्यते विज्ञेयो रूप्यमाषकः। तेषां षोडशकं स्याद्धरणं पुराणश्चैव राजतमिति मिताक्षरायां स्मृ
तेः। कार्षापणस्तु कार्षापणः सुविज्ञेयः कार्षिकस्ताम्रिकः पण इति मनूक्तेः। नारदोक्तेर्पि कार्षापणो दक्षिण
स्यां दिशि रौप्यः प्रवर्तते। पणैर्निबद्धः पूर्वस्यां षोडशैव पणाः स तु। मूल्याध्याये कात्यायनः। द्वात्रिंशत्पणि
का गावश्चतुष्कार्षापणो वरः। वृषे षट्कार्षापणकाः अष्टावनडुहि स्मृतः। दशकार्षापणा धेनोरश्वे पं
चदशैव त्विति। एतेषां च गोमूल्यपक्षाणां शक्ताशक्तभेदेन व्यवस्था। यत्तु अपरार्के द्वादशैव सहस्रा
णि जपेद्देवीमुपोषितः। जलांते विधिवन्मौनी प्राजापत्योयमुच्यते इति जलांते जलसमीपे। तथा तत्रैव
चतुर्विंशतिमते उक्तं अतिकृच्छ्रे पराके च प्राजापत्यत्रयं कुर्यात् कृच्छ्रे गोमिथुनमिति। अत्र द्वादशब्राह्म
णान् तर्पयेन्मरुतां शाच श्रोत्रियान् कृच्छ्र उच्यते। उपोष्य श्रद्धया युक्तस्तिलपात्राणि धर्मतः। द्वादशब्राह्मणेभ्यो वा
दिभ्यः प्राजापत्येन तत्समं। स्वयमाकृत्स्नयोमूर्ध्नि त्यक्त्वा नारानुपोषितः। दद्याद्गोमंडलेष्टु द्वादशैव न संश
यः। प्राणायामशतं कृत्वा द्वात्रिंशन्नरमात्रेषु अहोरात्रोषितस्तिष्ठेत्स्वाध्यायस्थः कृच्छ्रमुच्यते। नमस्कारसह

प्रा०म०
॥२६॥

स्नाणि द्वादशो वदेद्व्रतं। गोविप्रपितृदेवेषु कुर्यात्कृच्छ्रत्रयं नवेत्। तिलपात्रं तत्र पुत्तानि कौर्म्ये तिलपात्रं वि
त्रिधा प्रोक्तं कनिष्ठोत्तममध्यमं। ताम्रपात्रं दशपलं जघन्यं परिकीर्तितं द्विगुणं मध्यमं प्रोक्तं त्रिगुणं चो
त्तरं स्मृतं वसिष्ठः। अपि चेत्तरते कर्त्रे दिवसं मासतां ग्रानः रात्रौ स्थित्वा जले विष्ठः प्राजापत्येन तत्समं गोमूत्रे
ण समायुक्तं यावकं चोपयीजयेत् कृच्छ्रमेकाहिकं प्रोक्तं दृष्टमंगिरसा स्वयं। निस्यासीनो हि वा तिष्ठेत्त्रिरात्र
मारुताशनः। प्राजापत्यं विजानीयात्कृच्छ्रं मांडूकं कुष्मांडैर्जुहुयात् घृतमिति पराशरः। कृच्छ्रे देव्यसुतेंचे
वच्छ्राणायामशतं द्वयं पुण्यतीर्थे नार्द्रशिरः स्नानं द्वादशसंख्यया। माधवीये स्मृत्यंतरे प्राजापत्ये चर
न्विशेय ह्यशक्तः कथंचन। अहानि पंच विप्राणां भोजयेत्सगौ स्थितान्। अन्नकपि जलाधिकरणान्या
येन पंचस्वप्यहस्सु त्रयस्त्रयो विप्राका एवां एकमध्ययनं कुर्यात् प्राजापत्यमथापि वा द्वादशाहं द्वादशसा
हस्रं गवां मुष्टिं विचक्षण। एकमध्ययनं संहितासंहिताध्ययनं तथा। षडुपवासैरिति प्राजापत्यसिद्धिरि
ति निबंधकृतः। चतुर्विंशतिमते प्राजापत्ये तु गामेकां दद्यात्सांतपने द्वयं पराकतप्तातिकृच्छ्रेतिस्रतिस्र

राम:
॥६ २६॥

क्तगास्तिस्र एवेति। सांतपनमथ महासांतपन इतरं प्राजापत्योक्तं तथा च षट्त्रिंशन्मते। पराकतप्तातिकृच्छ्र
स्थाने कृच्छ्रत्रयं चरेत् सांतपनस्य चाष्टाश्मसांको व्रतमाचरेदिति। स्मृत्यर्थसारे तु पराके पंचातिकृच्छ्रे
षडिति। मु पराके मार्कंडेयः। प्राजापत्ये समा धेनुः समद्वयं तप्तकृच्छ्रके। पराके तु सुवर्णस्यार्द्धे मष्टं गीतवे
वच पराके तु सुवर्णा धेनुद्वयमूल्यसमं। हेमश्टंगी महर्णेन सकलकांस्यदोहा ह्युपस्कारवती धेनुलक्ष्य
यति। कर्मविपाकसारे गौरेकतु प्रत्नौ एको कृते ह्रुतिकृच्छ्रेतिस्रश्चांद्रायणे स्मृता इति मदनरत्ने स्मृतौ।
प्राजापत्ये तु गामेकामतिकृच्छ्रे द्वयं स्मृतं चांद्रायणे पराके च तिस्रो गा दक्षिणास्तथेति। वृद्धहारीतः चां
द्रायणमकुर्वाणः कुर्यात्कृच्छ्रचतुष्टयं एतच्चेति चांद्रायणविषयं सगव। चांद्रायणपराकान्यां निष्कृति
योनशक्रुयात् सशिसु चांद्रायणं दौ व धेनुत्रये कः। यत्तु चतुर्विंशतिमते च अष्टौ चांद्रायणे देया प्र
त्याम्नाय विधौ सदेतिति तिसिलीकायवमध्यविषयमति धनिन। धर्मविवृत्तौ चतुर्विंशतिमते चांद्रायणं म
गरिष्ठं पवित्रेष्टिस्तथैव च। मित्रविंदा पशुश्चैव कृच्छ्रत्रयमथापि वा। तिलहोमायुतं चैव पराकद्वयमे

प्रा.म.
।२९॥

वचांद्रायणस्यालस्यमेकं तु समानं कुर्मनीषिणः। नित्यनैमित्तिकानां च काम्यानां चैव कर्मणां। इष्टीनां पशु
बंधानामभावे चरवः स्मृता इति। कृच्छ्रातिकृच्छ्रे तु धेनुद्वयं। अत्र विष्णुदंडो यमे कृच्छ्रस्त्वतिकृच्छ्रे निपात
ने। कृच्छ्रातिकृच्छ्रे कृच्छ्रपाते कृच्छ्रोभ्यंतराणि तेष्वतिकृच्छ्रे धेनुद्वयोक्तेस्तद्विषयनिपातनादधि
केष्टकाते विहितस्य कृच्छ्रातिकृच्छ्रस्यातिकृच्छ्राद्धिक्यावगमाद्धेनुत्रयं प्रत्याम्नायो गम्यते। यद्वात्वति
कृच्छ्रातिक्रमत्वात् कृच्छ्रातिकृच्छ्रे ततोधिके च तत्त्व। तथा चोत्तराधिकेनाह हारीतः। अनाश्यमासं वत्सरं
प्राजापत्यं चरित्वाश्रममुपेयात्। द्वितीये तिकृच्छ्रं तृतीये कृच्छ्रातिकृच्छ्रमत ऊर्ध्वं चांद्रायणमिति। चतुर्विं
शतिमते। कृच्छ्रे पंचातिकृच्छ्रे त्रिगुणमहरहः त्रिंशदेवं ततो तायेच्चत्वारिंशाच्च तत्त्वे त्रिगुणानगुणितावि
शतिःस्यात्पराके। कृच्छ्रेसांतपनाख्येव वति षडधिकविंशतिःसैवहीनाद्वाभ्यां चांद्रायणेस्यात्तपसिहस्रा
तत्तु नैजये द्विप्रमुख्येत्। स्त्रवसंख्यान्वितमहरहः। परं नोजनान्विपितेन कृच्छ्रे प्रत्यहं पंचातिकृच्छ्रे प्र रामः
त्यहं पंचदश। एवमुत्तरत्रेति केचित्। मुक्तं तु संख्यावाक्यस्ययो। पराकस्यानन्वितपौरिवक्रिया न्वय। ते ।२२९।

न कृच्छ्रे पंचसु दिनेष्वेकैको ग्रासः। अतिकृच्छ्रे नवस्वेकैकः त्रिषु द्वौ द्वाविति पंचद
शेवं। ततीये कृच्छ्रातिकृच्छ्रे विंशात् द्वादशदिने विभज्य भोज्याः सांतपने चांद्रायणे च विंशतौ त्रिषु एवम
न्वेत। सौम्यकृच्छ्रे एका धेनुः। ब्रह्मकूर्चे द्वौ पराके तिस्रः। मासोपवासे सार्द्धे स्मृते तिस्रो बंधकृत। तुलापा
पुरुषे तु। पराके पंच। चांद्रायणे सर्द्धसप्त। शिशुचांद्रायणे तप्तकृच्छ्रे च यावदेनं चतुष्टयं। कृच्छ्रातिकृच्छ्रे मा
हामातपने च षट्। मासोपवासे पंचदश। ऋचे। अयुतार्घ्यं प्रत्याम्नायाः। ब्रह्महत्याव्रतमुपक्रम्य भविष्य
पुराणे। विध्याद्युत्तरतीयस्य निवासः परिकीर्तितः। परापारमतं तस्य सेतुबंधस्य दर्शने। विंध्योत्तरवर्तिनमुक्त्वा
तत्रैव चातुर्विद्योपपन्नस्तु विधिवद्ब्रह्मघातकः। समुद्रसेतुगमनं प्रायश्चित्तं विनिर्दिशेत्। स्मृतिसंग्रहे।
स्मृत्यर्थसारे। मागीरथ्यां स्नानं षष्टियोजनागतस्य षड्क्रमतं। अत्र यात्रायोजनवृद्धौ ह्रस्वछुद्धिः वृद्धि
:। एकयोजनागतस्य मध्ये पर्वतादिभिर्व्यवधाने कृच्छ्रत्रयं। ततीयोदशाधिकः कोशागतस्य भागी
रथ्यादिषु कृत्स्नानमेकः कृच्छ्रः। अशक्तस्य त्वर्द्धयोजनागतस्याशक्तस्यापि मार्गस्य दुर्गमत्वे भागी

रथ्यां स्नानमर्द्धयोजनगतस्यैकं कृच्छ्रं इत्यादि कल्पयंति। प्रयागस्नानं षष्टियोजनागतस्य द्वादशकृच्छ्रसमं गंगा
द्वारे प्रयागे च गंगासागरसंगमे चैव यमुनास्नानं विंशतियोजनागतस्य षट्कृच्छ्रसमं मथुरायां द्विगुणं सार
स्वत्यां चतुरशीतिकृच्छ्रसमं चत्वारिंशद्योजनागतस्य नर्मदासैकतश्वेतायां च द्विगुणं। स्वनयोर्नद्योर्योजन
द्वये पादकृच्छ्रं वृद्धि। दृषद्वती शुतुद्री विपाशा वितस्ता शरावती मरुद्वृधादिषु स्नानं त्रिंशत्कृच्छ्रसमं
पंचदशयोजनागतस्य। चंद्रभागा वेत्रवती सरयू गोमती देवनदीषु स्नानं षोडशकृच्छ्रसमं द्वादशयोजनागत
स्य। एतासु महानदीषु परस्परसंगमे त्रिनदीफलं। अन्यासु महानदीषु द्वादशकृच्छ्रसमं महानदे गंगाई
फलं। नदे शोणभद्रे वैराचननदे महानद्यां नर्मदायां च चतुर्विंशतियोजनागतस्य चतुर्विंशतिकृच्छ्र
समं कुब्जिकासंगमे द्विगुणं शुक्रतीर्थे चतुर्गुणं। ताप्यां दशकृच्छ्रसमं दशयोजनागतस्य पयोष्ण्यां
अष्टयोजनागतस्याष्टकृच्छ्रसमं तत्र तत्र संगमे द्विगुणं गोदावर्यां षष्टियोजनागतस्य अष्टसमं त्रिं
शद्योजनागतस्यैकादशतु तीर्थेषु प्रतिलोमानुलोमस्नानं षष्टिकृच्छ्रसमं वंजरासंगमे प्रयागे तद्द्वि

गुणं सप्तगोदावरी नाम्नि मध्यरे त्रिगुणं। ऊर्ध्वं तर्पणे वंजरायां द्वादशयोजनागतस्य द्वादशकृच्छ्रसमं गो
दावर्यां विशेषे समुद्रांते षड्गुणं। पूर्णातायां चतुःकृच्छ्रसमं चतुर्योजने पूर्णायां तद्द्वियोजने कृष्णवेण्या
यां पंचदशयोजने पंचदशकृच्छ्रसमं तुंगभद्रायां विंशतियोजनागतस्य विंशतिकृच्छ्रसमं मलापहारि
ण्याम् अष्टकृच्छ्रसमम् अष्टयोजनागतस्य निवृत्यां षट्कृच्छ्रसमं षड्योजनगतस्य गोदावर्यां यात्रायोजन
द्वये योजने पादकृच्छ्रं। हरिसिंहे गुरौ सर्वत्र जाह्नवीसमा कन्यास्थे गुरौ कृष्णवेण्यां सर्वत्र जाह्नवी
ई तुंगभद्रायां तुलास्थे गुरौ जाह्नव्यई याह्वां तुंगभद्रायां मलापहारिणीसंगमे प्रयागे त्रिंशद्योजनगत
स्य त्रिंशत्कृच्छ्रसमं भीमरथ्यासंगमे प्रयागे द्विगुणं तुंगभद्रासंगमे त्रिगुणं निवृत्तिसंगमे चतुर्गुणं
ब्रह्मेश्वरे पंचगुणं पातालगंगायां मल्लिकार्जुने षड्गुणं ततः पूर्वे षष्टिकृच्छ्रसमं शिवालये द्विगु
णं सप्तसंगमे चैवं कावेर्यां महानद्यां पंचदशकृच्छ्रसमं दशयोजनगतस्य ताम्रपर्णीकृतमा
लापयस्विनीषु द्वादशयोजने द्वादशकृच्छ्रसमं सह्यपादेभ्यो ता वेदवेणीदोहतास्तुनद्य स्वदेशे

प्रा॰म॰ ॥२९॥

तुसारेण एकादित्रिकृच्छ्रफलप्रदा । विपाशैलोद्भवा द्विगुणा । हिमोद्भूता त्रिगुणा । स्मृतौ पुराणे च यथाक
पंचविंदनुवतो कुल्या त्रिरात्रफलदा । अल्पनद्यः कृच्छ्रदा । नद्यो द्विकृच्छ्रदा । महानद्यस्तिकृच्छ्रदा । सर्व
नद्यास्तु कौ कृच्छ्रसंख्या योजनसंख्यया स्यात् । एकयोजनगादिषडयोजनगं ता स्रवंतः कुल्याः । ततो
र्ध्वं दशयोजनगा अल्पनद्यः चतुर्विंशतियोजनगं तानद्यः । चतुर्विंशतियोजनाधिकगा महानद्यः । स
मुद्रगाश्च महानद्यः । यत्र महानदीसमर्ख्यात्तिताश्च महानद्यः । उपवाससहितं नदीसमं कृच्छ्रं । योजनाद
र्वाग्धि । श्रुनागर्ह्लेवाचांडालीश्रुडीकप्रगादिनद्यः पापनद्यः । अवर्ज्याः । सर्वत्र समुद्रस्नानं द्विकार्यं देव
तासमायेसरा सरित्त्रिदासंगमेषु सर्वदार्यं समुद्रस्नानं च दशयोजनगतस्य स्नात्वा । रामेश्वरदर्शने षष्टि
कृच्छ्रसमं विंध्यदेशीयाणां ता सेतुरामेश्वरे जाह्नव्यां च त्रिगुणं फलं जाह्नवी केदारयोश्चतथैव दक्षि
णदिशायां स्तं जाह्नव्यां षड्गुणं । गंगादेशीयानां सेतुरामेश्वरे षड्गुणं स्कंददर्शने विंशात्कृच्छ्रसमं त्रिंशद्यो रा॰म॰
जनस्य यत्र गंगासज्ञात्तितन्नैवं श्रीरंगपद्मनाभपुरुषोत्तमचक्रकोटमहोलक्ष्मी दर्शने लेणारस्या ॥६२५

ने त्रिंशद्योजनगतस्य त्रिंशद्योजनगतस्य त्रिंशत्कृच्छ्रसमं केदारे त्रिगुणं सर्वं वैल्लवमाहेश्वरसौराष्ट्रा का
दिपावदर्शने पंचदशकृच्छ्रसमं प्रख्याते द्विगुणं अहोवलेपि तथा । श्रीशैलप्रदक्षिणं षष्टिकृच्छ्रसमं
श्रीशैले शृंगदर्शनं द्वादशकृच्छ्रसमं अन्येषु प्रख्याततीर्थदेवदर्शनेषु षट्कृच्छ्रफलं । सिद्धदेवे त्र्यहे
त्रैचस्वयंभुदर्शनं त्रिंशत्कृच्छ्रसमं त्रिंशद्योजनगतस्य । सर्वत्र कृच्छ्रसंख्याया योजनसंज्ञा ज्ञेया इति ती
र्थप्रत्याम्नाया । अथ पातित्यहेतवः । गौतमः ब्रह्महसुरापगुरुतल्पगमातृपित्रयोनिसंबंधागस्तेननास्ति
कनिंदितकर्माभ्यासिपतित्याग्यपतितत्यागिनः पतिताः पाकसंयोगजकाश्च । मातापित्रयोनिसंबंधागोमा
तृष्वसृपितृष्वसृपितृष्वसृभगिनीगामी । स्ते नसु वर्णत्वसमयोः । नास्तिको वेदाप्रमाणवादी । अपतित
त्यागी गुरुमनिशाय्यपतत्यक्ता पातसंयोजकाः स्वसंसर्गेण दोषहेतव इति प्रांच । अपरार्के तु पातकाः प्र
योजकादयस्ते पि पतिता इति एके कल्पतरावपि । यम । मातृष्वसा मातुःसखी दुहिता च पितृष्वसा । मातुला
न्यश्च सा स्वसा गर्त्वा सद्यः पतेन्नर इति । मनुः सद्यः पतति मांसेन लाक्षया लवणेन च । स एव छत्रांकं विध

प्रा॰म॰ रहंचलशुनं ग्रामकुक्कुटं पलांडुगृंजनं चैव मत्या जग्ध्वा पतेत्ततो नरः। यम। जलाग्न्युद्बंधनभ्रष्टाः प्रव्रज्यानशन
॥३०॥ च्युताः। विषप्रपतनप्रायशस्त्रघातहताश्च ये। नवैते प्रत्यवसिताः सर्वलोकबहिष्कृता इति। उपनयनमुख्य
गौणकालातिक्रमे व्रात्या नाम पतितास्तमाह याज्ञवल्क्यः। अत ऊर्ध्वं पतंत्येते सर्वधर्मबहिष्कृताः। सावित्रीप
तिता व्रात्या व्रात्यस्तोमादृते क्रतोः। आश्वलायनोपि। अत ऊर्ध्वं पतितसावित्रीका भवंति तान्नोपनयेन्नाध्यापयेन्न
याजयेन्नैभिर्व्यवहरेयुरिति। स्मृतिः। आरूढपतितं विप्रं मंडलाच्च विनिःसृतं। उद्बंधं कृमिदष्टं च स्पृष्ट्वा
चांद्रायणं चरेत्। आरूढो गृहस्थव्यतिरिक्ताश्रमी ब्रह्मचर्यस्खलनात् द्विजातिकर्मानधि
री। मंडलात्स्वस्वजातीयेभ्यो विनिःसृतो बहिष्कृतः। उद्बंधः उद्बंधनमृत आत्महंता। कृमिदष्टः आदिदं
शजः ते तत्र कृमिः। मनुः। चांडालांत्यस्त्रियो गत्वा भुक्त्वा च प्रतिगृह्य च। पतत्यज्ञानतो विप्रो ज्ञानात्साम्यं
तु गच्छति। गौतमः। न स्त्री गुरुतल्पं पतंतीत्येके। भ्रूणहनने हीनवर्णसेवायां स्त्री पतति। मातृपितृ राम॰
योनिसंबंधगः पततीत्यस्यापवादः। ता गुरुतल्पगमनव्यतिरिक्तासु गच्छंत्यपि न याः ततीत्येके मन्यते। किं ॥९२२

तु प्रायश्चित्तीयते गौतमस्तु पततीति मन्यते सोयं बृहस्पत्युपाध्याये द्रौपायनाभ्यां सापेक्षो व्यभि
स्थितो विकल्प इति निर्णयज्ञः। भ्रूणहनने गर्भवधे हीनसेवायां स्वापेक्षया हीनवर्णपुरुषगमने च श
तिलोमगमने च याज्ञवल्क्यः। नीचाभिगमनं गर्भपातनं भर्तृहिंसनं विशेषपतनायानि स्त्रीणामे
तान्यपि ध्रुवं। अपि शब्दाद्ब्रह्महत्यादीन्युपपातकान्यपि समस्तानि नीचो हीनवर्णः स्वस्वतःक्रमेण च
गर्भोत्पत्तिं च। अत एव व्यभिचाराद्दृतौ शुद्धिर्गर्भे त्यागो विधीयते। गर्भभर्तृवधादौ च तथा महति पातक
इति याज्ञवल्क्यवाक्ये स्त्रीकृते गर्भ इति प्राच्यां व्याने ब्राह्मणक्षत्रियविशां भार्याः शूद्रेणसंगताः। अप्रजा
ता विशुध्यंति प्रायश्चित्तेन नेतरा इति वासिष्ठात्। पुत्रशौनक। पुरुषस्य यानि पतननिमित्तानि स्त्री
णामपि तान्येव ब्राह्मणी हीनवर्णसेवायामधिकं पततीति। तत्र हीनवर्णसेवा गर्भोत्पत्तिपर्यंतगमनं प्रति
लोमगमनमात्रं च वसिष्ठः। त्रीणि स्त्रियाः पातकानि लोके धर्मविदो विदुः। भर्तुर्वधो भ्रूणहत्या स्वस्य
गर्भस्य पातनं। भ्रूणहत्योक्तिर्दृष्टांतार्था स एव च तत्र तत्त्वपरित्याज्याः शिष्यगा गुरुगास्तथा। प

तिष्ठा च विशेषेण ॥ अंगिरोपगताच या अंगिरेतः प्रतिलोमज ॥ स्त्रीष्वगमनादीनामपि पानित्यहेतुपतिव
धसादृश्च यातया तित्यहेतुत्वं ॥ मातगम्य वस्त्रान्नगृहवासादि जीवनेहेतुविच्छेदे ननीचा ॥ निगमनाद
वपादृगे वत्याग ॥ प्रायश्चित्तं विकीर्षतीनां त्वत्यागमाह याज्ञवल्क्यः पतितानामेष एव विधिः स्त्रीणां प्र
कीर्तितः ॥ वासो गृहांतिके पमन्ने वासः संरक्षणं ॥ मनुः पतत्यर्द्धं शरीरस्य यस्य भार्या सुरापिबे
त् ॥ पतितार्द्धशरीरस्य निष्कृतिर्न विधीयते ॥ इति ॥ द्विजातिभार्यायाः शूद्रायाः सुरापाननिषेधार्थमि
दमिति विज्ञानेश्वरः ॥ सा घकामाधवक्त्र ॥ ब्राह्मणपादीनामप्ययं निषेधः ॥ स्त्रियामनुसंसर्गेपि दोषा
र्थमुत्तरार्द्धे महाधिकारा ॥ स्त्रियाश्चार्द्धशरीरत्वं पतितमर्द्धशरीरं यस्येति बहुव्रीहिरित्युच्यते ॥ त
न्न ॥ ब्राह्मणादीनप्रतिनिषेधेवचो वैयर्थ्यापत्तेः ॥ बहुव्रीहौ लक्षणापत्तेश्च ॥ अतो विज्ञानेश्वरस्य व
सम्यगुक्ते ॥ अथ साधारणप्रायश्चित्तानि संवर्त्तः ॥ हिरण्यदानं गोदानं भूमिदानं तथैव च ॥ नाशयं त्या राम:
शुपापानि महापातकजान्यपि ॥ गौतमः संवत्सरः षण्मासाश्चत्वारस्त्रयो द्वावेकश्चतुर्विंशत्यहो द्वा ९२३

दशाहः षडहस्त्र्यहो हो होरात्र इति कालाः ॥ एतान्यनादेशे विकल्पेन क्रियेरन् ॥ एनसि गुरुषु गुरूणि लघुनि
लघुनि कृच्छ्राणि कृच्छ्रा चांद्रायणमिति प्रायश्चित्तमिति ॥ विष्णुधर्मोत्तरे ॥ सायं प्रातस्तथा कृत्वा वासुदे
वस्य कीर्तनं सर्वपापविनिर्मुक्तः ॥ स्वर्गलोके महीयते ॥ पुन्नामखंडे श्री भगवद्वाक्यं ॥ नाम्नां सुरवं तरनामे
ह्लादनं ये परंतप ॥ प्रायश्चित्तमशेषाणां पापानां मोचकं परं ॥ वराहे ॥ वासुदेवस्य संकीर्त्य सुरापो व्या
धितोपि वा मुक्तो जायेत नियतं महाविष्णुः प्रसीदति ॥ गोविंदे ॥ पतितः स्खलितो क्षतः भक्त्या वा भक्तिवर्जितं ॥ इदं ते स
र्वपापानि युगांतेग्निरिवोत्थितः ॥ विश्वामित्रः ॥ कृच्छ्रं चांद्रायणादी निष्कृत्य सुदयकारणं ॥ प्रकारोषु चरह त्र
मुक्ते संशयेऽस्फुटे ॥ प्राजापत्यः सांतपनः शिशुकृच्छ्रः पराकः कृच्छ्रातिकृच्छ्रः पर्णकृच्छ्रः सौम्यकृच्छ्रोतिकृच्छ्रकः ॥ म
हासांतपनः सिद्धोतप्तकृच्छ्रस्तथापावनः ॥ जपोपवास कृच्छ्रस्तु ब्रह्मकूर्चस्तु शोधकः ॥ एते व्रतास्समस्तो वा प्रत
कं वा कशोपि वा ॥ पातकादिषु सर्वेषु उपवासेषु यत्नतः कार्या चांद्रायणैर्युक्ताः केवला वा पिपासुरूपये ॥ शिशु
चांद्रायणं तथा यवमध्यं तथा प्रोक्तं तथा पिपीलिका इति ॥ उपवासस्त्रिरात्रं वा मासपक्षास्तदर्द्धकं ॥ षड

प्रा॰मु॰

॥३२॥

हो द्वादशाब्दादिकार्यं शुद्धिफलार्थिनः ॥ उपपातक उक्ता नाम नादिष्टेषु चैव हि ॥ प्रकारो वा प्रकारो वा त्वनिसंधा
द्यपेक्षया ॥ जातिशक्तिगुणान् दृष्ट्वा सकृद्बुद्धिकृतं तथा ॥ अनुबंधादिकं दृष्ट्वा सर्वं कार्यं यथाक्रमं ॥ प्रकारांतरं
यत्किंचिद्द्विजाद्भागो रहस्यके ॥ त्रिरद्भागः षष्ठिभागः कल्पो जात्याद्यपेक्षया ॥ याज्ञवल्क्यः ॥ अनादिष्टेषु पा
पेषु शुद्धिश्चांद्रायणेन च ॥ धर्मार्थं यश्चरेदेतच्चंद्रस्येति सलोकतां ॥ षट्त्रिंशन्मते त्रयाणां समुच्चय इति
याद्वितः ॥ यानि कानि च पापानि गुरूणि गुरुतराणि च ॥ कृच्छ्रातिकृच्छ्रचांद्रैः शोध्यंते मनुरब्रवीत् ॥ निरपेक्षो
पि प्राजापत्यश्चतुर्विंशतिमते ॥ लघुदोषे त्वनादिष्टे प्राजापत्यं समाचरेदिति ॥ द्वयोः समुच्चयमाहोशना
दुरितानां दुरिष्टानां पापानां महतामपि ॥ कृच्छ्रं चांद्रायणं चैव सर्वपापप्रणाशनमिति ॥ दुरितमुपपातकं
दुरिष्टं पातकं निरपेक्षः पराकमाह मनुः ॥ पराको नाम कृच्छ्रोयं सर्वपापप्रणोदन इति गौतमोपि ॥ प्रथमं
चरित्वा शुचिः कर्मण्यः पूतो भवति ॥ द्वितीयं चरित्वा पयदन्यमहापातकेभ्यः पापं कुरुते तस्मात्प्रमुच्यते राम॰
तृतीयं चरित्वा सर्वस्मादेनसो मुच्यत इति ॥ प्रथमादिपदैः कृच्छ्रातिकृच्छ्रचांद्रा उच्यंते ॥ हारीतः ॥ चांद्रायणं प ॥७२४॥

राकं चतुर्लक्षजपश्च गवा चैवानुगमनं सर्वपापप्रणाशनमिति ॥ तथा ॥ गोमूत्रं गोमयं क्षीरं दधि सर्पिः कु
शोदकं एकरात्रोपवासश्च श्वपाकमपि शोधयेत् ॥ एतेषां सर्वेषां व्यवस्थोक्ता विष्णुपुराणे ॥ पापे गुरूणि गु
रूणि स्वल्पान्यल्पे च तद्विदः ॥ प्रायश्चित्तानि मैत्रेय जगुः स्वायंभुवादयः ॥ भविष्ये एवंविषयभेदेन व्यवस्था
व्यानि पुत्रका ॥ प्रायश्चित्तानि सर्वाणि गुरूणि च लघूनि च ॥ अन्यथा हि महाबाहो लघुतिमुपदेशतः गुरू
गुणानुपदेशो हि निष्प्रयोजनतां व्रजेत् ॥ गौतमः ॥ एनसि गुरूणि गुरूणि लघूनि लघूनि ॥ इति साधारणप्राय
श्चित्तानि ॥ अथ पापभेदः ॥ विष्णुः ॥ अतिपातकमहापातकानुपातकोपपातकेषु प्रवर्त्तके ॥ जातिभ्रंशकरेषु संकरणे
ष्वपात्रीकरणेषु मलावहेषु प्रकीर्णकेष्वपि ॥ तत्र महापातकान्याह मनुः ॥ ब्रह्महत्या सुरापानं स्तेयं गुर्वंगनागम
॥ महांति पातकान्याहुः संप्रयोगं चैतैः सह ब्रह्महत्यासमाद्यास्तु स्मरणं ॥ अकामकृते तस्मिन् प्रायश्चित्तमा
ह याज्ञवल्क्यः ॥ शिरःकपाली ध्वजवान् भिक्षाशी कर्म वेदयन् ॥ ब्रह्महा द्वादशाब्दानि मितभुक् शुद्धिमाप्नु
यात् ॥ शिरःकपाली स्वहतविप्रशिरोस्थि धृक् ॥ ध्वजः आरोपितशवशिरादंडः ॥ यत्तु मध्यमांगिरा ॥ गवां सह

प्रा॰म॰

३२ स्तं विधिवत्पात्रेभ्यः प्रतिपादयेत्। ब्रह्महा विप्रानुच्यत सर्वपापेभ्य एव चेति तन्मातापितृगुर्वादिविषयं मनु
:। यजेत वाश्वमेधेन स्वर्जिता सवेन वा। अभिजिद्विश्वजिद्भ्यां वा त्रिवृताग्निष्टुतापि वा। जपन्वान्यतमं वेदं यो
जनानां शतं व्रतो। ब्रह्महत्यापनोदाय मितभुक् नियतेंद्रियः। सर्वस्वं वा वेदविदे ब्राह्मणायोपपादयेत्। धनं वाजी
वनायालं गृहं वा सपरिच्छदं। हविष्यभुग्वानुसरेत्प्रतिस्रोतः सरस्वतीं। जपेद्वा नियताहारस्त्रिः कृत्वा वेदसं
हितामिति। सर्वस्वं वा धनं वा गृहं वेति प्रायश्चित्तत्रयमिति विज्ञानेश्वरः। उत्तरार्द्धपूर्वार्द्धवैशेष्यान्न स्वतंत्रप्रा
यश्चित्तद्वयं विधानार्थमिति मेधातिथिः। पुनश्चैतत् क्रियते सर्वस्वमित्याकांक्षापूरणात्। अन्यपापरादिसर्वस्व
दाने पि शुद्धिः स्यात् कल्पतरुः। अल्पमल्पं तु वर्णिवादद्याद्धा विप्रतुष्टिकृदिति। एतेषां च प्रायश्चित्तानां व्य
वस्थोक्ता भविष्ये जातिमात्रं यदा विप्रं हन्यादमतिपूर्वकं। वेदविद्याग्निहोत्री च तदा तस्य भवेदिदं। जपन्वा
न्यतमं वेदं योजनानां शतं व्रजेत् इति। तत्रैव जातिमात्रं यदा हन्याद्ब्राह्मणं ब्राह्मणो गुरुः। वेदाभ्यासविही राम:
नो वै धनवानग्निवर्जितः। प्रायश्चित्तं यदा कुर्यादितिपापविशुद्धये। धनं वाजीवनायालं गृहं वा सपरिच्छ ९२५

दं इति। एतस्मिन्नेव विषये पराशर आह। चातुर्विद्योपपन्नस्तु विधिवद्ब्रह्मघातके। समुद्रसेतुगमने प्रायश्चित्तविषये प
राशर आह। चातुर्विद्योपपन्नस्तु विधिवद्ब्रह्मघातके। समुद्रसेतुगमने प्रायश्चित्तं निर्दिशेत्। सेतुबंधपथे भिक्षां
चातुर्वर्ण्यात्समाहरेत्। वर्जयित्वा विकर्मस्थान् छत्रोपानद्विवर्जितः। अहं दुष्कृतकर्मा वै महापातककार
कः। गोकुलेषु च गोष्ठेषु ग्रामेषु नगरेषु च। तपोवनेषु तीर्थेषु नदीप्रस्रवणेषु च। एतेषु ख्यापयेदेनः पुण्यं गत्वा
च सागरं। ब्रह्महा विप्रमुच्येत स्नात्वा तस्मिन्महोदधौ। ततः पूतं महाप्राप्य कृत्वा ब्राह्मणभोजनं। दत्वा वस्त्र
पवित्राणि पूतात्मा प्रविशेद्गृहं। गवां पापिशतं गत्वा स्वतुर्विधाय दक्षिणां। एवं शुद्धिमवाप्नोति चातुर्विद्यानु
मोदित इति। अत्र विशेष उक्तो भविष्ये। विंध्यादुत्तरतो यस्य निवासः परिकीर्तितः। पराशरमतं तस्य सेतुबं
धनदर्शनमिमिति। तत्रैव। तिरस्कृतो यदा विप्रैः क्लिश्यमाणो महतो यदि। निर्गुणः सहमात्रो धःकृतद्वेषादिकार
णात्। त्रैवार्षिकं व्रतं कुर्यात्प्रतिलोमं सरस्वतीं। गच्छेद्वापि विशुध्यर्थं तस्या पापेति निश्चितं। तत्रैव। अत्य
र्थं निर्गुणो विप्रो ह्यत्यर्थं निर्गुणोपरि कोधादैश्रियते यस्तु ननिमित्तं तु गर्भस्थितः। एवं सरस्वतीं यं कुर्यान्ने

रः कृच्छ्रं विशुद्धय इति। एतस्मिन्नेव विषये निमित्तिनो गुणवत्वेन तस्य च। निर्गुणत्वे तत्रैव केशश्मश्रुनखादीनां
कृत्वा तु वपनं वने। ब्रह्मचर्यं चरन्विप्रो वर्षेणैकेन शुध्यतीति। षट्त्रिंशन्मते षट् ब्राह्मणं हत्वा शूद्रहत्या
व्रतं चरेत्। चांद्रायणं वा कुर्वीत पराकद्वयमेव चेति। पतिताविप्रवध्यासः। ब्रह्महत्यानयं विप्रगायत्रीमभ्य
सेत्सहस्रं प्राणायामशतं कुर्यात्सार्धमहं नियतः शुचिः। भिक्षाशी न वसेत्तं मरणे पसंयतेंद्रियः। षोडश ब्राह्म
णान्विप्रो भोजयित्वा समाहितः। प्रयच्छेद्वत्सयुग्मानि हिरण्यं चापि शक्तितः इति। एतानि च प्रायश्चित्तान्य
नुपतब्राह्मणवधेपि द्रष्टव्यानि। ब्राह्मणपावित्रोषात्यनुपडष्ट। निर्गुणविप्रवधेषड्ढस्य वक्ष्यमाणत्वा
त्। एतस्याप्युपनयनाभावेन निर्गुणत्वात्। कामतो विप्रवधे तु मनुः। प्रायश्चित्तं तु यत्प्रोक्तं प्रायश्चित्तं मनीषि
भिः। तत्र कामकृतं प्राप्य विज्ञेयं नात्र संशयः। कालिकापुराणे इयं विशुद्धिरुदिता प्रमाप्याकामतो द्विजं
कामतो ब्राह्मणवधे जीवतो नास्ति निष्कृतिः। कामानुवृत्तावं गिरा। शरीरं न दहेद्यावद्ब्रह्महापापकृत्तमः। ता
वत्तस्य तच्छुद्धिः स्यादित्येवमनुरब्रवीत्। मरणो ब्राकस्यापवादउक्तस्तत्रैव। स्यान्नकामकृते पत्रद्विगुणं

बुद्धिपूर्वक इति मध्यमांगिरा। विहितं यदकामानां कामात्तद्विगुणं भवेदिति। क्वचित्तपवादो भविष्ये
ब्राह्मणं जातुमात्रं तु कामतो विनिपात्य वै। चरेद्द्वादशवर्षाणि गुणनिर्गुणमेव वा हीति। तत्रैव हत्वा तु
प्रहरंतं वै ब्राह्मणं वेदपारगं। कामतोपि चरेद्वीरद्वादशपार्वमुत्तमं। अकामस्त्वर्द्धं। क्षत्रियादीनां विशे
षो भविष्ये। हत्वा तु क्षत्रियो विप्रो गुणाढ्यमिह कामतः। प्रायश्चित्तं चरेद्वीर विधिवत्कायशुद्धये। लक्ष्यश
स्त्रभृतां वास्यादिच्छया मितयात्मनः। प्रासेदात्मानमानौ वा समिद्धे त्रिरवाक्शिरा इति। पतितादिषु वि
शेषमाह कात्यायनः। महापातकसंयुक्तो दैवास्यादग्निमान्यदि। पुत्रादिः पालयेदग्नीनयुक्तश्चादोषसं
क्षयात्। प्रायश्चित्तं न कुर्याद्यः कुर्वन्वापि म्रियते यदि। गृह्यं निर्वापयेच्छ्रौतमप्स्वास्येत्सपरिच्छदमिति। पालन
विधानात्। अग्नहोत्रहोमपि सकुर्यात्। उशना। आहिताग्निस्तु यो विप्रो महापातकिवान् भवेत्। प्राय
श्चित्ते नशुध्येत तदग्नीनां तु का गतिः। वैतानं प्रक्षिपेत्तोये शालाग्निं शामयेद्बुधः। पतितेनापि प्रायश्चित्तांगत्वे
न संध्यावंदनं कार्यं संध्याहीनोशुचिर्नित्यं सततं। सर्वकर्मसु यत्किंचित्कुरुते कर्म न तस्य फलमाप्नु

वेदितिदर्शोक्तेः। आरब्धप्रायश्चित्तमहत्याया तत्किं न समुपक्रम्य सम्यक्तं धामुपासीत तन्निकालं स्नानमाचरेत्
इति स्मृतेश्च ब्रह्मवधव्रतमन्यत्राप्यतिदिशति याज्ञवल्क्यः। यागस्थक्षत्रविट्घाती चरेद्ब्रह्महणि व्रतं ग
र्भहा च यथावर्णं तथात्रेयीनिषूदक इति। व्रतपदात् देवातिदिशपते न मरणं गर्भश्च विज्ञायां संज्ञातः
जारजे तु ब्राह्मणत्वाभावात् तद्वध इदं प्रायश्चित्तं। किंतु कुंडगोलकादिवधनिमित्तमिति बंधकृतः यथा पा चार्यमते
कुंडगोलकादिषु ब्राह्मणत्वमस्त्येव तथापि कुंडगोलकादिवध प्रायश्चित्तमेव। अन्यथा तद्विधिवैयर्थ्यं स्या
त्। स्त्रीपुंनपुंसकविशेषत्वेनाज्ञातश्चेत्। स्त्री चेत् ज्ञाते उपपातकप्रायश्चित्तं। ब्राह्मणादिस्त्रीमात्रवध
स्योपपातकत्वमिति विज्ञानेश्वरादयः। नपुंसकत्वे नज्ञाते तेषंढवधप्रायश्चित्तं पूर्वमुक्तं। आत्रेयीमाहवसि
ष्टः। रजस्वलामृतुस्नातामात्रेयीमाहुः अत्र ह्येष दधत्यपत्यं भवतीति रजस्वला त्रिदिनं तदूर्ध्वं
त्रयोदशातिथिऽउरा। अत्र ह्येषदिते हेतुनावं धातु दामः यमस्तु। जन्मप्रभृति संस्कारैः संस्कृता मंत्रवच्च
यागानिरीगोत्रपचायास्यात्ता मात्रेयी विदुर्बुधा इति। विष्णुः एतन्महाव्रतं ब्रह्मणं हत्वा द्वादशाब्दसरं।

कुर्यात् यागस्थं क्षत्रियं वैश्यं गर्भिणीं रजस्वलां वात्रिगोत्रां वेति यत्वंगिराः। आहिताग्नेर्द्विजातेस्तु हत्वापत्नीम
निंदितां ब्रह्महत्याव्रतं कुर्यादात्रेयीघ्नस्तथैव चेति तद्यागस्थपत्नीपरं। सवनस्थां स्त्रियं हत्वाचरेत् ब्रह्म
हणि व्रतमिति पराशरोक्तेः ब्रह्मवधव्रतं प्रक्रम्य मनुः। उक्त्वा चैवाव्रतं मासे प्रतिरश्मगुरुं तथा। अप
हृत्य च निक्षेपं कृत्वा च स्त्रीसुहृद्वधमिति। विप्रवधफलिकैव सा स्यन्त्तौ क्तिः स्त्री सवनस्था। यथावर्ण
मित्यनुवृत्तौ याज्ञवल्क्यः। चरे व्रतमहत्वापि घातार्थं चेत्समाहितः। अत्रादिग्वितिदेशात् त्वात्योदोना
मितिमदनादयः। अप्यसवनस्थक्षत्रियावधेः मनुः। अकामतस्तु राजन्यं विनिपात्य द्विजोत्तमः। वृष
भैकसहस्रा गा दद्यात् सुचर्यमात्मनः। त्र्यब्दं चरेद्वा नियतो जटी ब्रह्महणो व्रतं। गोसहस्रेसवनस्थवधेति
धनाद्यस्य तपस्य शक्तस्येति मेधातिथिः। वैश्यहाब्दं चरेदेतद्द्याद्वैकशतं गवां। षण्मासान् शूद्रहाप्येतद्धे
नूर्दद्याद्वा दशवेति। कामतस्तु हारीतः ब्राह्मणं क्षत्रियं हत्वा षड्वर्षाणि व्रतं चरेत्। वैश्यं हत्वा चरेद्वेवं व्रतं त्रैवार्षि
कं द्विजः। शूद्रं हत्वा चरेद्वर्षं ऋषभैकादशास्तथा इति। आत्रेयीवधे तु स एव तुरीयोऽतं क्षत्रियस्य वधे व्र

प्रा॰म॰

॥३६॥

स्य हत्याव्रतं॥ अर्धं वैश्यवधे कुर्यात्तुरीयं वृषलस्य तु॥ यमः॥ कृच्छ्रातिकृच्छ्रं कुर्वीत चांद्रायणमथापि वा चरेत्॥ दशसं
वत्सरमग्गादद्यादं गच्छेद्दोषदा भवेत्॥ अगच्छद्दशतेषां समुच्चय इति शूलपाणिः॥ योगीश्वरः॥ विप्रदंडोद्यमे
कृच्छ्रस्त्वतिकृच्छ्रो निपातने॥ कृच्छ्रातिकृच्छ्रो निपातने कृच्छ्रातिकृच्छ्रोऽसृक्पाते कृच्छ्रोऽभ्यंतरशोणिते॥ दंडः
शंखस्यास्तु पलद्वः॥ क॥ बृहस्पतिः॥ काष्ठादिना ताडयित्वा त्वग्भेदे कृच्छ्रमाचरेत्॥ अस्थिभेदे तु तप्तकृच्छ्रं तु पराकं
चांगकर्तने॥ याज्ञवल्क्यः॥ गुरुं त्वंकृत्य हुंकृत्य विप्रं निर्जित्य वादतः॥ बध्वा च वाससा क्षिप्रं प्रसाद्योपवसेद्दि
नं॥ सुमंतुः॥ देवर्षीणां ब्राह्मणाचार्यमातापितृनरेंद्राणां प्रतिविवदनेनाक्रोशने जिह्वां दहे हिरण्यं दद्या
त्॥ एतद्दायासविषयं॥ यमः॥ आवध्य ब्राह्मणं कंठे प्रायश्चित्तं विधीयते॥ त्रिरात्रोपोषितः स्नात्वा प्रणिपत्य
प्रसादयेत्॥ मिथ्याभिशंसने याज्ञवल्क्यः॥ मिथ्याभिशंसने दोषो द्विः समो भूतवादिनः॥ मिथ्याभिशस्तदोषं
च समादत्ते मृषा वदन्॥ प्रायश्चित्तमाह वसिष्ठः॥ ब्राह्मणमनृतेनाभिशस्य पतनीयेनापनीयेन वा मासमप्सु रामः
शुद्धवतीरावर्तयेत्॥ शुद्धवतीरेतोन्विंद्रमित्याद्याः॥ याज्ञवल्क्यः॥ महापापोपपापाभ्यां योऽभिशंसे ॥६२६॥

न्मृषा॥ अब्भक्षो मासमासीत स जापी नियतेंद्रियः॥ उपपाभिशापे त्वाह तेनेदं सकृच्छ्रं महापापाभिशं
सने गुरुविषये कामतः॥ तदा देतौ तु शंखलिखितौ॥ नास्तिकः कृतघ्नः कूटव्यवहारी ब्राह्मणवृत्तिघ्नो मिथ्या
शंसी चेत्येते षट्पूर्णानि ब्राह्मणगृहेषु भैक्षं चरेयुः॥ संवत्सरं धौतभैक्षमश्नीयुः षण्मासान्वान्यानुगच्छेयुरि
ति॥ एतत्सजातीयेन सजातीये निशस्ते सति॥ विजातीये तु प्रतिलोमापवादे द्विगुणो त्रिगुणो वर्णानामानु
लोम्येन तु तस्मादर्धार्धहानिरिति याज्ञवल्क्योक्तदंडानुरूपं बोध्यं॥ अत्र प्रसंगाभिशस्त्याभिशस्तस्य॥ या
ज्ञवल्क्यः॥ अभिशस्तो मृषा कृच्छ्रं चरेदाग्नेयमेव वा॥ निर्वपेत्तु पुरोडाशं वायव्यं पशुमेव वा॥ एतदुपपात
कपरं॥ अतिपातकेषु एतेनाभिशस्तो व्याख्यात इति वासिष्ठं मासमब्भक्षणं॥ अतिपापे महापापेष्वपैव
नसी॥ अनृते नाभिशासमानः कृच्छ्रं समाः संचरेत्॥ पातकेषु महापातकेषु द्विमासं कृच्छ्रमिति॥ जातिमात्रक्ष
त्रियादिवधे तु मनुः॥ तुरीयो ब्रह्महत्यायाः क्षत्रियस्य वधे स्मृतः॥ वैश्येऽष्टमांशो वृत्तस्थे शूद्रे ज्ञेयस्तु षोडशः॥ इ
ति क्षत्रियस्य वधं कृत्वा वधं कृत्वा वधं कृत्वा चरेच्चांद्रायणं त्रयं॥ वैश्यस्य तु द्वयं कुर्याच्छूद्रस्यैकं च मेव तु॥ अ

स्मिन्नेव विषये मनूक्तानि त्रैमासिकद्वैमासिकान्युपपातकसामान्यप्रायश्चित्तानि ज्ञेयानि अकामतस्तु याज्ञव
ल्कीयं त्रिरात्रोपवाससहितमृषभैकादशगोदानं मासं पंचगव्याशनं कृच्छ्रातिकृच्छ्रौ चेति कामतः ज्ञेयम्
न चैषां सामान्यविहितत्वात् विशेषविहितैः प्रायश्चित्तैर्बाधः स्त्रीशूद्रवध इतिवत् क्षत्रियादिवधस्योपपातकत्वो
क्तेरानर्थक्यापातात् एवं सर्वेषूपपातकेषु सामान्यविशेषविहितानां व्यवस्था ज्ञेया ॥ पराशरः ॥ वैरूप्
शूद्रं क्रियायुक्तं विकर्मस्थं द्विजोत्तमं हत्वा चांद्रायणं तस्य त्रिंशद्गाश्चैव दक्षिणा इति ॥ द्विजोत्तमः पतितो विप्रः
क्षत्रियश्चेति माधवः अपि धनहर्तुः प्रेतक्रियायाः अकरणे शंखः प्रेतस्य प्रेतकार्याणि अकृत्वा धनहार
कः । वर्णानां यद्वधे प्रोक्तं व्रतं यच्च तच्चरेत् अज्ञानात् दुष्टक्षत्रियादिवधे तु संवर्तः निहत्य क्षत्रियं मोहा
त्त्रिभिः कृच्छ्रैर्विशुध्यति तथा कृच्छ्रातिकृच्छ्रौ कुर्वीत स नरो वैरूपघातकः कुर्यात् शूद्रवधे तु पादन्यूनं वैरूप
स्य क्षत्रियवधे द्विगुणं शूद्रस्य विट्क्षत्रिययोर्वधे द्विगुणं त्रिगुणं चैतदुक्तं प्राकृव्यभिचारोत्पन्नवधे तु या
ज्ञवल्क्यः चांद्रायणं चरेत्सर्वानवकृष्टान्निहत्य तु श्ववकृष्टाव्यभिचारजा ॥ हारीतः ॥ चंडालवधे संप्राप्ते राम: ॥६२॥

ब्राह्मणस्य भवेद्यदि कारयेद्द्वादशं कृच्छ्रं तप्तकृच्छ्रं भवेदिति ॥ अंगिराः ॥ सर्वांत्यजानां गमने भोजने च प्रथमा
यणे पराकेण विशुद्धिः स्यादित्यांगिरसभाषितमिति ॥ एतदज्ञानतो वधे ज्ञानतस्तु चांद्रायणमिति विज्ञानेश्व
रः ॥ विपरीतमिति तु माधवः तदाह लौगाक्षिः ॥ हंततो प्रतिलोमानां शूद्रजानां कथं भवेत् ज्ञानपूर्वे पराकः
स्यादज्ञानादैंदवं तथैवेति चांद्रायणं द्विविधमष्टधेनुकं च ॥ पराकोपि पंचधेनुकस्त्रिधेनुकश्चेति द्विविधं
तत्र ज्ञाने महतोश्चांद्रायणपराकयोर्निवेशः अल्पयोरिति युक्तयो विरोधः यत्तु मासादत्यंतदत्तो ब्राह्मण
नः अंतरप्रभवाणां तु सूतादीनां चतुर्विंशतिरिति तत्कामतो व्यासविषयं तत्र सूतस्य वधे व्यासे षण्मासा
॥ वैदेहकस्य चत्वारः चंडालस्य द्वौ मागधस्य चत्वारः क्षत्तुरायोगवयोः व्यासे षण्मासाः ॥ वैदेहकस्य चेति वि
श्वपाकचंडालयोर्वधे तु देवलः क्षीरश्वपाकचंडालो विप्रेणाभिहतो यदि अहोरात्रोषितो भूत्वा घृतं प्राश्य
विशुध्यतीति अपत्यवधे हारीतः षड्वर्षाणि राजन्ये त्रीणि वैश्ये अर्धं शूद्रे क्षत्रियवत् ब्राह्मणेषु
वैरूपवत् क्षत्रियासु स्त्रीषु वैश्यवैश्यासु शूद्रार्धमितरासु शूद्रजासु नवमासिकं इतरासु शूद्रजासु रात्रत्रयमिति

यपत्न्यागुणवत्याः कामतो वधविषयं। सपत्नमातृभगिनीदुहितृस्नुषात्मपत्न्याद्यतिप्रत्यासन्नावधविषयं
सपत्नभगिनीपितृष्वसृमातृष्वसृमातुलानीपितृव्यपत्नीभ्रातृभार्याश्वश्रूणां च द्रष्टव्यं तान्येव पादोनानि
सपिंडसगोत्राणां वधेहीनि। आसामेव श्रोत्रियपत्न्यादिगुणविशेषे तत्तत्प्रायश्चित्तद्विगुणं कल्प्यमिति
निबंधकृतः। आसामेवाकामतो वधे त्वेतदेवार्धं कल्प्यं यत्तु गौतमः। शूद्रे संवत्सरं वृषभैकादशाश्च गा दद्या
दनात्रेय्यां चैवमिति। तद्गुणविप्रमात्रपत्नीवधविषयं। मनुस्तु तातपः स्त्रीघातकृच्छ्रं षण्मासमिति तदत्रैव
कामतो द्रष्टव्यं। प्रतिलोमासु सूतानां ब्राह्मण्यादीनामकामतो वधे योगीश्वरः। दुर्वृत्तब्रह्मविट्क्षत्रशूद्रयोषाः प्रमाप्य तु
दृतिं धनुर्बस्तमविं क्रमाद्दद्याद्विशुद्धये इति। दृतिश्चर्मकोशः। बस्तश्छागः। अविर्मेषः। व्यक्तं चतुर्णामपि वर्णा
नां नारीर्हत्वानवस्थिता। शंखस्तु तपजमेषांश्च क्रमाद्दद्याद्विशुद्धय इति। अत्र शंखोक्तोऽजापेक्षया अधिक
मूल्यो ज्ञेयः। इत्यादिदाने यथाशक्ति सुवर्णमपि दक्षिणां देयेत्यपरार्के। कामतस्त्वाह ब्रह्मगर्भः। प्रतिलो
मप्रसूतानां स्त्रीणां मासी वधि स्मृताः। अंतरप्रभवानां च सूतानां च चतुर्द्विषट्। ब्राह्मणीक्षत्रियावैश्या

नां वधे क्रमेण षट् चतुर्द्विमिश्र्यं मासा इत्यर्थः। शूद्रायास्त्वेकः। अंतरप्रभवाणामिमिति व्याख्यातं। वैश्यावधे
किंचिद्देयं। वैश्यिके न किंचिदिति गौतमोक्तेः। किंचित् जलं शूद्रायामविकं वैश्यां हत्वा दद्याज्जलं नर इ
त्यांगिरसोक्तेः। परार्के तु गौतमीये चैरेपकिंचित्तद्देयमित्यर्थः कृत्वा अंगिरसे वैश्यां हत्वा जलं स्पृशेद्धितिप
वितं सहद्यानिचरितविप्रादिवधे प्रचेताः। अन्त्यस्तु मतौ ब्राह्मणहंतुः कृच्छ्रं षण्मासान्वेति क्षत्रियां ह
त्वा षण्मासान्मासत्रयं चेति वैश्यां हत्वा मासत्रयं सार्धमासं वेति शूद्रां हत्वा सार्धमासं विरीत्य हानिचेति
योगीश्वरोपि। अप्रदुष्टां स्त्रियं हत्वा शूद्रहत्याव्रतं चरेत्। शूद्रहत्याव्रतं योगीश्वरोक्तं षाण्मासिकं दशधेनुदानं वा
अत्र षाण्मासिकमज्ञानब्राह्मणीवधे ज्ञानात्क्षत्रियवधे च। ज्ञानाद्वैश्यवधे दशधेनुदानमिति विज्ञानेश्वरः।
क्वचित्तु त्वावधे प्रयोजकस्य प्रायश्चित्ताभावमप्युदयं चाहापरार्के व्यासः। अकामतस्त्रियं हत्वा ब्राह्मणी वै
रूपवच्चरेत्। कामतो द्विगुणं प्रोक्तं प्रदुष्टायां न किंचन। पुण्यान्लोकान वाप्नोति शूद्रगायस्तथान्येत्
मति ध्यामय न इं घातानि संकरकारिणी। अथ गोवधे मनुः। उपपातकसंयुक्तो गोघ्नो मासं यवान्पिबेत्

प्रा॰म॰ कृतपापोऽवसेद्गोष्ठे चर्मणा तेन संवृतः। चतुर्थकालमश्नीयादक्षारलवणं मितं। गोमूत्रेणाचरेत्स्नानं द्वौ मा
।२९। सौ नियतेंद्रियः। दिवानुगच्छेत्ता गास्तु तिष्ठन्नूर्ध्वं रजः पिबेत्। शुश्रूषित्वा नमस्कृत्वा रात्रौ वीरासनं वसे
त्। तिष्ठतीष्वनुतिष्ठेत्तु व्रजंतीष्वनुचरेत्। आसीनासु तथासीनो नियतो वीतमत्सरः। आतुरामभिशस्तां
वा चौरव्याघ्रादिभिर्भयैः। पतितां पंकलग्नां वा सर्वप्राणैर्विमोचयेत्। उष्णे वर्षति शीते वा मारुते वाति वा
भृशं। न कुर्वीतात्मनस्त्राणं गोरकृत्वा तु शक्तितः। आत्मनो यदि वान्येषां गृहे क्षेत्रेऽथ वा खले। भक्षयं
तीं न कथयेत्पिबंतं चैव वत्सकं। अनेन विधिना यस्तु गोघ्नो गामनुगच्छति। स गोहत्याकृतं पापं त्रिभिर्मा
सैर्व्यपोहति। वृषभैकादशा गास्तु दद्यात्सुचरितव्रतः। अविद्यमाने सर्वस्वं वेदविद्भ्यो निवेदयेदिति
यवान्नं गोमूत्रपक्वान्नं गोमूत्रेण यवागूं कृतामिति व्यासोक्तेः। कृतवापः सशिखं कृत्वपनः। सशिखं
वपनं कृत्वेति पराशरोक्तेः। अत्राद्येन श्लोकेनैकं व्रतमुक्तं। द्वितीयेनापरं। अवशिष्टश्लोकैस्तृतीयमपि रामः
व्रतत्रयं क्रमाच्छूद्रविट्क्षत्रविप्रस्वामिकगोवधेष्ववस्थाप्यं। विप्रस्वामिकगोवध एवानुमंत्रनुग्राह्यं कस ८३१

स्त्वात्कल्पत्वं चेति विज्ञानेश्वरादयः। तत्रावयवत्रयमेकमेव षाण्मासिकं तमिति केचित्। युक्तं चेदं। एतदेव वृ
तं कुर्युरुपपातकिनो द्विजा इति मनुवैकत्वेन परामर्षात्। तत्र कामतो गुणवद्विप्रस्वामिकगोवधविषयं याज्ञ
वल्क्यः। पंचगव्यं पिबन्गोघ्नो मासमासीत संयतः। गोष्ठेशयो गोनुगामी गोप्रदानेन शुध्यति। कृच्छ्रं चैवातिकृ
च्छ्रं च चरेद्वापि समाहितः। दद्यात्त्रिरात्रं वोपोष्य वृषभैकादशास्तु गा इति। एतच्चामनूक्तविषमण वाकामतो
ज्ञेयं। गां चेद्धन्यात्ततरः कामात्स्वर्णं समग्रशतं तथा। श्रोत्रियाय दरिद्राय दद्यात्सुदुर्मना मुन इति। यत्तु शंख
पादं तु शूद्रहत्यायामुदक्यागमने तथा। गोवधे च तथा कुर्यात्परदारगमने तथेति। तच्छ्रोत्रियकुटुंबिवि
प्रस्वामिककपिलकामीतःकृतगोवधपरं। अत एव बृहस्पतिर्गां निणा कपिलां दोग्ध्रीं हेमधेनुं च सुव्रतां
खड्गादिना घातयित्वा द्विगुणं व्रतमाचरेदिति विशिष्टायां गविशेषप्रायश्चित्तमाह। अत एव व्याम निर्णगो
गन्निणी। बालवृद्धवधेषु कृणाहानवतीति ब्रह्महत्याव्रतमतिदिष्टं। अस्मिन्नेव विषये यमः। गोसहस्रं श
तं वापि दद्यात्सुचरितव्रतः। अविमाने सर्वस्वं वेदविद्भ्यो निवेदयेदिति। गोगर्भवधे तु षड्विंशन्मतेति शेषत्क

प्रा०म०
॥४७॥

॥ पादउत्पन्नमात्रेतु द्वौ पादौ दृढतां गतः पादोनं कृच्छ्रमुद्दिष्टं हत्वा गर्भमचेतनं अंगप्रत्यंगसंपूर्णेऽचेतन समन्वि
तः समन्विते द्विगुणं गोव्रतं कुर्यादेषा गोघ्नस्य निष्कृतिरिति बृहस्पतिश्चेता एकवर्षे हते वत्से कृच्छ्रपादो वि
धीयते अबुद्धिपूर्वे पुंसः स्यात् द्विपादस्तु विहायते त्रिहायने त्रिपादः स्यात्प्राजापत्यमतः परमिति एतच्च प्रायश्चि
त्तमस्यत्वात् बुद्धिपूर्वे का धर्मसंबंधिगोवधविषयं यमः काष्ठलोष्टादिभिर्गावस्त्रैर्वा निहता यदि प्राय
श्चित्तं कथं तत्र शास्त्रे शास्त्रे विधीयते काष्ठे सांतपनं कुर्यात्प्राजापत्यं तु लोष्टके तप्तकृच्छ्रं तु पाषाणे शस्त्रे चा
प्यतिकृच्छ्रकं प्रायश्चित्ते ततश्चीर्णे कुर्याद्ब्राह्मणभोजनं त्रिंशद्गा वृषभं चैकं दद्यात्तेभ्यश्च दक्षिणामिति सं व
र्तः एकाचेद्बहुभिः काचिद्दैवाद्व्यापादिता यदि पादं पादं तु हत्याया चरेयुस्ते पृथक् पृथगिति याद्द्विध
गोधनस्यायां प्रतमुपदिष्टं तस्य पादइत्यर्थः आपस्तंबः पाषाणैर्लकुटैर्वापि शस्त्रेणान्येन वा बलात् निपा
तितं तिर्यगास्तु तत्कृच्छ्रं कुर्युर्व्रतं द्विति तथैव बर्बरजं घोरुपार्श्वे ग्रीवा द्विमोटनैरिति लकुटं दंडः स च अंगुष्ठ राम:
मात्रस्थूलस्तु बाहुमात्रप्रमाणत्रप्रमाणतः आर्द्रस्तु सपलाशश्च दंड इत्यभिधीयते इति पराशरोक्ताधिकप्रमाणो ॥ ९३२

स्यापि स्थूलविशेषे दोषहेतुमस्त्येवा पराशरः दंडादूर्ध्वं यदन्येन प्रहरायदि घातयेत् प्रायश्चित्तं तदो
क्तं द्विगुणं गोवधे चरेदिति स एव मूर्छितः पतितो वापि दंडेनाभिहतः सह उत्थितस्तु यदा गच्छेत् सं च स
प्तैव ग्रासं वा यदि गृह्णीयात्तोयं वापि पिबेद्यदि पूर्वव्याधिपसृष्टश्चेत्प्रायश्चित्तं न विद्यते इति पराश
रः रोधबंधनयोक्त्राणि घातश्चेति चतुर्विधमिति स एव गोवाटे वा गृहे वापि दुर्गेष्वथ समस्थले नदीष्वथ स
मुद्रेषु अन्येषु च नदीमुखे दग्धदेशे मृता गावस्तंनना रोध उच्यते योक्त्रदामकडोरैश्च घंटा वा भरणेन वृष
णैः गृहे वापि वने वापि बद्धः स्याज्जौर्मृतो यदि तदेव बंधनं विद्यात्कामाकामकृतं च तत् हलेवा शकटे पंक्तौ
पृष्ठे वापीडितो नरैः गोपतिर्मृत्युमाप्नोति योक्त्रो भवति तद्वधः मत्तः प्रमत्त उन्मत्तश्चेतनो वाप्यचेतनः कामा
कामकृतक्रोधो दंडैर्हन्याद्दृषोपलैः प्रहृता वा मृता वापि तद्धि हेतुर्निपातितमिति आपस्तंबः दसनेदास
से नेचैव रोधे संघातयोजने वत्सानां सकलपाते वा ग्रते पादो न माचरेत् दासनं मेढिबंधनं आपन्नानां
बहूनां तु रोधने बंधनेपि वा वाभिषज्ञि मिथ्योपचारे च द्विगुणं गोव्रतं चरेदिति व्यासः औषधं लवणं चैव पुण्य

प्रा॰मा॰
॥४१॥

र्यमपि भोजनं। अतिरिक्तं न दातव्यं काले स्वल्पं तु दापयेत्। अतिरिक्ते विपत्तिश्चेत् कृच्छ्रपादो विधीयत इति। अपवा
दमाह मनुः। औषधं तु न दोषोऽस्ति स्वेच्छयापि व्रतोपरि। अन्यथा दीयमाने तु प्रायश्चित्तं न संशय इति। ए
तस्य च निमित्तस्य तु न दोषो यथाह संवर्तः। यंत्रणे गोचिकित्सार्थे गूढगर्भविमोचने। यत्ने कृते विपत्तिः स्यान्न
स पापेन लिप्यते। यत्र गवां व्याध्यादिनिर्यातनार्थं संदंशनादि प्रवेशनं तथा दाहच्छेदशिराभेदप्रयोगैरुपकु
र्वतां द्विजानां गोहितार्थं तु प्रायश्चित्तं न विद्यत इति। पराशरोऽपि। ग्रामघाते शरौघेण वेश्मभंगे निपातिते
अतिवृष्टिहतानां च प्रायश्चित्तं न विद्यत इति। तथा। कूपखाते च धर्मार्थे गृहदाहे च या मृता। ग्रामदाहे तथा
घोरे प्रायश्चित्तं न विद्यत इति। एतच्चैतेषु बंधनादिरहितस्यैव कस्यचिद्दहनादि विषयं। इतरत्र त्वापस्तंबः। कांतारे
ष्वथ दुर्गेषु गृहदाहे खलेषु च। यदि तत्र विपत्तिः स्यात् पाद एको विधीयत इति। पराशरः। दहनात्तु विपद्येत
अनड्वान्योक्त्रयंत्रितः। उक्तं पराशरेणैव ह्येकपादं यथाविधीति। बलच्छलादिनान्येन कारिते रोधादौ त्वाप ॥ रामः
स्तंबः। पादमेकं चरेद्रोधे द्वौ पादौ बंधने चरेत्। योजने पादहीनं स्याच्चरेत् सर्वं निपातने इति। पराशरः। गवां बं ८३२

धनयोक्त्रैस्तु भवेन्मृत्युरकामतः। अकामकृतपापस्य प्राजापत्यं विनिर्दिशेत्। प्रायश्चित्ते ततश्चीर्णे कुर्या
द्ब्राह्मणभोजनं। अनडुत्सहितां गां च दद्याद्विप्राय दक्षिणामिति व्यासः। कंठाभरणदोषेण विपत्तिर्यत्र गोर्भ
वेत्। गोघ्नार्द्धं तु चरेत्तत्र भूषणार्थे हि तत्स्मृतमिति। आपस्तंबेनातिदाहादौ विशेष उक्तः। अतिदाहातिवा
हाभ्यां नासिकाछेदने तथा। नदीपर्वतसंरोधे मृते पादोनमाचरेत्। अत्रापवादमाह पराशरः। अति
दाहे चरेत्पादं द्वौ पादौ वाहने चरेत्। नासिक्ये पादहीनं तु चरेत्सर्वं निपातन इति। नासाभेदनदोहेषु
कर्मछेदनबंधने। अतिदोहातिवाहाभ्यां कृच्छ्रं चांद्रायणं चरेदिति। तत्कपिलत्वाद्यनेकगुणवद्विषय
मिति। स्वामिनो गोरुपेक्षणे प्रायश्चित्तमाह व्यासः। जले पंकपल्वले मग्ना मेघविद्युद्धतापि वा। श्वभ्रे वा पति
ता कस्माच्छ्वापदेनापि न हता। प्राजापत्यं चरेत्कृच्छ्रं गोस्वामी व्रतमुत्तमं। शीतवातस्य उद्बंधन मृतापि वा
अस्नागार उपेक्षायां प्राजापत्यं विनिर्दिशेदिति। स्वामीति पालस्याप्युपलक्षणं। सत्कार्यांतरवैयग्र्यादुपे
क्षायां त्वर्द्धं व्रतस्य विज्ञेयं। पल्वले घर्मगव्याघ्रश्वापदादिनिपातने। श्वभ्रप्रपातसर्पाद्यैर्मृते कृच्छ्रार्द्धमा

प्रा॰म॰ ॥४२ चरेदिति। अत एव अपालनात्तु कृच्छ्रं स्याद्धुत्वागारउपप्लवइत्यनेनतेवानैवोपेक्षायां प्राजापत्यमुक्तं। आ
पस्तंब:। अस्थिभंगं गवां कृत्वा लांगुलच्छेदनं तथा पाटने दंतभंगे च मासार्द्धं तु यवान्पिबेदिति। एतत्काम्त
:। अकामतस्तु अंगिरा:। शृंगभंगेस्थिभंगे वा चर्मनिर्मोचने पि वा। दशरात्रं पिबेद्वत्सं सुस्था यदि
गौर्भवेदिति पराशर:। पाषाणेनैव दंडेन गावो येनाभिघातिता:। शृंगभंगे चरेत्पादं द्वौ पादौ नेत्रघात
ने। लांगूलच्छेदे पादकृच्छ्रं तु द्वौ पादावस्थिभंजने त्रिपादं चैकरौन्तु चरेत्सर्वं निपातने इति। स एव शृंगभंगे
स्थितं भंगे कटिभंगे तथैव च। अदिजीवति षण्मासान्प्रायश्चित्तं न विद्यत इति। व्यास:। यवसं चोपहर्तव्यं
यावद्दोहेत तत्पुनः। संपूर्णो दक्षिणां दद्यात्ततः पापात्प्रमुच्यते। पराशर:। यद्यसंपूर्णसर्वांगो हीनदेहो भवे
त्तदा। गोघातकस्य तस्य तस्यार्द्धं प्रायश्चित्तं विनिर्दिशेत्। स एव। प्रेरयेत्कूपवाप्यासु वृक्षच्छेदेषु पातयेन्
गवाशनेषु विक्रीतस्ततः प्राप्नोति किल्बिषमिति। कूपवाप्यादिनिम्नेषु पातनार्थं वृक्षच्छेदनादिदुर्गमेषु रामः
नष्टगमनार्थं प्रेरणे। गोमांसाशनहस्ते गोविक्रये च गोवधपापमित्यर्थ:। स एव। गोवृषाणां विपत्तौ च यावं ॥८३४

त: प्रेक्षकाजना:। अनिवारयतां तेषां सर्वेषां पातकं भवेत्। संभावितागोपततदेशे स्वोपभोगार्थं कूपादिख
नने दोषमाह स एव। वेश्मद्वारनिवासेषु यो नर: खातुमिच्छति स्वकार्यगृहखातेषु प्रायश्चित्तं विनिर्दिशेत्
स्वकार्यपदार्द्धनार्थेन दोष:। तथा च स एव। कूपखाते तडागे च दीर्घखाते तथैव च। अन्येषु धर्मखाते
षु प्रायश्चित्तं न विद्यत इति। दीर्घखातं वाप्यादि। अत्र स्वयमेव जलार्थं गते मृते च न दोष इत्याह स एव
कूपखाते तटाबंधे नदीबंधे प्रपासु च। पानीयेषु विपन्नानां प्रायश्चित्तं न विद्यते। स एव। निशिबंधनरुद्धे नि
द्धेषु सर्पव्याघ्रहतेषु च। अग्निविद्युद्विपन्नानां प्रायश्चित्तं न विद्यते स एव। निशिबंधनिरुद्धेषु इति। एत
च्च हिताय विहितरज्जुबंधने यं अपरार्के व्यास:। अथात्र चेद्भवे छेकासायं गोर्गोपुनेम्रते। गोमूत्रेण तु
संमिश्रं त्रिरात्रं यावकं पिबेदिति। एतन्निषिद्धरज्जुबंधनपरं। रज्जुविधिनिषेधौ प्राग्दर्शितौ। न नारिकेल
न च शाणवल्कलैर्न चापि मौंजेन नव स्त्रश्टंखलै:। एतैस्तु गावो न निबंधनीया बद्धा तु तिष्ठेत्परशुं गृ
हीत्वा। अन्यगोवधे विशेषमाह मनु:। यो यस्य हिंस्याद्द्रव्याणि ज्ञानतो पि वा। स तस्योत्पादयेत्तुष्टिं राज्ञे दद्याच्च

प्राय.
॥४२ तत्सम पराशरः। प्रमापणे प्राणभृतां दद्यात्तत्प्रतिरूपकं। तस्यानुरूपं मूल्यं वा दद्यादित्यब्रवीद्यमः। ब्रा
स्ते आदौ गोपतये दत्वा गोमूल्यं माधुकल्पितमिति। एतानि च सर्वाणि प्रायश्चित्तानि वृषवधेऽपि भवंति
निमित्तवाक्ये गवामनुवादेन तज्जात्या लिंगस्याविवक्षितत्वात्। गोसहस्रं शतं वा पीत्यादौ लिंगविशेषनि
र्देशेनावपिंनागवानामेव। तासां दुग्धादिक्रियाप्रकारकत्वात्। अतएव गोष्वाच्यतरश्चेत्तत्र गोलिंगविशे
षानिर्देशेऽपि तस्य द्वादशशतं दक्षिणेति तत्र षष्ठ्येनाभ्यादीत्तिरस्कृत्य गोपरामर्श इव स्त्रिया एवास्याग्रहणेव
त्युपकारकत्वमेव निदानमिति भाति। अन्यथा तत्र वृषाणामपि दानमापद्येतेति दिक्। याज्ञवल्क्यः। गजेनी
लवृषाः पंचशुक्लोवृक्षोऽदितापयत्स्याजमेषेष्टौ पुंषोद्रयः क्रौंचे त्रिहायनः। मनुः। वासो दद्याद्धयं हत्वा पंचनी
लवृषान्गजं। अजमेषावनड्वाहं खरं हत्वैकहायनमिति। एतानि प्रायश्चित्तानि धनिकविषयाणि। निर्ध
नस्य तु जाबालिः। हस्तिनं तुरगं हत्वा महिषं गां तथैव च। कृच्छ्रमातपनं कुर्याज्जातकन्यान्न तेषु च। विष्णु राम:
। हस्तिनं तुरगं हत्वा महिषोष्ट्रकपीस्तथा। एषु सर्वेषु कुर्वीत सत्रिरात्रमभोजनं। इदमायासविषयं। अस्मि ॥८२५

न्नेव विषये सिंहं हत्वा चतुरंगाश्वमृगखड्गरुरुषिपान्हत्वा सांतापनं कुर्याज्जोत्रकन्यान्नतेषु च। सुमंतुः। वा
नरसिंहमार्जारमंडूकम्हखरकश्ववधे प्राजापत्यमिति। पराशरः। हत्वा मूषकमार्जारसर्पाजगरडुंडुभान्
कृसरं भोजयेद्विप्रान्लोहदंडं च दक्षिणेति। विष्णुः। हत्वा मूषकमार्जारनकुलमंडूकडुंडुभाजगराणामन्यतमं
कृसरान्नं भोजयित्वा लोहदंडं दक्षिणां दद्यात्। यत्तु शंखः। हत्वा द्विजस्तथा सर्पं विशेषाद्यजलेशयौ सप्तरात्र
तथा कुर्याद्व्रतं ब्रह्मवधे तु यत् इति। तत्काकृते पत्नीशानी खरमार्जारमंडूकसर्पाजगरमूषकान्। हत्वा कृ
च्छ्रं द्वादशरात्रं चरेत्किंचिद्दद्यादिति तदकामाभ्यासे विष्णुनाभ्यनं हत्वा त्रिरात्रमुपवसेदिति। यत्तु माधवी
ये पैठीनसि काकोलूककंककृकलासकर्करखरवकमंडूकगोलनासवार्हणमूषकचक्रवाद्हंसप्लवनकुलनलम
डूकबिडालश्ववधे एतेषामेककस्मिन्वधे शूद्रवधवद्विहितमिति तत्कामतोऽत्यंताभ्यासविषयं। मनुः। हत्वा वा
नरं श्येनभासौ च स्पर्शयेद्यो ब्राह्मणाय गां क्रव्यादस्तु मृगान्हत्वा धेनुं दद्यात्पयस्विनीं। अक्रव्यादो वत्सतरीमुष्ट्रं
हत्वा तु कृष्णलं। स एव अश्विनिकाल्पयिसीदद्यात्सर्पं हत्वा द्विजो मः। पलालभारकं षंडे सीसकं चैव माषकं ति

ग्रा.म.
॥४४॥

त्रिरौतु तिलद्रौणं गवादीनामवाप्नुवन्। दानं दातुं चरेत्कृच्छ्रमेकैकस्य विशुद्धये प्रत्येकं प्राजापत्यं कुर्यादि-
ति केचित्। विज्ञानेश्वरस्तु। हत्वाहोरात्राइति कालो। एतान्येवानादेशे विकल्पेन क्रियेरन्नेनमिति गुरुणि गुरूणि
लघुनि लघूनि इति गोत्रमीकानि तानि दानतारतम्येन व्यवस्थाप्यानीत्याह याज्ञवल्क्यः। उरगेष्वायसों दंडः पं-
डके त्रपुसीसकं कोले घृतघटो देय उष्ट्रे गुंजा हयेंऽशुकं कोलः सूकरः पंडकः श्वन्मा पक्षिसमन्विया।
हारत्वस्त्वेवं न तु गोविन्द्राहिः तन्न तु तद्वधनिमित्तमेऽवज्ञशुप्रायश्चित्तं नोक्तं। तज्जातिप्रायश्चित्ताय पंडकवध
एवैतत्प्रायश्चित्तमिति प्रतिभाति। कल्पः। मृगमहिषवराहकुंजराणां उष्ट्रशरभतरक्षुवानरसिंहव्याघ्रवृषश-
रटशल्यकादीनामन्येषां च वधेहोरात्रोपितस्थीर्णं तिद्यतं दद्यात्। व्यासः। सर्वांश्च प्राणिनः स्थूलान्मंडूक-
नकुलेषु हरिति इदमज्ञानतः सकृद्वधे ज्ञानतस्तु याज्ञवल्क्यः। मार्जारगोधानकुलमंडूकश्वपतत्रिणः
ः हत्वा त्र्यहं पिबेत्क्षीरं कृच्छ्रं वा पादिकं चरेत्। विष्णुः। गोधोलूककाकवधे त्रिरात्रमुपवसेत्। व्यासः। सूक- राम:
रोष्ट्रखरान्हत्वा त्र्यहमेतत्कृच्छ्रं चरेत्। यत्तु वसिष्ठः। खरमंडूकमार्जारनकुलसर्पदहरमूषकान्हत्वा कृच्छ्रं ६६

द्वादशरात्रं चरेत् तदकामतोभ्यासविषयं दहरोल्पमूषकः। यत्तु मनुः। मार्जारनकुलं हत्वा चाषं मंडूकमेव
वच श्वगोधोलूककाकांश्च शूद्रहत्याव्रतं चरेत्। शूद्रहत्याव्रतं षाण्मासिकं। पिबेत्पयः त्रिरात्रं वा योजनं वा
ध्वनो व्रजेत्। उपस्पृशेत्स्रवंत्यां वा सूक्तं वाब्दैवतं जपेत्। पराशरः। बककाककपोतानां सारीतित्तिरिघा-
तकः। अंतर्जले उभे संध्ये प्राणायामेन शुध्यति। रक्तः पक्षिविशेषः। संध्ये इत्यत्यंतसंयोगे द्वितीया। अतो
यावद्भिः प्राणायामैः संध्याद्वयं समाप्यते तावतः कुर्यात्। प्राणायामेनेत्येकवचनमविवक्षितं इति माध-
वः। इदमकामतः सकृद्वधे स एव। कारंडवचकोराणां पिंगलाकुररस्य च। भारद्वाजादिकं हत्वा
शिवं पूजा विशुध्यति। पराशरः। भारुंडं चाषभासांश्च पारावतकसारिकां। गृध्रं श्येनमुलूकं च तथा पारा-
वतानपि। टिट्टिभं जालपादं च मद्गुं कुक्कुटमेव च। एवं चिद्विषु सर्वेषु दिनमेकमभोजनं। यदपि पराश-
रः। क्रौंचसारसहंसांश्च चक्रवाकं च कुक्कुटं। जालपादं च शरभमहोरात्रेण शुध्यति। यदपि स एव
गृध्रश्येनशशादानामुलूकस्य च घातकः। अपक्वाशी दिनं तिष्ठेत्त्रिकालं मारुताशनः इति तत्कामकृ-

प्रा॰म॰

॥४५॥

त्ववध परं। यत्तु संवर्त्तः। हंसं वकं बलाकां च मद्गुं वा विधं बर्हिणं तथा। सारसं चाषभासं च हत्वा त्रीन् दिवसा
न्नक्षिपेदिति तदभ्यासपरमिति माधवः। पक्षिषु अंगिराः। काकोलूके च गृध्रे च टिट्टिभे खंजरीटके। श्येनभासे च हत्वा
ग्निं वहत्वा भगवानंगिराब्रवीदिति तत्कामतोत्यंताभ्यासपरं। अतिधनिकस्य तिर्यग्दोषे विशेषमाह म
नुः। घृतकुंभं वराहं तु तिलद्रोणं तु तित्तिरौ। शुकं द्विहायनं वत्सं क्रौंचं हत्वा त्रिहायनं। धनिकस्य कामतो
बलाकादिवधे माधवीये कश्यपः। बकबलाकाहंससारसकलविंककपोतपारावतादीनां वधे प्रायश्चि
त्तमहोरात्रोषितः सर्वबीजानि च दद्यादिति। धनिकस्याकामतो वधाभ्यासे तु याज्ञवल्क्यः। हंसश्येनक
पिक्रव्याज्जलस्थलशिखंडिनः। भासं हत्वा तु दद्याद्गामक्रव्यादस्तु वत्सिकां। जलचरशब्देन कादयः
स्थलशब्देन बलाकादय इति मिताक्षरायां। याज्ञवल्क्यः। किंचित्सास्थिवधे देयं प्राणायामस्त्वनस्थिक
इति किंचिदष्टमुष्टिधान्यं मनुः। अस्थन्वतां तु सत्वानां सहस्रस्य प्रमापणे। पूर्णे चानस्यनस्थां तु शूद्रह
त्याव्रतं चरेदिति। शूद्रहत्याव्रतं षाण्मासिकं। अथात्मघाते यमः। जलाग्न्युद्बंधनभ्रष्टाः प्रव्रज्यानाश

राम॰

॥६३७॥

कच्युताः। विषप्रपतनप्रायः शस्त्रघातहताश्च ये। नैवैते प्रत्यवसिताः सर्वलोकबहिष्कृताः। चांद्रायणेन शुध्यं
ति तप्तकृच्छ्रद्वयेन चेति। आत्मघातिपुत्रादिस्तु तज्जायवधप्रायश्चित्तसमुच्चितमेतत्कुर्यात्। मरणमध्यवस्यनि
वृत्ते तु वसिष्ठः। आत्महननाध्यवसायेजीवन्नात्मत्यागी कृच्छ्रं द्वादशरात्रं चरेत् त्रिरात्रं चोपवसेदिति। एतद
भ्याध्यवसाये। अग्निपातादिवध्यवसाये तु पराशरः। जलाग्निपतने चैव प्रव्रज्यानाशनेषु च। प्रत्यावसि
तवर्णानां कथं शुद्धिर्विधीयते। प्राजापत्यद्वयेनैव तीर्थाभिगमनेन च। वृषैकादशदानेन वर्णाः शुध्यंति तेत्र
यः। ब्राह्मणस्य प्रवक्ष्यामि वनं गत्वा चतुष्पथे। सशिखं वपनं कृत्वा प्राजापत्यद्वयं चरेत्। गोद्वयं दक्षिणां
दद्याच्छुद्धिं पाराशरोब्रवीत्। मुच्यते तेन पापेन ब्राह्मणत्वं च गच्छतीति। अध्यवसायावस्थोंऽगिराः। यः प्र
त्यवसितो विप्रः प्रव्रज्याग्निजलादिभिः। अनाशकनिवृत्तश्च गृहस्थत्वं चिकीर्षति। चारयेत्त्रीणि कृच्छ्राणि
त्रीणि चांद्रायणानि तु जातकर्मादिभिः प्रोक्तैः पुनः संस्कारमर्हतीति। वैधमरणमध्यवसायत्यजतां तु प
राशरः। जलाग्निपतनैश्चैव प्रव्रज्यानाशनेन तया। अध्यवस्य निवृत्तानां प्रायश्चित्तं कथं भवेत्। ब्राह्मणा

प्रा॰म॰

।४६।

नाप्यसारेन तीर्थानुमरणे न च। गवां च शतदानेन वर्णाः शुध्यंति॰ तेन्यथा। ब्राह्मणस्य प्रवक्ष्यामि गत्वारण्यं च
तुष्पथं। सशिखं वपनं कृत्वा त्रिसंध्यमवगाहनं। गायत्र्यष्टसहस्रं तु जपेद्वै वै दिने दिने। मुच्यते सर्व
पापेभ्यो ब्राह्मणत्वं च गच्छति। भिक्षार्थी प्रविशेद्ग्रामं गृहान्सप्त वने वसन्। धौतन्निर्झां समश्नीयात्तद्द्व
ईन विशुध्यतीति। अनुगमनान्निवृत्तौ त्वापस्तंबः। चितिभ्रष्टा तु या नारी मोहात्प्रचलिता ततः। प्राजा
पत्येन शुध्येत्तस्माद्वै पापकर्मणः इति। आत्मघाते द्वितक्रियायां तु वसिष्ठः। य आत्मा आत्मघातिनः कु
र्यात्स्नेहाग्नेतक्रियां नरः। स तप्तकृच्छ्रसहितं चरेच्चांद्रायणव्रतं ज्रह्मना। प्रायो नानाकल्पान्यपि विषोद्बं
धनतोयदकाकाष्ठाद्यैश्चात्मनो हंतुं त्वं पद्मलसरीसृपैः। शृंगीदंष्ट्रिम्लेच्छचांडालविद्युताभिहतस्य च तथा
सकरजातस्य नाशौचोदकवन्हयः। तत्स्पर्शे यदि वाक्रोशो दिनमेकमभोजनं। अज्ञाना द्वहनादौ तु कृ
च्छ्रः सांतपनः स्मृतः। बुद्धिपूर्वे पुनस्तस्य कृच्छ्रो गोमूत्रयावकः। तप्तकृच्छ्रोपि वा शक्तौ मासं चांद्रायणेन पि वा रामः
कृत्वा च वहनादीनि प्रायश्चित्तमकुर्वतां मृत मृतकृच्छ्रद्वया बुद्धिरेकरेवानुयायिनां। आत्मघातिनिमि ९३६॥

त्ते न प्रायश्चित्तमकुर्वतं। आत्मघातित्वादीनामित्यर्थः। च्यवनः। आत्मघातकस्पर्शे न वहनदहने तप्त
कृच्छ्रं चरेद्दिशाति गावो दक्षिणा ब्राह्मणेभ्य इति। पराशरः। चांडालेन श्वपाकेन गोभिर्विप्रैर्हतो यदि। आहिता
ग्निर्हतो विप्रो विषेणापि हतोपि वा। लौकिकाग्निना सदग्ध्यो मंत्रसंस्कारवर्जितं। स्पृष्ट्वा च वोढा
च सपिंडेषु च तस्य यः। प्राजापत्यं चरेत्सम्यक् द्विजाणामनुशासनं। दग्ध्वास्थीनि पुनर्गृह्य क्षीरैः प्रक्षाल
येद्बुधः। स्वाग्निभिः पुनर्दहेत्स्वमंत्रेण पृथक्पृथक्। एतद्बुद्धिपूर्वे आत्मघाते। प्रायो नानाल्पविषोद
कोद्बंधनप्रपतनैश्छेच्छतामिति गौतमोक्तेः। अयाप्रमत्तौ तु विष्णुः स्म्मरणे। चंडालगोब्राह्मणाग्नि
पशुदंष्ट्रिसरीसृपैः। प्रमादान्मरणे चांद्रं तप्तकृच्छ्रमथापि वा। स्मृत्यर्थसारे तु। तप्तकृच्छ्रद्वयं पंचदशक
च्छ्राणि वा कृत्वा दाहादि कार्यमिति। अंगिराः। श्वपाकश्चित्प्रमादेन म्रियते मुदकाग्निभिः। तस्याशौचं प्रकुर्वीत
कर्तव्या चोदकक्रियेति। ऊर्ध्वोच्छिष्टोऽधउच्छिष्टोभयोच्छिष्टे तथैव च। अस्पृश्यास्पर्शमरणे खट्वादौ मरणे तथा श्वान
क्रव्यादसंस्पर्शे कृमीकीटोद्भवोपि च। एतद्दोषानुसारेण प्रायश्चित्तं समाचरेत्। कृच्छ्रान्त्रिषट्पंचत्र

ग्रान्चांद्रायणमपापिबेति। शातातपः कृच्छ्रेत्यब्रवस्तु। अथ पर्युषितस्य बदाहे। मालवः। दिवा वायदि वा रा-
त्रौ शावस्तिष्टेति कर्हिचित्। तत्पर्युषितमित्याकुर्दहनेतस्य का गतिः। पंचगव्येन संस्नाप्य प्राजापत्य
त्रयं चरेत्। द्विजस्पृष्टं नेतानुगमे विष्णुः। द्विजः शूद्रप्रेतानुगमनं कृत्वा स्रवंतीमासाद्य तन्निमग्नस्त्रिरघ
मर्षणं जप्त्वोत्तीर्य गायत्र्यष्टसहस्रं जपेदिति। अथ सुरापाने सुरा पैष्टी च सुरा वै मलमन्नानां पाप्मा च म
लमुच्यते। तस्माद्ब्राह्मणराजन्यौ वैश्यश्च न सुरां पिबेदिति मनूक्तेः। गौडी पैष्टी च माध्वी च विज्ञेया त्रिविधा सु
रा। यथैवैका तथा सर्वा न पातव्या द्विजोत्तमैरिति तु तदुक्तिः समदोषतयेतरनिंदार्थं। अत एव भविष्ये सुरा तु
सुरा तु पैष्टी विज्ञेया न तस्यास्त्वितरे समे इति। पुलस्त्योऽपि। पानसं द्राक्षमाधूकं खार्जूरं तालमैक्षवं मा
ध्वीकं सैरमारिष्टं मैरेयं नारिकेलजं। समानानि विजानीयान्मद्यान्येकादशैव तु। द्वादशं तु सुरामद्यं सर्वे-
षामधमं स्मृतमिति। द्वादशापि मद्यानि विप्रस्य निषिद्धानि नित्यं मद्यं ब्राह्मणो वर्जयेदिति
स्मृतेः। सुरा तु क्षत्रियविशोरपि। पूर्वोक्तमनूक्तेः। तत्र सुरापाने प्रायश्चित्तमाह याज्ञवल्क्यः। बाल

वासा जटी वापि ब्रह्महत्याव्रतं चरेदिति। तच्च द्वादशाब्दं। आपस्तंबोंतरमासमेव पिण्याकं वा कणान्वापिब
न्नयेत्तु समानि त्रि समाः स्मृतः। कणान्वा भक्षयेदब्दं पिण्याकं वा सकृन्निशि इति मनूक्तेः। व्यवहारार्थमेव
तत्तु परलोकायेति वा पराकें। केचित्तु भक्षयेत्त्रितमा इति पेठुः। मानवं तु व्रतांतरमेवेत्याहुः। परे समा
नित्रिति तु बहुवचनांतं पेठुः। तत्र कपिंजलाधिकरणन्यायेनाब्दत्रये सुवृत्तिमानवीये एकवचने तु तान्य
भिप्रायेणेत्याहुः। इदं तु दुर्बलेन मतियुक्ते। एतदेव व्रतं ऊर्ध्वमपि पञ्च दुर्बलेन कृते। पंचगव्यं च तस्योक्तं पवि
त्रं कायशोधनमिति व्यासोक्तेः। गौडी माध्वी सकृत्पाने येतदेवेति ज्ञानेश्वरः। यत्तु पंचमहापापिनस्त्वाश्च
पत्तं वः चतुर्थकालमितभोजिनोऽपोऽभ्युपेयात्स्थानासनाभ्यां विहरन्त्रिर्निर्वर्षे पापमपनुदंतीति पुरश्चय
मः। बृहस्पतिसवेनेष्ट्वा सुरापो ब्राह्मणः पुनः समत्वं ब्राह्मणैर्गच्छेदित्येषा वैदिकी श्रुतिः। भूमिप्रदानं यः कु
र्यात्सुरां पीत्वा द्विजोत्तमः। पुनर्न च पिबेत्तां तु संस्कृतः स विशुध्यतीति तानि याज्ञवल्क्यः। यच्चैवार्षिकसमान
विषयाणीति विज्ञानेश्वरः। यत्तु भविष्ये अकामतः सुरां पीत्वा पापी शंसत्कुलंनं दून कृच्छ्रातिकृच्छ्रौ कृत्वैव पु

प्रा·म·

॥४८॥ न संस्कारतः शुचिः। करणत्वाभावाज्ञ्येहृद्यपि एकं वा सह च निशीतितत् सुरामत्रापनये यदेगार्थ्यं पानविष-
यतया चतत्रैव तद्यास्मिन्नेव विषये वा सिषेपरिकीर्तितं। यदि रोगे नैवेहुशीनेतरस्य कदाचन। हृच्छ्रा-
नसुराश्चैष्टतत्तस्मैव उदाहृत। यमनुमनुः। अज्ञानाद्वारुणीं पीत्वा संस्कारेणैव शुध्यति। मतिपूर्वमतिर्दि-
ष्टं प्राणान्तिकमिति स्थितिः स्थितिरिति। तत्र वारुणीपदं पैष्ट्यै। उत्तरार्धे प्राणान्तिकनिर्देशात्। पूर्वोर्द्धेतु
रोगि परमेव। अन्नसंस्कारमात्रमेव प्रायश्चित्तमिति केचित्। तत्र। अज्ञानाद्वारुणीं पीत्वा संस्कारेणैव शुध्य-
ति। तत्सहकृच्छ्रान्वितेनेहकेवलेन विशुध्यतीति। न विष्णोक्तेः। अज्ञानाद्दैषधार्थमेतदेव बृहस्पतिः। गौ-
डीमाध्वीतथा पैष्टीं पीत्वा विप्रः समाचरेत्। तप्तकृच्छ्रं पराकं च चान्द्रायणमनुक्रमादिति। ज्ञानादज्ञानतश्च
पानसा हिमघपा यानान्यासेकमाद्वयोर्व्रतयोरा दृत्तिमाह यमः। गौघ्नेहिति: कल्पार्थो चान्द्रायणमथा-
पिबा अनभ्यासे तयोर्ऋत्वयस्ततः शुद्धिमवाप्नुयात्। कामतः सकृत्पाने पराशरः। मद्यपश्च द्विजः कुर्यान्नदीं गत्वा राम:
समुद्रगां। चान्द्रायणे ततश्चीर्णे कुर्याद्ब्राह्मणभोजनं। अनडुत्सहितां गां च दद्याद्विप्रेषु दक्षिणां। इदं च गवां। ॥५०॥

धिकं शक्तंप्रति। अज्ञानतः सकृत्पानेतु विष्णु बृहस्पती। पीत्वा प्रमादतो मद्यमतिकृच्छ्रं चरेद्द्विजः। कार-
येत्तस्य संस्कारं न सावित्रीं च भोजयेत्। पराशरः। प्रक्षेहलुटं करवर्ज्यं पानसादेष्ययोरसः। सद्योजात-
स्कृतं पीत्वा अन्यहाच्छुद्धे द्विजोत्तमा। इदं तु त्रिरात्रं पाशादिरसानां मादकत्वे एव द्रष्टव्यं। अन्यथा सद्योजा-
तेक्षुरसाहात्र पिप्यात्। सुरासंस्पृष्टस्य व्यस्याज्ञानतो भक्षणे आह मनुः। अज्ञानात्प्राश्य विण्मूत्रं सुरा-
संस्पृष्टमेव च। पुनः संस्कारमर्हन्ति त्रयो वर्णा द्विजातय इति पुनः संस्कारश्च पुनरुपनयनमिति निबंध-
कृतः। तस्य विधिरुक्तः संस्कारमयूखे। यत्तु सुमंतुः। ब्राह्मणस्य सुरापस्य षण्मासांस्तु घृतसमुद्रोदक-
स्तोनं सावित्र्यष्टमहस्र जुहुयात्ससप्त त्रिरात्रं मुपवासः सह कृच्छ्रेण पूतो भवतीति त्रैवार्षिकविषयं का-
मतः सकृत्सुरापानो याज्ञवल्क्यः। सुरां बुघृतगोमूत्रपयसाम् अग्निसन्निभं। सुरापोन्यतमं पीत्वा मरणाच्छु-
द्धिमृच्छतीति। यत्तु वसिष्ठः। अभ्यासे तु सुराया अग्निवर्णां सुरां पिबेदिति तदकामपरं। गौडीमध्वोर्मत्सा-
भ्यासे मत्या वा सांतान्यासे तु माधवीयेत्यासः। मत्या मद्यमत्या वा पुनःपीत्वा द्विजोत्तमः। ततोग्निवर्णां

श्राम॰ पीत्वामृतमुद्धोत्स विलिपात् । स्पृष्ट्वा न स्नानस्पर्शे । विस्मः । अभोज्यानामपेयानां मद्यस्पर्शे च नक्षणे ब्र
॥धर्म॥ ह्मपादं विसुमपर्णचरेत्सुः शिशुरो धनां इदंत्वज्ञानात्म बृहस्पते । ज्ञानतस्तु संवर्तः । अभोज्यभोजनं कृत्वा
ब्राह्मणस्तु विशांगतः । गोमूत्रयावकाहारः सप्तरात्रेण शुध्यति । अभ्यासे तु बृहस्पतिः । अमेध्यानाम
पेयानामपेयानामभक्ष्याणां च भक्षणे रेतोमूत्रपुरीषाणां शुद्धैचांद्रायणं चरेदिति । त्रि । इति विगोतम
त्रैतमारवून्नं गादिरव्यविषेतु अपरार्के मिराक्षणः । शिष्टानां शिष्टेति यत्किंचिदन्नमूलफलादिकं तत्तांभोज्यं
द्विजातीनां तु स्का चोपवसेदहरिति । अपविशेषत । तत्र जातितो दुष्टे पलांड्वादौ अज्ञानात्सते ह्युक्ते
बृहस्पतिः । लशुनं कवकं चैव पलांडुं गृंजनं तथा । चत्वार्यज्ञानतो जग्ध्वा तप्तकृच्छ्रं चरेद्द्विजः इति जानत
स्तु याज्ञवल्क्यः । पलांडुं विड्वराहं च छत्राकं ग्रामकुक्कुटं । लशुनं गृंजनं चैव जग्ध्वा चांद्रायणं चरेत् । गृंज
नं लशुनतुल्यः कंद इति विज्ञानेश्वरः । पदीयं चूर्णोगायकाः कंठशुद्धौ विटाश्च मद्यार्थमश्नंति स पत्र वि राम॰
शेष इति माधवः । विषदग्धेन शल्येन यो मृगः परिहन्यते । अमत्या तस्य तन्मांसे तद्धि गृंजनमिष्यत इ ॥९४१॥

ति अपरार्के । यत्तु हेमाद्रिमाधवकौ वैगाजरा रक्तं मूलमिति तन्न दे माडावेव गृंजनं तु किंयां चुक्रे गाजरं
प्रीति कांत ऐति ब्रास्ले छप्पद्विर्दर्शात् । शातातपः । लशुनं गृंजनं जग्ध्वा पलांडुं च तथा शुनीमितुल्का
उपायनं पुनः कुर्यान्महलच्छु चरेन्मुकूरिति । चांद्रायणानुवृत्तौ विज्ञ । लशुन पलांडु गृंजनं विड्वराह ग्राम
कुक्कुट वनरगोमांस भक्षणे सर्वेषु तेषु द्विजातीनां प्रायश्चित्तांते पुनः संस्कारं कुर्यादिति । यत्तु मनुः । छत्राकं वि
ड्वराहं च लशुनं ग्रामकुक्कुटं । पलांडुं गृंजनं चैव मत्या जग्ध्वा पतेन्नरः । अमत्यैतानि षड्जग्ध्वा कृच्छ्रं सांतपनं च
रेत् । यतिचांद्रायणं वापि शेषेषूपवसेदहरिति । अत्र कामतोऽभ्यासे पतनं । अज्ञानतश्चैषधार्थमेव ज्ञा
नतः । सिद्ध ज्ञानतोऽभ्यासे च चांद्रायणं पलांड्वाद्येकनाद्युपरोगे तु नैव दोषः । तथा च पलांड्वाद्यनुवृत्तौ सुमंतु
एतान्येवातुरस्य निषिद्धा याया मप्रतिषिद्धानीति । चतुर्विंशतिमते लशुनं गृंजनं चैव वटएराजवृतं तथा
उंजां चैव द्विजो जग्ध्वा चरेच्चांद्रायणं व्रतमिति । तएरास्ता । उंलीपलांडुः । पराशरः । पीयूषं श्वेतलशुनं
वृंताकं फलगृंजनं । पलांडुं वृक्षनिर्यासं देवस्वं कवकानि च । उष्ट्रीक्षीरमविक्षीरमज्ञानाद्भुंजते द्विजः । सत्रि

प्रा॰म॰
॥ ५० ॥ रात्रोपवासेन पंचगव्येन शुध्यति। पीयूषमचिरप्रसूतायाः गोः क्षीरं। सुमंतुः। लशुनं पलांडुं गृंजनं भक्षणे सावित्र्य
ष्टसहस्रेण मूर्ध्नि संपातान्नयेदिति। एतत्सुरवप्रचिरामात्रपरं तादृशायां स्मृतिः। नालिकाशणछत्राककु
सुंभालाबुविड्भवान् कुंभीककेषु तंताकको विदारांश्च वर्जयेत् तथा कालशूद्रानिपुष्पाणि च फलानि च
विकारवत्यात्किंचित्प्रयत्नेन विवर्जयेत् इतितथा वटप्लक्षाश्वत्थदधित्थनीपकदंबमातुलुंगफलानि वर्ज
येत् यमः तंडुलकं कुंभीकं वृत्ताकं प्रभवांस्तथा एतेषां भक्षणं कृत्वा प्राजापत्यव्रतं चरेदिति कामतोभ्यासे
तु त्र्यहः यमः नालिकानालिकेरौ श्लेष्मातकफलानि च खट्वावार्त्ताककुंभीकवृतत्रप्रभवांस्तथा कू
ष्मांडं शिग्रुकं चैव कुसुंभं कंचकानि च एतेषां भक्षणं कृत्वा चरेच्चांद्रायणं द्विजः द्विजपराशूद्रादेयनिषे
धः आपस्तंबः भक्षयेद्यदि नीवारं तु ग्रामादाकृष्टमेण क्वचित् चांद्रायणेन शुद्धिः स्यादापस्तंबोऽब्रवीन्मुनि
रिति षट्त्रिंशन्मते शणपुष्पं शाल्मलं च करनिर्मथितं दधि बहिर्वेदिपुरोडाशं जग्ध्वा नाद्यादहर्निशाको
र्मे अलाबुं शिग्रुकं चैव नग्धाप्येत घृतं चरेत् औदुंबरं च चक्रामेन तनक्तं क्षुच्छ्रेण शुध्यतीति शंखः माहिषं रामः
॥ ५० ॥

दधि मार्जं च तक्रं भक्षणेषु निर्दिशेत् उत्कापरस्य तु क्षीरं मासं कुर्याद्व्रतं बुधः अनिर्दशाहं गोक्षीरं माहिषं वा
जमेव च गोश्वक्षीरं विवत्सायाः संधिन्याश्च तथा पयः संधिन्यमेध्यभक्षायाः उक्त्वा चांद्रं व्रतं चरेत् क्षीराणि
यान्यभक्ष्याणि तद्विकाराशने बुधः सप्तरात्रं व्रतं कुर्यादेतेस्तस्यरिकीर्तितमिति अगम्यासे तु सवर्त्तः
अवत्सेकशफास्त्रीणां क्षीरं प्राश्य द्विजोत्तमः अनिर्दशपयागोश्चैव त्रिरात्रं यावकं पिबेदिति अकामतोन
भ्यासे तु शेषेषु पक्षवसे दहहरिति मनूक्तउपवासः उष्ट्र्यादिक्षीरे तु शातातपः उष्ट्रीक्षीरमानुषीक्षीरपाने
पुनरुपनयनं तप्तकृच्छ्रं च आममांसप्रपसंधिन्यनिर्दशायागोः क्षीरप्राशने दध्यामांसभक्षणे च प्राजापत्यं
कपिलाक्षीरपाने विशेषमाहापस्तंबः क्षत्रियश्चैव वृत्तस्थो वैश्यः शूद्रोपि वा पुनः यः पिबेत्कापिलं क्षीरं न त
तोन्योस्ति पापकृत् भविष्यपुराणे कापिलं यः पिबेच्छूद्रो नरके स विपच्यते कृतशेषं पिबेद्विप्रो विप्रस्याद्यस
यापसः अन्यथाकृतशेषापाने तत्र स्कंदस्य कालाः क्षीरपानेन चावनेन ब्रह्महेति तादृप्याति देशः कृते तेन
स्यतत्र न वा इमितरेपापि श्वांद्रायणमनादिष्टत्वात् ब्रह्मपुराणे घृताक्तं न घृतान्नं डपीयूषमथ चोर्द्धयो दधि

क्षीरमथान्यं चतुष्टयाश्चैव गोपयः। अनिर्दशाया श्वेत यासंधिन्याश्चान्तयैव च। सगुडं मरिचाक्तं च तथा प
र्युषितं दधि। जीर्णतक्रमपेयं तु न पस्वादं च फेनवत्। प्रमादादङ्क्षितैरेभिर्वपने पक्षव्रतं चरेदिति। अ
र्गोः सद्यः प्रसूतायाः। दुष्टाया व्याध्यादिना। अथ मांसभक्षणे मनुः। नाकृत्वा प्राणिनां हिंसां मांसमु
त्पाद्यते क्वचित्। न च प्राणिवधः स्वर्ग्यस्तस्मान्मांसं न च भक्षयेत्। तत्र विशेषानुक्तावकामतः सकृद्भक्षणे
दोषो धूमवसेद्धरितिमन्त्रकृत्। कामतस्त्वनुपाकृतवमांसानीत्याद्युपक्रम्य मत्स्यांश्च कामतो जग्ध्वा सो
पवासस्त्र्यहं वसेदिति। अकामाभ्यासे मनुः। उक्तानां समनन्दं च सप्तरात्रं यवान्पिबेदिति। कामतोभ्यासे
विष्णुः। अनर्चितं वृथामांसं तु स्कोमासे पयसा वर्तेतेति। नरमांसादिभक्षणे त्वज्ञानात्। नरमांसमश्वमांसं च गो
मांसं चाश्वमेव च। भुक्त्वा पंचनखादीनां महासान्तपनं चरेत्। जग्ध्वा मांसं नराणां च विड्वराहं खरं तथा। गवा
श्वं कुञ्जरोष्ट्राणां सर्वं पांचनखं तथा। क्रव्यादं कुक्कुटं ग्राम्यं कुर्यात्संवत्सरं व्रतं। यमः। मांसमूत्रपुरीषाणि प्रा
शु गोमांसमेव च। श्वगोमायुकपीनां च तप्तकृच्छ्रं विधीयते। उपोष्य वा द्वादशाहं कूष्माण्डैर्जुहुयाद्घृतमि

ति। अत्राप्ययमकामतः। कामतोपरं हृद्यमः। शुष्कमांसाशने विप्रो व्रतं चान्द्रायणं चरेदिति। षड्त्रिंशन्मते। अजा
विमहिषमृगाणां मामममांसभक्षणे केशनखरुधिरप्राशने मतिपूर्वं त्रिरात्रमज्ञानादुपवास इति। क्वचिन्मां
सभक्षणमनुज्ञातिज्ञा। याज्ञवल्क्यः। प्राणात्यये तथा श्राद्धे प्रोक्षितं द्विजकाम्यया। देवान्पितॄन्समभ्यर्च्य खा
दन्मांसं न दोषभाक्। इति। यत्तु मनुः। न मांसभक्षणे दोषो न मद्ये न च मैथुने। प्रवृत्तिरेषा भूतानां निवृत्तिस्तु महा
फलेति। तदनुज्ञातपरं। न तु निषिद्धपरं निषिद्धानां चरणस्य पुण्यजनकत्वादिति शूलपाणिः। तन्न सत्यपि
पुरुषार्थेनान्वितं वदेदिति निषेधे दार्शपौर्णमासिके न तेन निषिद्धानामूलचरणस्यैव क्रतूपकारत्व पुण्य
जनकत्वदर्शनात्। तत्वतस्तु नान्न निषिद्धानां चरणं पुण्यजनकं किंतु प्रजापतिव्रत इव व्रत इव मांसनिवृत्तिं
कल्पयथैकादशपान न भुञ्जीतेति निषेधसत्त्वेपि व्रतविधिना भोजनाभाव संकल्पः फलाय विधीयते एते न
गृहेपि निवसन्विप्रो मुनिर्मांसविवर्जनमिति याज्ञवल्क्यीयमपि व्याख्यातं एतच्च फलं संवत्सरिकं संकल्प
स्य वर्षे अश्वमेधेन यो यजेत शतं समाः। मांसानि च न खादेद्यस्तयोस्तु पुण्यफलं समेमिति मन्वुक्तेः। योगीश्वरः। व

प्रा०म० तिष्ठन्नरके घोरे दिनानि पशुरोमभिः। समितानिष्ठुराचारो यो हंत्यविधिना पशून्। इति नारदस्य एव मनुः। अनुमंता वि
॥५२॥ शसिता निहंता क्रयविक्रयी। संस्कर्ता चोपहर्ता च खादकश्चेति घातकाः। अत्र च देवान्पितृनिति सामान्यतो
नुज्ञसमप्यन्नादिमांसं विप्रेणान भक्ष्य तथा च मनुः। यक्षरक्षःपिशाचान्नं मद्यं मांसं सुरासवं। तद्ब्राह्मणेन नात्त
व्यं देवानामश्नता हविः। पशुमेधातिथिः। निषिद्धमांसपरमेतदित्याह तत्र विशेषनिषेधप्यर्थापत्तेः। न चायं दे
दोषातिशयार्थः यस्य हि निषेधस्य निषिध्यविषयं त्वेमेव नियम्ना तन्निषिद्धविषयानाभागत्य दोषविशेषः कल्प
ते यथानंदासुत्र प्रसंगनिषेधे स विपुनः षष्ठ्यानिषेधो दोषातिशयार्थः केचित्तु मांसमत्र यथोपसंहारे पिहेवा
नामश्नता हविरित्युक्ते देवानां च हविः पक्कमेव भवति। अतः पक्कमेव विधिर्मेदयनापक्कमिति। तदुक्तं। न हि पक्त्वा
दयः पक्कं नाश्नंति। क्रयात्वंतु तेषां पक्कातानेनापक्कमप्यश्नंतीत्यभिप्रायेणादिवानां हविष्यामममपि विहितं
यथा होत्रेतं तु वैलेजुहोतीति चित्रायां वदाधि मधु घृतं धाना उदकं तंडुलास्तत्संसृष्टं प्राजापत्यमिति। तथा पर्य राम:
ग्निकृता नारण्यानुत्सृजतीत्यत्र पशुरूपाममांसस्यैव देवतासंबंधकृत। तस्मादुक्तमो मांसमात्रनिंदा ९५४

र्थ एवायमुपसंहारो पित्रा स्नानस्तु त्यर्थ एव। अत्र विशेषः आपिस्त चरणाहुते दैतनिर्णये द्रष्टव्यः। अथ ब्रह्म
चारिणो मधुमांसभक्षणे देवलः। मत्तानेन मधुमांसं च यद्यश्नाति व्रती क्वचित्। त्रिरात्रं पोषितं सम्यक् कु
रात्रिमेकां जले वसेत्। इदमज्ञानतः सकृद्भक्षणे ज्ञाने संवत्सरं। ब्रह्मचारी तु योऽश्नीयात् मधु मांसं तथै
व च। प्राजापत्यं चरेत् कृत्वा मौंजीहोमेन शुध्यति। मौंजीहोमः पुनः पुनरुपनयनं। वसिष्ठः। ब्रह्मचारी चेन्मांसं भक्ष
मंसनश्नीयाच्छिष्टभोजनीयं द्वादशरात्रं चरित्वा व्रतशेषं समापयेत्। सूतकभोजनेष्वेवमिति। शिष्टभो
जनीयं शिष्टभोजनयोग्यं विहितमित्यर्थः। अनेन मांसादिभक्षणे प्रतिस्विकं तदपि कार्यं अपवादमाह दे
वलः। अकामापन्नं वाजनेयेतदुष्यतीति। अकामपन्नं अकामकृतं। तथा ब्रह्मचार्यधिकारे बौधायनः। स चेद्व्या
धीयीत कामं गुरोरुच्छिष्टं भैषज्यार्थे सर्वं प्राश्नीयादिति। ते छेदेन चिकित्सेत् स यदागदः स्यात्तदादित्यमुपतिष्ठे
हंसः शुचिषदिति। लघुहारीतः। आमिषस्य तु यो भांडोपक्रमश्नाति सव्रतः कुशमूलविपक्केन त्र्यहं क्षीरेण वृ
र्त्तयेदिति। अथ शारीरमलभक्षणे प्रायश्चित्तं। तत्र मलीताह मनुः। वासांमूत्रं कामस्य असृङ्मूत्रविट्कर्णवि

प्रा·म·
॥५३॥

न्वरवा॥ श्लेष्मास्रुदूषिकास्वेदो दाहः शौचे मलान्वयः॥ प्रायश्चित्तमाहयोगीश्वरः॥ अज्ञानात्सुरां पीत्वा रेतो विण्मू
त्रमेव च पुनः संस्कारमर्हंति त्रयो वर्णा द्विजातयः॥ पुनः संस्कारस्तु नरकपतनपर्यं इदं च प्रायश्चित्तिकैः शारीरम
लजग्रहण प्रायश्चित्ते समुच्चायम इति शूलपाणिः स्वतंत्रमेव प्रायश्चित्तमिति सेपि॥ अज्ञानतः सकृद्ग्रहणे तु
संवर्त्तः॥ विण्मूत्रभक्षणे विप्रः प्राजापत्यं समाचरेत् ज्ञानतः सकृद्ग्रहणे तु अंगिराः॥ प्राजापत्यं चरेद्वैश्यो तिकृ
च्छ्रं क्षत्रियश्चरेत् कृच्छ्रातिकृच्छ्रौ कृत्वा तु विप्रो विण्मूत्रभक्षण इति॥ यत्तु वसिष्ठः ममत्याम द्यपाने कृच्छ्रौ घृ
तप्राशनं पुनः संस्कारो मूत्रशकृच्छुक्राभ्यवहारेषु चैवमिति तदपि विप्रस्याज्ञानत सकृद्ग्रहणे अस्मिन्नेव विष
ये गौतमः॥ अमत्या द्यपाने पयो घृतमुदकं वायुं प्रतित्र्यहं तप्तानि सकृच्छ्रः॥ ततः संस्कारो मूत्रपुरीषरेतः सां
प्राशने चैवमिति॥ यत्तु बृहस्पतिः॥ रेतोमूत्रपुरीषाणां शुद्ध्यै चान्द्रायणं चरेत्॥ इति तदमतिपूर्वाभ्यासवि
षयं॥ केशादिभक्षणे षट्त्रिंशन्मते केशनखरुधिरप्राशने मतिपूर्वं त्रिरात्रमज्ञानादुपवासः॥ यत्तु स्मृत्यं रामः
तरं केशकीटनखं प्राश्य मसूपकंटकमेव च हेमतप्तघृतं पीत्वा ततः ब्राह्मणो देवस्तु शुध्यति तन्मुखमात्रप्र ९५

वेशविषयं प्रचेताः॥ अन्ने भोजनकाले तु मक्षिकाकेशदूषिते अनंतरं स्पृशेदापस्तच्चान्नं भस्मना स्पृशेत्
ग्रास्य क्रियादुष्टभक्षणे तत्रोच्छिष्टभक्षणे मनुः॥ बिडालकाकाखूच्छिष्टं जग्ध्वा श्वनकुलस्य च केशकीटावपन्नं च
पिबेद्ब्रह्मसुवर्चलां॥ पंचनखे कस्मिन्नेव दिने॥ एतच्चाकामतः सकृद्भक्षणे कामतस्तु विष्णुः॥ पक्षिजग्धापदग्रंध
स्परससपान्नस्य भूयसः संस्काररहितस्यापि भोजने कृच्छ्रपादकं॥ अकामतोभ्यासे शातातपः॥ श्वकाकावली
ढशूद्रोच्छिष्टभोजने तिकृच्छ्र इति कामतोभ्यासे यावकव्रतं प्रकृत्य सप्तरात्रं ख॥ शुनमुच्छिष्टकं भुक्त्वा मासमेकं
व्रती भवेत्॥ काकोच्छिष्टं गवाघ्रातं भुक्त्वा पक्षं व्रती भवेत्॥ वृद्धविष्णुः॥ ब्राह्मणः शूद्रोच्छिष्टाशने सप्तरात्रं पंचग
व्यं पिबेत् वैश्योच्छिष्टाशने पंचरात्रं राजन्योच्छिष्टाशने त्रिरात्रं ब्राह्मणोच्छिष्टाशने त्वेकाहमिति॥ अकामतो
विप्रस्य विप्राद्युच्छिष्टभक्षणे शंख॥ ब्राह्मणोच्छिष्टाशने महाव्याहृतिभिरभिमंत्र्यापः पिबेत्॥ क्षत्रियोच्छिष्टा
शने ब्राह्मीरसविपक्वेन बंहीरेण वर्तयेत् वैश्योच्छिष्टाशने भोजने त्रिरात्रोपोषिते ब्राह्मीं सुवर्चलां पिबेत्
शूद्रोच्छिष्टभोजने षड्रात्रं तप्तभोजनमिति॥ अकामतोभ्यासे तु यमः॥ भुक्त्वा सह ब्राह्मणेन प्राजापत्येन शुध्यति

प्रा.म.
।५४।

न तु जामहस्तुक्त्वान्नं तप्तकृच्छ्रेण शुध्यति । वैश्येन सह भुक्त्वान्नमतिकृच्छ्रेण शुध्यति । शूद्रेण सह भुक्त्वा त्वं चां
द्रायणमथाचरेत् ॥ इति । इदं कामान्यास विषयमविज्ञानेश्वरः । कामतोऽभ्यासे त्वेतदेव द्विगुणं कल्प्यं विज्ञा
नेश्वरमते त्वकामतोऽभ्यासे वेदं । अन्योच्छिष्टभोजने तु आपस्तंब । अन्त्यानां भुक्तशेषं तु भक्षयित्वा द्विजातयः ।
चांद्रं कृच्छ्रं तदर्धं च ब्रह्मक्षत्रविशां विधिरिति । चांद्रा चांद्रायणं अंगिरा । चंडालपतितादीनामुच्छिष्टान्नस्य
भक्षणे । चांद्रायणं चरेद्विप्रः क्षत्रः सांतपनं चरेत् । षड्रात्रं च त्रिरात्रं च वर्णयोरनुपूर्वशः ॥ इति । द्विजः शूद्रो
त्पराकेण शूद्रः कृच्छ्रेण शुध्यतीति नृत्तरार्धं पापच्च शूलपाणिः । सांतपनं महत् । इदमज्ञानतः सकृद्भक्षणे
ज्ञानतस्तु द्विगुणं । पीतोच्छिष्टपाने वृद्धशातातपः । पीतोच्छिष्टं तु पानीयं पीत्वा तु ब्राह्मणः क्वचित् । त्रिरात्रं तु व्रतं
कुर्याद्वामहस्तेन वा पुनरिति ॥ इदं कामतोऽभ्यासे कामतस्त्वसकृत्पानि । कामतोऽभ्यासे तु वृद्धशातातपः । पीतशे
षं तु यत्किंचिद्भोजने तु निस्मृतं । अभोज्यं तद्द्विजातीनां भुक्त्वा चांद्रायणं चरेदिति । स्त्रीणामुच्छिष्टभोजने तु आ राम:
पस्तंबः । शूद्रोच्छिष्टभोजने सप्तरात्रमभोजनं स्त्रीणां चेति ॥ इदं च कामतः सकृद्भक्षणे अकामतस्तु षड्रात्रं एत ॥६४६॥

त्सहचारिण्युच्छिष्टभोजने दर्शनादितिकेचित् । परे ईमे चाहुः सहभोजने तु वृद्धहारीतः । माता वा भगिनी वा
पित्र्या भार्या वान्याश्च योषितः । न ताभिः सह भोक्तव्यं भुक्त्वा चांद्रायणं चरेदिति । यत्त्वंगिरा । ब्राह्मण्या सह यो
ऽश्नीयादुच्छिष्टं वा कदाचन । न तत्र दोषं मन्यंते सर्व एव मनीषिणः ॥ इति । तदापद्विषयं विवाहविषयं वा । उच्छिष्टाप
वादमाहापस्तंबः । पितुर्ज्येष्ठस्य च भ्रातुरुच्छिष्टं भोज्यं । आपदि शूद्रगृहभोजने तु पराशरः । आपत्काले तु वि
प्रेण भुक्तं शूद्रगृहे यदि । मनस्तापेन शुध्येत द्रुपदानां शतं जपेत् । दासोच्छिष्टभक्षणे षड्विंशन्मते । दासोच्छिष्टं तु
यत्तैलं रात्रौ रथ्याहृतं च यत् । अभ्यंगाच्चैव यदुच्छिष्टं भुक्त्वा नक्तेन शुध्यति । तैलग्रहणाद्घृते न दोषः । अथ श्राद्धभो
जने । रौरवः । चांद्रायणं नवश्राद्धे पराको मासिके तथा । पक्षत्रये तु कृच्छ्रं स्यात् षण्मासे कृच्छ्रमेव च । आब्दिके त्वर्ध
पादः स्यादेकाहः पुनराब्दिके । अत ऊर्ध्वं न दोषः स्यादिति रौरवस्य वचनं यथेति । मासिके आद्यो द्वितीयादिषु तु प्राय
श्चित्ततारतम्यं कल्प्यं । षाण्मासिकस्य षष्ठेन तु न षाण्मासिकं गृह्यते । एवमाब्दिकमपि न दोषः । पूर्ववदिति त्रि
षु । तृतीयाद्याब्दिके पित्रि रात्रं चान्यमासेषु पक्षस्य चेदहः स्मृतमिति षड्विंशन्मते प्रायश्चित्तोक्तिः यत्तु मर

प्रा॰म॰
॥५५॥

द्विजः ॥ भुंक्ते चेत्पार्वणे श्राद्धे प्राणायामान्षडाचरेत् ॥ उपवासस्त्रिमासादिवासरांतं प्रकीर्तितः ॥ प्राणायामत्रयं द्व
यावदहोरात्रं सपिंडने ॥ असरूपे स्मृतं नक्तं व्रतपारणके तथा ॥ द्विगुणं क्षत्रियस्यैतत्त्रिगुणं वैश्यभोजने सा
र्धत्रिगुणं ह्येतत्स्मृतं शूद्रस्य भोजन इति ॥ तत्र मासादीत्यापद्विषयं यत्तु हारीतः ॥ चांद्रायणं नवश्राद्धे
प्राजापत्यं तु मिश्रके ॥ एकाहस्तु पुराणेषु प्रायश्चित्तं विधीयत इति ॥ तच्छंखवाक्यसमानविषयं ॥ प्राजापत्यं
तु मिश्रक इत्याद्यमासिकविषयं ॥ द्वितीयेन नवश्राद्धादिषु षड्त्रिंशन्मतोक्तं ॥ प्राजापत्यं नवश्राद्धे पादोनं
वा समासिके ॥ त्रैपक्षिके तदर्धं स्यात्पादो मासिके तथा ॥ पादोनकृच्छ्रमुद्दिष्टं षण्मासे च तथाब्दिके त्रिरात्रं
चान्यमासेषु प्रत्यहं तदहः स्मृतमिति ॥ क्षत्रियादिश्राद्धभोजने तु तत्रैव ॥ चांद्रायणं नवश्राद्धे पराको मासिके स्मृ
तः ॥ त्रैपक्षिके सांतपनं कृच्छ्रं मासद्वयोः स्मृतं ॥ क्षत्रियस्य नवश्राद्धे व्रतमेतदुदाहृतं ॥ वैश्यस्यार्धाधिकं प्रोक्तं
क्षत्रियात्तु मनीषिणा ॥ शूद्रस्य तु नवश्राद्धे स्मरेच्चांद्रायणद्वयं ॥ सार्धचांद्रायणं मासि त्रिपक्षे त्वैन्दवं स्मृतं ॥ मा रामः
सद्वये पराकः स्यादर्धं सांतपनं स्मृतं ॥ यत्तु हारीतः ॥ एकादशेऽहे तु त्र्यहं भुक्त्वा संचयने तथा ॥ उपोष्य विधि ६४१

वत्स्नात्वा कूष्मांडैर्जुहुयाद्घृतं ॥ यदपि विष्णुः ॥ प्राजापत्यं नवश्राद्धे पादोनं त्वाद्यमासिके ॥ त्रैपक्षिके तदर्धं तु पंचगव्यं
द्विमासिके इति ॥ तदुत्तमयमापद्विषयं ॥ नरद्विजः ॥ अपांक्तेयान्नदुर्धिरूपश्राद्धे चैकादशेऽहनि ॥ ब्राह्मणस्तत्र भुक्त्वा
त्रिरात्रं क्षपणं चरेदिति ॥ आमश्राद्धविषयं यत्तु तत्रैव विष्णुः ॥ आमश्राद्धावशेषे त्रिरात्रमिति तदाद्यविषयं ॥ अंगि
रा ॥ चांद्रायणं चरेत् ॥ आमश्राद्धे तथा भुक्त्वा तत्र कृच्छ्रेण शुध्यति ॥ संकल्पिते तथा भुक्त्वा ॥ यत्तु शंखः ॥ आम
श्राद्धाशने विद्वान्मासमेकं व्रतं चरेदिति ॥ तदभ्यासविषयं संकल्पित इति षाण्मासिकादिविषयं ॥ मनुः ॥ मासि
कान्नं तु योऽश्नीयादसमावर्तको द्विजः ॥ स त्रीण्यहान्युपवसेदेकाहमुदके वसेदिति ॥ यत्तु संवर्तः ॥ मृतकान्नं नव
श्राद्धे मासिकान्नं तथैव च ॥ प्राजापत्यं तु कृत्वासौ मौंजीहोमेन शुध्यतीति ॥ तदुद्विपूर्वविषयं ॥ अनुक्तं प्राय
श्चित्ते तु सर्वत्र उशना ॥ दशकृत्वः पिबेदापो गायत्र्या श्राद्धभुग्द्विजः ॥ ततः संध्यामुपासीत शुध्येत्तु तदनंतरमि
ति ॥ आमश्राद्धे तु सर्वत्र द्वंद्वं तपांच षड्त्रिंशन्मते ॥ आमश्राद्धे नवे द्वंद्वं प्राजापत्यादि सर्वदेति ॥ अथ संस्कारा
न्नभोजने प्रायश्चित्तविवेके गिराः ॥ जन्मप्रभृति संस्कारे बाल्यस्यान्नभोजने त्वसपिंडैर्न भोक्तव्यं समरणनां

तो विशेषतः ॥ व्यासः ॥ निवृत्ते वृतहोमे तु प्राङ्नामकरणात्तथा ॥ चरेत्सांतपनं भुक्त्वा जातकर्मणि चैव हि ॥ अतोन्येषु तु
भुक्त्वा त्वसंस्कारेषु द्विजोत्तम ॥ नियोगादुपवासेन शुध्यते निंद्यभोजने ॥ धौम्यः ॥ ब्रह्मौदने च सोमे च सीमंतोन्नयने
तथा ॥ जातश्राद्धे नवश्राद्धे द्विजश्चांद्रायणं चरेत् ॥ आपस्तंबः ॥ यजकान्नं नवश्राद्धं संग्रहे चैव भोजने ॥ स्त्रीणां
प्रथमगर्भे च द्विजश्चांद्रायणं चरेदिति ॥ स्त्रीणां संग्रहो विवाहः ॥ अथ हस्तदत्तादिभक्षणे प्रायश्चित्तमाह ॥
माक्षिकं फाणितं शाकं गोरसं लवणं घृतं ॥ हस्तदत्तानि भुक्त्वा तु भोक्ता मासं तनं चरेत् ॥ एतत्कामतः सांत
पनं दिनत्रयं साध्यं अकामतस्त्वाह पराशरः ॥ माक्षिकं फाणितं शाकं गोरसं लवणं घृतं ॥ हस्तदत्तानि भु-
क्त्वा तु दिनमेकमभोजनमिति ॥ फाणितं इक्षुरसविकारविशेषः ॥ पर्यायदत्तान्नभोजने तु याज्ञवल्क्यः ॥ ब्राह्म
णान्नं ददच्छूद्रः शूद्रान्नं ब्राह्मणो ददत् ॥ द्वयमेतदभोज्यं स्याद्भुक्त्वा तूपवसेदहः ॥ इति ॥ शूद्रहस्ते भोजनादौ
तु क्रतुः ॥ शूद्रहस्तेन यो भुंक्ते पानीयं वा पिबेत्क्वचित् ॥ अहोरात्रोषितो भूत्वा पंचगव्येन शुध्यति ॥ एवं या
ज्ञवल्क्योक्तेषु गोघ्रातं शकुनोच्छिष्टं च कामत इत्यादिषु त्रिरूपिकस्य प्रायश्चित्तं ॥ मनुः ॥ घृतहीनं तु यो भुंक्ते

नरस्तं स्नाकृतिपंचकं पश्चात् घृतेन यो भुक्त्वैकैकं भुक्त्वा चांद्रायणं चरेत् ॥ उपपातकान्नभक्षणे शातातपः ॥
पंचनाश्नंति देवाश्च पितरश्च यथाविधिः ॥ उपपातकसंज्ञे यत्तस्य नाद्यात्कथंचन ॥ उपपातकस्य भुंजा
नः प्रायश्चित्तं चरेद्द्विजः ॥ प्राणायामं त्रिरभ्यस्य घृतं प्राश्य विशुध्यति ॥ लिखितोपि ॥ यस्य चाग्नौ न क्रियते
न तस्यान्नं द्विजातीनां भुक्त्वा तूपवसेदहः ॥ तथा ॥ वृथा कृशरसंयावपायसापूपशष्कुली ॥ आहिता
ग्निर्द्विजो भुक्त्वा जापत्यं चरेदिति ॥ अनाहिताग्निस्तूपवासः ॥ पराशरः ॥ एकपंक्त्यामुच्छिष्टभोजने प्राय
श्चित्तं चरेद्विप्रः कृच्छ्रं सांतपनं तथा ॥ एतच्च कामतः ॥ यत्तु माधवीये स्मृत्यंतरं यस्तु पंक्तिषु भुंजीत ऊस्थिताना
विशेषतः ॥ अहोरात्रोषितः स्नातः पंचगव्येन शुध्यतीति ॥ क्षत्रियादिपंक्तिषु विष्णुः ॥ ब्राह्मणः क्षत्रियपंक्तावुपवि
ष्टः संस्पृशन्यदा भुंक्ते तदा नक्तमाचरेद्वैश्यपंक्तावेकरात्रं शूद्रपंक्त्यां त्र्यहमाचरेदिति ॥ इति क्रियादुष्टान्नप्रा
यश्चित्तं ॥ अथ भोज्याः ॥ व्यासः ॥ गृध्रो द्वादशजन्मानि दशजन्मानि सूकरः ॥ श्वा वै सप्त जन्मानि इत्येवं मनुरब्रवा
चह ॥ शूद्रान्नेनोदरस्थेन यः कश्चिन्म्रियते द्विजः ॥ स भवेत्सूकरो ग्राम्यस्तस्य वा जायते कुले ॥ आपस्तंबः ॥ अ

प्रामः
॥५७॥

हिंसितो यो विप्रस्तस्यान्नेन प्रवर्त्तते । पंचतस्य विनश्यंति आत्मा ब्रह्मसत्वयोन्वयः । किंचिदपवदति हारीतः कं
डुपक्वं स्नेहपक्वं पायसं दधिसक्तवः । एतान्यशूद्रान्नभुजो भोज्यानि मनुरब्रवीत् । कंडुच्चोष्ट्रं क्रीवेरराघं
न्नाद्यैर्नो कंडुना स्वेदनी स्त्रियामिति कोशोक्तं । याज्ञवल्क्यः । शूद्रेषु दासगोपालकुलमित्रार्द्धसीरिणः । भोज्या
न्नानापितश्चैव यश्चात्मानं निवेदयेत् । एते पांचान्नं संभोज्यं दाग्राह्यं । संप्रोक्षयित्वा गृह्णीयाच्छूद्रान्नं गृहमा
गतमिति विष्णुपुराणात् । आपस्तंबः । आममन्नं मधु घृतं धानाः क्षीरं तथैव च । गुडमांसं रसा ग्राह्या निवृत्ते
नापि शूद्रतः । सुमंतुः । गोरसश्चैव सक्तुश्च तैलं पिण्याकमेव च । अपूपान् भक्षयेच्छूद्राद्यच्चान्यत्पयसा कृ
तं । पराशरः । घृतं क्षीरं तथा तैलं गुडं तैलेन पाचितं । गत्वा नदीतीरे विप्रो भुंजीयाच्छूद्रभोजितं । आरना
लं तथा क्षीरं कांजिकं दधिसक्तवः । स्नेहपक्वं तथा चान्नं शूद्रस्यापि न दुष्यति । भुक्त्वा वार्द्धुषिकस्यान्नं व्र
व्रतं स्यात्सुतस्य च । शूद्रस्य च तथा भुक्त्वा त्रिरात्रं स्यादभोजनं । इदमकामतः । कामतस्तु शूद्रादीन्भुक्त्वा सु
मंतुः भुजान्नेनोतमस्मास्यान्नं आममाद्यपणं त्र्यहं । मत्या भुक्त्वा चरेत्कृच्छ्रं रेतो विण्मूत्रमेव चेति । आरताधि

रामः
॥५८॥

कं कस्य याज्ञवल्क्यः । यतिश्च ब्रह्मचारी च पक्वान्नं स्वामिनावुभौ । तयोरन्नं न भोक्तव्यं भुक्त्वा चांद्रायणं चरे
त् । अथ रजकादौ यन्ने आपस्तंबः । रजकव्याधशैलूषवेणुचर्मोपजीविनां । यो भुंक्ते ब्राह्मणश्चान्नं शुद्धिश्चांद्रायणे
न तु एतत्कामतः । अकामतोऽर्द्धं । यत्तु रजकादिष्वभिधाययम । भुक्त्वा चैषां स्त्रियो गत्वा पीत्वापः प्रतिगृह्य च
कृच्छ्राब्दमाचरेज्ज्ञानादज्ञानादैन्दवद्वयमिति । एतदभ्यासे यत्तु संवर्त्तः । अंत्यजान्नं यदा भुंक्ते म्लेच्छमोहात्कथं च
न । एकरात्रोषितो भूत्वा दानं दत्त्वा विशुद्ध्यति । तदापदि । अथ कापालिकान्ने आपस्तंबः । कापालिकान्नभो
क्तृणां तन्नारीगामिनां तथा । ज्ञानात्कृच्छ्राब्दमुद्दिष्टमज्ञानादैन्दवद्वयं । कृच्छ्रमभ्यासविषयं । अथ चांडाला
न्ने अंगिराः । अंत्यावसायिनामन्नमश्नीयाद्यस्तु कामतः । स तु चांद्रायणं कुर्यात्तप्तकृच्छ्रमथापि वा । अकामतः
श्चांद्रायणमतस्तप्तकृच्छ्रं यत्तु कृच्छ्रपादानुवृत्तौ वसिष्ठः । एतदेव चंडालान्नभोजने तत्पुनरुपनयनं तदपि
चांद्रायणसमानविषयं । विष्णुः । चंडालान्नं भुक्त्वा त्रिरात्रमुपवसेत् । सिद्धं भुक्त्वा पराक इति तद्बलाज्ञाजि
तविषयं यत्तु सुमंतुः । चंडालानां स्त्रियं गत्वा भुक्त्वा च प्रतिगृह्य च । पतत्यज्ञानतो विप्रो ज्ञानात्साम्यं तु गच्छति

ति तन्नाजानतो संतान्यासे पातितो के द्वादशाब्दं ॥ कामतस्तु चतुर्विंशत्यब्दं ॥ लोष्टादिभिर्बलाद्यो लिंजितस्यका
रितास्तु कर्मण्यप्रायश्चित्तमाहापस्तंबः ॥ बलाद्दासीकृता येतु म्लेच्छचंडालदस्युभिः ॥ अशुभं कारिताक
र्मगवादिप्राणिहिंसनं उच्छिष्टमार्जनं चैव तथा तस्यैव भोजनं ॥ खरोष्ट्रविड्वराहाणामामिषस्य च भ
क्षणं तत्स्त्रीणां च कथासंगता भिश्चस्य भोजनं ॥ मासोषिते द्विजातौ तु प्राजापत्यं विशोधनं ॥ चांद्रायणं त्वा
हिताग्नेः पराकस्त्वथवा भवेत् ॥ चांद्रायणं पराकं च चरेत्संवत्सरोषितः ॥ संवत्सरोषितः शूद्रो मासार्द्धं यावकं
पिबेत् ॥ मासमात्रोषितः शूद्रः कृच्छ्रपादेन शुध्यति ॥ ऊर्ध्वं संवत्सरात्कल्प्यं प्रायश्चित्तं द्विजोत्तमैः ॥ संवत्सरैस्त्रि
भिश्चैव तद्भावं सोधिगच्छति ॥ तस्य सो न विद्यते तस्य प्रायश्चित्तं दुरात्मन इति ॥ अत्रैतेषु पापेषु प्राजापत्यचांद्रा
यणादि मासं वा मासमात्रे गवादिहिंसा याप्राप्ति चिकं तत्प्रायश्चित्तमेवाकामतो विहितं तज्ज्ञं ॥ आशौच्यन्ने
छागलेयः ॥ प्राणायामशतं कृत्वा मुच्यते शूद्रसूतके ॥ वैश्ये षष्टिर्नवे राज्ञि विंशतिर्ब्राह्मणे दश ॥ एकाहं च
अहं पंच सप्तरात्रमभोजनं इदमकामतः ॥ यत्तु मार्कंडेयः ॥ भुक्त्वा तु ब्राह्मणाशौचे चरेत्सांतपनं द्विजः ॥ ॥८५०॥

रामः

यत्तु शंखः ॥ ब्राह्मणस्य तथा भुक्त्वाशौचे मासं व्रती भवेदिति तदभ्यासविषयं ॥ अत्र सर्वत्र सूतकग्रहणं मृतस्याप्यु
पलक्षणं ॥ अंगिराः ॥ सूतके तु यदा विप्रो ब्रह्मचारी विशेषतः ॥ पिबेत्पानीयमज्ञानात्समश्नीयात्स शुध्यति ॥ पा
नीयपाने कुर्वीत पंचगव्यस्य भक्षणं ॥ त्रिरात्रं भोजने प्रोक्तं स्पृष्ट्वा स्नानं विधीयते ॥ व्यासः ॥ योगो महान्त्रयोदश्यां
कुंजरच्छायसंज्ञकः ॥ नवेन्न यायां संस्थे दोहं सस्येव करे स्थितः ॥ सूतके मृतके वापि याम्तयोः शाग्नित्रये
योः ॥ छायायां कुंजरस्याथ तु भुक्त्वा तु नरकं व्रजेत् ॥ भुक्त्वा प्रमादाद्द्विजन्मा सकृच्छ्रं चांद्रायणं चरेत् ॥ एतत्प्रा
यश्चित्तमज्ञातीयशौचिनो भुक्तमज्ञात्तु चितमाशौचं कृत्वा तदंते कार्यं तथा च विष्णुः ॥ ब्राह्मणादीना
माशौचे यः सकृदन्नमश्नाति तस्य तावदाशौचं यावत्तेषां ॥ आशौचव्यपगमे प्रायश्चित्तं कुर्यादिति ॥ ब्रह्म
मा नेत्रानुराणां च सुमर्षीवाकदाचन ॥ मकृदेनान्नमश्नाया त्रवसत्यग्निहोत्रिणि ॥ एतेषां तु गृहे भु
क्त्वा द्विजश्चांद्रायणं चरेदिति ॥ अत्रापस्तंबः ॥ श्लोछादीनां पयः पीत्वा पुष्करिण्यां कृदे पिबा जानुदघ्ने मु
चि ज्ञेयं मध्यस्तादष्टु चिस्मृतं ॥ ततो यः पिबेत् द्विजः कामतोपि वा ॥ अकामात्तु क्भोजी स्याद्दहो रात्रं तु

प्रा.म.

॥५९॥ कामत इति। तत्र जानुदघ्नोनं। अत एव शातातपः। अंत्यैरपि कृते कूपे सेतौ वाप्यादिके पिबन्। तत्र स्नात्वा च वा
पीत्वा च प्रायश्चित्तं न विद्यते। अर्थांत्यजभांडस्थजलं पाराशरः। भांडस्थमंत्यजानां तु जलं दधि पयः पिबेत्। ब्राह्मण
क्षत्रियो वैश्यः शूद्रश्चैव प्रमादतः। ब्रह्मकूर्चोपवासेन द्विजातीनां तु निष्कृतिः। शूद्रस्य चोपवासेन तथा दा
नेन शक्तितः इति तदकामतः। कामतस्त्वापस्तंबः। मद्यांधवेश्म भांडे स्थितोयं यस्त्वाप्य पिबेद्द्विजः। कृच्छ्रपादे
न शुद्ध्येत पुनः संस्कारमर्हति। शूद्रोदकपाने शातातपः। यदि विप्रः प्रमादेन शूद्रतोयं पिबेत् वमित्तु पंचा
ह्यं उपोष्य बिल्वपत्राणां पलाशस्य कुशस्य च। एतेषामुदकं पीत्वा तेन शुद्धिमवाप्नुयात्। अपवादमाह
याबाल्यः। नव भांडे तु पानीयं शूद्रविट्क्षत्रजन्मनाम्। पेयं तदपि विप्राणां पयो दधि घृतं पैवं च। शंखः। घृतद
धि पयस्तक्राणामाकरभांडस्थितानामदोष इति। शातातपः। घृततैलं दधि क्षीरं तत्पैवेक्षुरसो गुडः। शू
द्रभांडस्थितं तक्रं तथा मधु न दुष्यतीति। प्रयागादिजलपाने लघुहारीतः। प्रयाजलं सारघटस्यैव द्रोण राम:
जलं कोशविनिर्गतं च। पीत्वावगाह्य तज्जलं सवास उपोषितः। शुद्धिमवाप्नुते च सारघटः क्षीरवृक्षनिर्यासा ॥८५२

धारपात्रं द्रोणी नौका जलनिस्सारणपात्रं कोशविनिर्गतं कूपादेश्चर्मपुटकं निस्सारितं। एतत्कामतः संकृत्
आपदि तु न दोष इत्याह स एव। द्रोण्यामायसयुक्तायां छिन्ने चावर्त्तके तथा। प्रामप्रयाजलं चैव पीत्वाप
त्सु न दुष्यति। छिन्ने चावर्त्तके मे चके उज्ञात इति शूलपाणिः। यमः। प्रयामरणेपि घटके च कूपे द्रोणी जलं कोशे
गतास्त्विषाय। कृते पि शूद्रान्न दपेयमाकुरापत्रतो भूमिगताः पिबेच्च। आपदि तद्देवं जलं च भूमिष्ठं कृत्वा पात्रा
न्तरेणाहृतं पेयमिष्टं कृत्वा पात्रान्तरेणाहृतं पेयमित्यर्थः। अथ संसर्गदुष्टे विष्णुः। मूत्रोरिकुसुमां वा
श्वफलकं देहं तु क्लकान्। विण्मूत्रं दुपितान्प्राप्य चरेत्कृच्छ्रं च पादतः। सन्निकृष्टेंदुमेवस्यात् त् तत्कृष्ट
प्रशुचि भोजने। सन्निकृष्टत्वमद्यान्नसंसर्गः। इदं चाज्ञानतः सकृज्जनेरसानुपलब्धौ च ज्ञानतस्तु। अ
भ्यासे त्वाद्र इति। रसोपलब्धौ तु कामतोभ्यासः। संसर्गदुष्टेयज्ञान्यत्क्रियादुष्टं वा कामतः। तुस्कास्व माव दु
ष्टं च तत्र कृच्छ्रं समाचरेत्। अज्ञानतो रसोपलब्धौ तदर्द्धं संवर्त्तः। केशकीटावपन्नं च नीलीलाक्षोपघातितं
स्नायुस्थि च मंसं स्पृष्टं तु स्कान्दपवसेदहरिति। शातातपोपि। केशकीटावपन्नं रुधिरमांसास्थरूपस्पृष्ट

प्रा॰म॰

६०

न्नूणा घ्रविज्ञितपतत्मवलीढ श्ववसूकरगवाघ्रातं शुक्रपर्युषितं यथा पक्वं देवान्नहविष्यं भोजने तु पवासः पंच
गव्याशनं चेति एतदुक्तं यमापस्तंबकामतः यत्तु शंखः दूषितं केशकीटैश्च मार्जारैर्मूषकैस्तथा मक्षि
कामशकैश्चैव त्रिरात्रं तु व्रतं चरेदिति तदनापत्कामतः रजस्वलादिसंस्पर्शने तु शंखः श्वमेध्यपति
तं चांडालपुल्कसरजस्वलावधूतकुणिकुष्ठिकुनखिसंस्पृष्टानि भुक्त्वा कृच्छ्रं चरेदिति कुणिर्हस्तविकलः ए
तत्कामतः अकामतोऽङ्गिराः हिस्पृष्टभोजने तु लघुविष्णुः शूद्रदृष्टं शुनावापि संस्पृष्टं प्राश्य भोजनं तप्त
कृच्छ्रेण शुध्येत प्राजापत्येन वा पुनः शातातपः काकोदानत्व इति धर्मस्य निश्चयः श्वभिर्वैरपादिकैर्दृष्टं गर्दभैर्द
ःसूकरैस्तथा पादहीनं चरेत्कृच्छ्रं शान्तासर्वं चरेद्द्विजः पाकोत्तरं केशकीटादिपाते तु प्रचेताः अन्नं भोज
नकाले तु मक्षिकाकेशदूषितं अनंतरस्पृशेदापस्तच्चान्नं भस्मनास्पृशेत् तेन सद्यपक्वं तु त्याज्यं वि
शुद्धमपी चाह संमक्षिकाकृमिजंतुभिः केशरोमनखैर्वापि दूषितं परिवर्जयेदिति हारितोक्तेः चंडाला राम॰
दिदृष्टे तु ब्रह्मपुराणे चांडालपतितामेध्यैः कुनखैः कुष्ठिनातथा ब्रह्मप्रसूतिकोदक्याकौलेयककु ६५२

डंडुभिः दुष्टं वा कीटकेशाक्रांतं ग्न समकनकांबुभिर्भिः शुद्धमघ्रात्मसूक्ष्मोरवंप्रदुष्टं शुष्टमेव चेति कौलेयक
ःश्वाः कुक्कुटविष्ठाणिविशेषः सकृत्खरवंविष्ठादिस्मारकं शुष्टंपर्युषितं एतत्स्पृष्टं भक्षणे तु ब्रह्मपुराणे चं
डालपतितामेध्यैः कुनखैः कुष्ठिनातथा उदक्यासूतिकास्पृष्टं भुक्त्वा वासं वनेवसेदिति क्लीवादिदृष्टे
तु शातातपः क्लीबाभिशस्तपतितैः सूतिकोदक्यनास्तिकैः दृष्टं नाद्यान्नदत्तं तु तस्य निष्कृतिरुच्यते त
प्तकृच्छ्रोपवासेन त्रितं स्पृष्टे तु चतुर्गुणं उच्छिष्टेषु गुणप्रोक्तं मध्यासे षड्गुणं भवेदिति काकादिस्पृष्टम
पवदति प्रायश्चित्तविवेके यमः देवद्रोण्यां विवाहेषु यज्ञेषु प्रकृतेषु च काकैः श्वभिश्च संस्पृष्टमन्नं तन्न वि
वर्जयेत् अन्नवेच्छ्छिरपाम ग्नेहृतस्पृष्ट्वा छागेन मुखसंस्पृष्टं शुचिवैवचतद्भवेत् यमः गुडादिद्रव्यसं
युक्तं वर्ज्यं पर्युषितं दधि तथैव यावकादीनि मधादिरचितान्यपि अत्र प्रायश्चित्तं ब्रह्मपुराणे सगुणांनवि
शुद्धं च तथा पर्युषितं दधि जीर्णं तक्रमपेयेन ष्टस्वादं च फेनवत् प्रमादाद्भक्षितैर्तैरेभिर्वनेपष्ठाब्द तंच
रेत् बुद्ध्वा तु द्वादशाब्दं तु वने वसेत् सगुडं मरीचाक्तं वर्ज्यं पर्युषितं दधि धीति मदनंपाव

प्रा॰म॰

॥६२॥

अप्यादिदूषिताऽनाशने। बालवृद्धातुरोऽस्य पादं तु दूषितं चान्नं भुंजानः कृच्छ्रदा भवेत्। स्नात्वार्कमर्च्चयित्वा तु
घृतं प्राश्य विशुध्यतीति। शवदूषितजलपाने पराशरः। कूपे च पतितं दृष्ट्वा श्वसृगालौ च मर्कटं। अस्थिच
र्मादि पतितं पीत्वामेध्या अपो द्विजः। नारं तु कुणपं काकं विड्वराहं खरोष्ट्रकं। गावयं सप्रतं किंच मायूरं
खाड्गं तथा। वैयाघ्रमार्क्षं सैंहं वा कूपे यदि निमज्जति। तडागस्याथ दुष्टस्य पीतं स्यादुदकं यदि। प्रायश्चि
त्तं भवेत्पुंसां क्रमेणैतेन सर्वशः। विप्रः शुध्येत्त्रिरात्रेण क्षत्रियस्तु दिनद्वयात्। एकाहेन तु वैश्यस्तु शूद्रो न
क्तेन शुध्यति। सुप्रतीको गजः। अङ्गिरा मातुला हारीतः। क्लिन्नं भिन्नं शवं चैव तत्रस्थं यदि तत्पिबेत्। शुद्धिश्चां
द्रायणं कुर्यात्तप्तकृच्छ्रमथापि वेति। तत्कामतोऽत्यंताभ्यासे। कामतो मानुषशवोपहतजलपाने त्वा
ने वा चांद्रायणतप्तकृच्छ्रयोः। शातातपव्यवस्था। शवदूषिते स्नानमात्रेऽपि हारीतः। यदि कश्चित्ततः स्नाया
त्प्रमादेन द्विजोत्तमः। जपंस्त्रिषवणस्नानादहोरात्रेण शुध्यति। कामतो हेतु एपादि कल्प्यं। बृहद्विष्णुः रामः
जलाशयेष्वथाल्पेषु स्थावरेषु महीतले। कूपवत्कथिता शुद्धिर्महत्सु न तु दूषणं। वापीकूपतडागेषु दू ८५३

षितेषु विशोधनं। घटानां शतमुद्धृत्य पंचगव्येन तत्क्षिपेदिति। अंगिराः। कूपे विण्मूत्रसंस्पृष्टे पीत्वा तोयं द्विजोत्तम
ः त्रिरात्रेण विशुध्येत कुंभे सांतपनं स्मृतं। अथ शूद्रोच्छिष्टाशने तत्र मनुः। शुक्तानि च कषायांश्च पीत्वा
मेध्यान्यपि द्विजः। तावद्भवत्यप्रयतो यावत्तन्न व्रजत्यधः। शुक्तं कालपरिवासमात्रेण द्रव्यांतरसंसर्गकाल
परिवासाभ्यां याऽवस्थांतरं भवति। अत्राकामतः शेषेषूपवसेदहः इति मनूक्त उपवासः। विष्णुरपि यवगोधू
मजं पयोविकारस्नेहाक्तं चुक्रुषाभवं वर्जं पीत्वा पर्युषितं प्राश्योपवसेत्। चुक्रुषाभवं स्वरूपशास्त्रोक्ते व्यंज
नविशेषः। कामतस्तु शंखः। लोहितान्वृक्षनिर्यासाञ्छ्वप्रभवांस्तथा किवलानि च शुक्तानि तथा पर्यु
षितं च यत्। सजीषपक्वशुक्तानि च त्रिरात्रं तु व्रती भवेदिति। धान्याषं पिष्टचनं एतत्तु फलकादिफलशुक्तकां
जिकादिव्यतिरेकेण। कुंडिकामफलायेषु स्यात् पिताम्यं भवेत्। तस्मात्कंजिकामाहात्ने तरस्याः कट
च नेति मिताक्षरायां स्मरणात्। दधिभक्ष्यं तच्छुक्तेषु सर्वं च यद्दधिसंभवं। यानि चैवाभिषूयंते पुष्पमूलफ
लैः शुभैरिति। तच्छूतस्नेहादिषु गौतमः। उद्धृतस्नेहविपणपाकमथितप्रभृतीनि च। चान्नवार्यारिणा श्वा

प्रा॰म॰ यापादित्यक्त्वाप्राकृयंचरेत्स्वयः छर्दनं घृतप्राशनं वेद्दिति ॥ पर्युषितापवादमाह याज्ञवल्क्यः ॥ अन्नं पर्युषितं भो
॥६२॥ ज्यं स्नेहाक्तं चिरसंस्थितं ॥ अस्नेहा अपि गोधूमयवगोरसविक्रियाः ॥ अकृताग्रभोजने तु लिखित आह यस्य चा
ग्नौ न क्रियते यस्य चाग्रं न दीयते न तद्भोज्यं द्विजातीनां भुक्त्वा तूपवसेन्नरः ॥ संवर्तः ॥ शूद्राणां भाजने भुक्त्वा
भुक्त्वा वा भिन्नभोजने ॥ अहोरात्रोषितो भूत्वा पंचगव्येन शुध्यति ॥ भिन्नापवादमाह देवलः ॥ ताम्ररजतसु
वर्णाश्मशंखशुक्तिस्फटिकानां भिन्नमभिन्नमिति ॥ भिन्नभाजनं च कांस्यमेव भिन्ने कांस्ये तु योऽश्नीयान
द्यात्त्वा त्वा जपेद्द्विजः ॥ गायत्र्यष्टासहस्रं तु एकभक्तस्तदा शुचिरिति बौधायनोक्तेः ॥ एतच्च ज्ञानतः ॥ अज्ञान
तस्तु पराशरः ॥ भिन्नभांडे तु भुंजानो ह्यज्ञाने नो द्विजोत्तमः ॥ सुवर्णोदकसंस्पृष्टं घृतं प्राश्य विशुध्यति ॥ भि
न्नासरायां स्मृत्यंतरे वटार्काश्वत्थपत्रेषु कुंभीतिंदुकपत्रयोः ॥ कोविदारकदंबेषु भुक्त्वा चांद्रायणं चरे
त् ॥ तथा ॥ पालाशपद्मपत्रेषु गृही भुक्त्वैंदवं चरेत् ॥ दानप्रस्थो यतिश्चैव लभंते चांद्रकं फलं ॥ पलाशो व रामः
ह्मपलाश इति स्मृत्यर्थसारे हेमाद्रौ च ॥ अथ कालदुष्टाशने ब्रह्मपुराणे सूतके वापि यस्तयोश्चांद्रस्य ॥६५४॥

र्यो ॥ छायायां कुंजरस्याथ भुक्त्वा तु नरकं व्रजेत् ॥ भुक्त्वा प्रमादाद्विप्रस्तस्य सम्यक्कां प्रायणं चरेत् ॥ षट्त्रिंशन्
मते ॥ चंद्रसूर्यग्रहे भुक्त्वा प्राजापत्येन शुध्यतीति दकामतः ॥ वृद्धहारीते अर्के द्विपर्वरात्रौ च चतुर्दश्यष्ट
म्यां दिवा ॥ एकादश्यामहोरात्रं भुक्त्वा चांद्रायणं चरेत् ॥ ग्रहणसन्निहितनिषिद्धकालेऽशाने भोजने तु चंद्र
सूर्यग्रहं प्रकृत्य षट्त्रिंशन्मते ॥ अस्मिन्नेव दिने भुक्त्वा त्रिरात्रेणैव शुध्यति ॥ प्रायश्चित्तं विवेके संवर्तः ॥ अपोश
नमकृत्वा तु यो भुंक्ते नापदि द्विजः ॥ भुंजानस्तु यदा ब्रूयाद्गायत्र्यष्टशतं जपेत् ॥ अष्टतमष्टोत्तरशतं ॥ स एव
अनाचांतः पिबेद्यस्तु नद्यये द्वापि किंचन ॥ गायत्र्यष्टसहस्रं तु जप्यं कृत्वा विशुध्यतीति ॥ लघुहारीतः ॥ विना
यज्ञोपवीतेन भुंक्ते च ब्राह्मणो यदि स्नानं कृत्वा जपं चैव उपवासेन शुध्यति ॥ ब्रह्मपुराणे रेतो मूत्रपुरीषाणा
उत्सर्गश्चेत्प्रमादतः ॥ तदादौ तु प्रकर्तव्यातेनपक्तव ॥ भुंजानस्य तु विप्रस्य कदाचित्स्रवते गुदं ॥ उच्छिष्टस्य
चित्वं च प्रायश्चित्तं कथं भवेत् ॥ आदौ कृत्वा तु वै शौचं ततः पश्चादुपस्पृशेत् ॥ महोरात्रोषितो भूत्वा पंचग
व्येन शुध्यति यत्तु शातातपः ॥ रेतोऽश्वारसमुत्सर्गे मोहाद्भुक्तेऽथवा पिबेत् ॥ त्रिरात्रं तत्र कुर्वीत इति शातातपे

प्रा·म·
॥६२॥

पोऽब्रवीत् इति तद्वयोर्यास इति॥ आपस्तंबः॥ मूत्रोच्चारं कृत्वाऽकृत्वाऽकृत्वा शौचमात्मनः॥ मोहाद्भुक्त्वा त्रिरात्रं
तु यवान्पीत्वा विशुध्यतीति॥ मूत्रपदं पुरीषादेरुपलक्षणं॥ शातातपः॥ अथ भोजनकाले चेदशुचिर्भवति द्वि
जः॥ भूमौ निक्षिप्य तं ग्रासं स्नात्वा विप्रो विशुध्यति॥ भक्षयित्वा तु तं ग्रासं महोरात्रेण शुध्यति॥ अशित्वा सर्वमन्नं
तु त्रिरात्रेण विशुध्यतीति॥ तैलाभ्यंगादिना स्नाननिमित्ते अकृतस्नानस्य संवर्तः॥ समुत्पन्ने द्विजः स्नाने भुंजानोऽथ
पिबेत्तथा॥ गायत्र्यष्टसहस्रं तु जपेत्स्नात्वा समाहितः॥ अष्टसहस्रमष्टाधिकसहस्रं॥ एतच्च सकृदभ्यासे त्रं॥
रवं॥ नीतं वस्त्रं परीधाय भुक्त्वा स्नानार्हको भवेत्॥ त्रिरात्रं तु व्रतं कुर्यात्छित्वा युग्मलतां तथेति॥ क्रतुः॥ आसना
रूढपादो वा वस्त्रार्धप्रावृतोऽपि वा॥ मुखेन धमितं भुक्त्वा कृच्छ्रं सांतपनं चरेदिति एवमेवस्थितप्रक्रमगच्छयान्ते
न भोजने एकाहमाहारान्परिहरणं प्रायश्चित्तान्नियोजनीयानि॥ पराशरः॥ भुंजानश्चैव यो विप्रः पादं हस्तेन संस्पृ
शेत्॥ स्वमुच्छिष्टमसौ भुंक्ते यो भुंक्ते भुक्तभाजने॥ पादुकास्थो न भुंजीत पर्यंकस्थः स्थितोऽपि वा॥ श्वानचंडालदृष्टो राम:
वा भोजनं परिवर्जयेदिति॥ इति कर्तृदुष्टान्ने प्रायश्चित्तं॥ अथ वाग्दुष्टभावदुष्टान्ने॥ ब्रह्मपुराणे॥ भवदर्पितं च ॥६५५

श्रावकेन यो दद्याद्दोष धर्मते॥ गुरोरपि न भोक्तव्यं वाग्दुष्टं तन्महापद्यपि॥ यत्र वर्णाकारादिना ज्ञायते दुर्विश्वा
दिशंका वा जायते तद्भावदुष्टं॥ तत्राकामतः सकृद्भक्षणे भावदुष्टादिभक्षणे गौतमः॥ छर्दनं घृतप्राशनं चेति का
मतस्तु शंखः॥ वाग्दुष्टं भावदुष्टं च भाजने भावदूषिते॥ भुक्त्वान्नं ब्राह्मणः पश्चात्त्रिरात्रं तु व्रती भवेदिति॥ हारीतः
शंकितं प्रतिशंकितान्नं विद्विष्टान्नमथापि च॥ यदि भुंजीत विप्रो यः प्रायश्चित्तं कथं भवेत्॥ एकरात्रोपवा-
संकितो गायत्र्यष्टशतं जपेत्॥ प्राशयेच्च त्रिभिर्मंत्रैः पंचगव्यं पृथक् पृथक् इति॥ इति सुरापानप्रसक्ता
नुप्रसक्तप्रायश्चित्तं॥ अथ सुवर्णस्तेये॥ आपस्तंबः॥ ब्राह्मणसुवर्णापहरणं महापातकमिति॥ तत्सुवर्णस्ते
षोडशेति याज्ञवल्क्योक्तेः सुवर्णशब्दः षोडशमाषान्मितहेमवचनः॥ एवं चैतन्न्यूनहरणे न महापातकं॥
प्रायश्चित्तं महापातके प्रायश्चित्तमाह याज्ञवल्क्यः॥ अनिवेद्य नृपे शुध्येत्सुरापव्रतमाचरन् इति सुरापव्र
तं द्वादशाब्दं सुवर्णस्तेयानुवृत्तौ महाव्रतं वा द्वादशाब्दानि कुर्यादिति कल्पतरौ विलुक्ते॥ द्वादशाब्दानि वर्षैर्म-
हापातकिनः क्षयंत इति हारीतोक्तेश्च॥ युगपदनेकसुवर्णकरणेऽप्येकमेव प्रायश्चित्तं नावृत्तिः हरणक्रियाया

प्रा॰ म॰ एकत्वात्ब्रह्मवधादेस्तु हननक्रियाभेदात् । आहननमेव प्रायश्चित्तं प्रायश्चित्तांतरेष्वाह स एव । आत्मतुल्यं सुव
॥६४॥ र्णं वा दद्याद्वा विप्रतुष्टिकृत् । आत्मसमस्वर्णदानं धनषड्विषयं तत्राशक्तस्तु विप्रतुष्टिकृत्सुवर्णं दद्या
त् । यत्तु यम । एतदेव व्रतं स्तेन पादन्यूनं समाचरेदिति तन्निर्गुणस्वामिकसुवर्णापहारविषयमिति निबं
धकृत । वयं तु पादोनसुवर्णापहारविषयमिति प्रतीमः । यदप्यपरार्केउक्तं त्रिषडब्दं वाचरेत्कृच्छ्रं यजेद्वाक्र
तुना द्विज । तीर्थानि वा धमन्विप्रस्ततस्तेयी विमुच्यते इति तु हृत्वामं कूटंबनरेण यन्निर्गुणस्वामिकसु
वर्णापहारविषयमिति केचित युक्तं तु पूर्वराश्या ईस्वर्णापहारविषयत्वं साम्यातिदेशाविषयीभूता
ष्वरत्नाद्यपहारविषयत्वं च । क्रतुरत्र स्वर्जिदादिः तीर्थधमणवासीत्यधिकं शतयोजनगमनं षडब्दं य
त्वापस्तंब स्तेयं कृत्वा सुरां पीत्वा गुरुतल्पं च गत्वा चतुर्थकालमितभोजनात्पोऽभ्युपेयुः सवनानुक्र
मं स्थानासनाभ्यां विहरं तएते त्रिभिर्वर्षैः पापं नुदंतीति । यद्दृष्यंगिरा । महापातकसंयुक्तो वर्षैस्तु ध्यंति रामः
ते त्रिभिरिति तदुभयं यदापहारोत्तरमेवानुतापेन स्वामिने प्रत्यर्पयति तद्विषयमिति प्रांच । अन्येतु सु ॥१५६॥

वर्णचतुर्थांशापहारविषयत्वमाहुः । वस्तुतस्तु सगुणविप्रस्य निर्गुणविप्रस्वामिकसुवर्णापहारविषयत्वं
युक्तं तथा न विष्णु विप्रस्य गुणवान्विप्रो निर्गुणस्यापहृत्य च । चतुर्थकालेभुंजानस्त्रिभिर्वर्षैर्व्यपोहतीति
विषयांतरमप्युक्तं तत्रैव यदा च निर्गुणः स्वामी क्षत्रियो वैश्य एव च । हृत्वा च ब्राह्मणो वीर तदापस्तंबभा
षितं तत्रैव क्षत्रियस्य गुणद्वास्यहृत्वा विप्रस्तु निर्गुण । चतुर्थकालेभुंजानस्त्रिभिर्वर्षैर्व्यपोहतीति इदं च
वाक्यद्वयं न्यूनाधिकपरिमाणविषयत्वादविरुद्धं यत्तु सुमंतु । सुवर्णस्तेयी मासं सावित्र्याष्टसहस्रमाज्या
हुत्या सानुकूयात् प्रेत्य हं त्रिरात्रमुपवासस्तप्तकृच्छ्रेण च पूतो भवतीति । अच्चापस्तंब स्तेयं कृत्वा सुरां पी
त्वा संवत्सरं चरेदिति तत्सुवर्णमात्रदशभागापहारविषयं । यत्तु संमंतु सुवर्णस्तेयी द्वादशरात्रं वायुभक्षः पूतो
भवतीति तन्मासापहारविषयमिति प्रांच । निष्फजकायिकवृत्तिविषयत्वं तु संप्रक्रमितान्नरायां इदं मन
सि पापं ध्यात्वा प्रणवपूर्वव्याहृतीर्मनसापि तथा व्याहृत्य प्राणायामं त्रिरात्रं चरेत् । प्रवत्रो कृच्छ्रं द्वादशरात्रं चरेदिति
व्याहृत्यादि तल्प । षट्त्रिंशन्मते यवमात्रे सुवर्णस्य प्रायश्चित्तं दिनद्वयं सुवर्णो कृष्णलं द्वे कमपहृत्य द्विजो

प्रा॰म॰
॥६५॥

ग्रम॰ कुर्यात्सांतनं कृच्छ्रं ततस्तायस्यापमुत्तये। अपहृत्य सुवर्णस्य माषमात्रं द्विजाधमः। गोमूत्रयावकाहार
स्त्रिभिर्मासैर्व्यपोहति सुवर्णस्यापहरणे वत्सरं यावकी भवेत्। ऊर्ध्वं प्राणांतिकं ज्ञेयं। अथवा ब्रह्महव्र
तं वत्सरमिति सुवर्णपरिमाणं च द्वादशगौरमाषादिकं हेमं विषयं। प्राणांतिकं तु ज्ञानपूर्वकापहारवि
षयं। अज्ञानतस्तु द्वादशाब्दिकं विप्रस्य यत्तु मनुवदेव। विप्रे तु सकलं देयं पादोनं क्षत्रिये स्मृतं। वैश्ये द्वैपा
दशेषस्तु शूद्रजातिषु शस्यत इति विष्णूक्तेः क्षत्रियादेः पादपादह्रानिरिति। तदप्युक्तं। द्विविधं स्तेयं बलाव
ष्टंभेनेन क्रियमाणं सहसाख्यमेकमपरं चौर्यं तत्राद्ये पादानादिवाधकेन चतुर्विधसाहसविषयेण प
र्यदा ब्राह्मणानामिस्यांगिरसोक्तस्य द्वैगुण्यस्यैव न्याय्यत्वात्। द्वितीयेपि विप्रस्वामीकसुवर्णस्य देवब्राह्मण
राज्ञां तु विज्ञेयं द्रव्यमुत्तममिति नारदेनोत्तमद्रव्यतोक्तेः स्तेन च दंडभूयस्त्वात् परेषु ब्राह्मणसंस्थास्वित्यते
नविप्रस्वामिकगोवधे दंडगौरवादिदूषोतिक्रमे दंडभूयस्त्वमिति वचनाच्चात्र। पितृक्षत्रियादीनां प्रायश्चित्तन्नाधि रामः
कमेवोचितं न तु पादपादन्यूनमिति कामतः सुवर्णस्तेये तु याज्ञवल्क्यः। ब्राह्मणस्वर्णहारी तु राज्ञे मुस ६५७॥

लमर्पयेत्। स्वकर्मख्यापयंस्तेन हतो मुक्तोथवा शुचिः। मुक्तः प्रहृतोपि जीवन्नप्रहृत एवेत्यर्थः। अग्नने
वृत्तु राजेति गौतमेनाप्रहारे राज्ञो दोषोक्तेः। ततो मुसलादायकं दोहन्यात्तु तेस्वयं यदि जीवति शास्तेन स्तेनस्ते
यदि मुच्यत इति संवर्तोक्तेश्च एतेन स्तेनयोषाणां वहूनामंतिसंभावनाम प्रहृतोपि जीवन्नशुद्ध इति माधवो
क्तिरयास्तामानाभावाद्याम्नविष्ये महत्तपहृते पुत्रतथाते व हृते गुरु हृतद्रव्यविशेषाद्देरवामिनस्तकस्य
च प्रयोजनविशेषाच्च विशेषाद्देशकालयोः अनुबंधविशेषाच्च प्रायश्चित्तं प्रकल्पयेत्। तत्रैव यदस्या
हृतं द्रव्यं तत्तस्यैव विनिर्दिशेत्। प्रायश्चित्तं ततः कुर्यादेवं शुद्धिमवाप्नुयात्। विष्णुः हत्वैवापहृतं द्रव्यं धनं क॰
स्माद्युत्पादयेत्। प्रायश्चित्तं ततः कुर्यात्कल्मषस्यापनुत्तये। अत्र विशेषमाह मनुः। चरेत्सांतपनं कृच्छ्रं
तन्निर्यात्यात्मशुद्धये इति ततद्रव्यं निर्यात्यस्वामिने दत्वा शुद्धये प्रायश्चित्तयोग्यत्वायेत्यर्थः। अतएव
वनविन्ध्ये तन्निर्यातेति वा कं तु प्रवदंति मनीषिणः। तत्पूर्वं चैव योग्यः स्यात्स्वकेनात्र संशयः। तत्पूर्वं प्रातिस्वि
कप्रायश्चित्तात्पूर्वं योग्यस्येति चाव प्रधानो निर्देशः। योग्यत्वस्येत्यर्थः। केचित्तु सुवर्णपरिमाणाद्द्वंचो। रि

तं धनं स्वामिने दत्वा स्वशुद्धये सांतपनं कृच्छ्रं कुर्यादिति मिताक्षरायां। तच्छेन तत्सुवर्णमितं द्रव्यं ततोन्यूनं यो
ग्यस्य शुद्धेः कारकमिति तन्नविष्यार्थस्याक्षा। सुवर्णस्तेये तु एकादशांशाधिकं चोरितं धनं स्वामिने देयं। त
घाच मिताक्षरायां। स्तेये ब्रह्मस्वस्य ततस्य सुवर्णादेः कृतेः पुनः स्वामिने पञ्चकृतं देयं हर्त्राविकादशांशाधिकं लघुवि
सु। स्तेये ब्रह्मस्वस्य ततः सुवर्णहरणे कृते। पश्चात्तेनैव दातव्यं तस्मै तत्त्वेकादशाधिकं। गुणसंशुद्धिर्नावायत
तश्चांद्रायणत्रयं संवत्सरेण दातव्यं निपुणं शुद्धिमिच्छता। अभावे कांचनस्यास्य हुतमेतच्चतुर्गुणं चरेद्य
तात्मा निःसंग। पूर्णं वर्षं चतुष्टयं समासे कांचनं गाश्वरजतं चापि शक्तितः देयमन्यद्विजायैः स्वशुद्धये पापप
त्वां तय इति गुणसंशुद्धिरामशुद्धिः चांद्रायणत्रयमिति। यवमध्यादीनि त्राणि चांद्रायणानि वत्सरमभ्यसे
दित्यर्थः। इदं च दोषप्रायश्चित्तादिकं रसवेधाद्यापादितसुवर्णस्यापहर्तुः पतितत्वादौ न भवति सुवर्णत्वजाति
सम्भावाभावात्। अथ सुवर्णस्तेयसमेषु मनुः। निक्षेपस्यापहरणं नराश्वरजतस्य च। भूमिवज्रमणीनां
च रुक्मस्तेयसमं स्मृतं स्मृत्यंतरे। पुरुषाणां कुलीनानां नारीणां च विशेषतः। मुख्यानां चैव रत्नानां हरणे

वधमर्हति याज्ञवल्क्यः। अश्वरत्नमनुष्यस्त्रीभूधेनुहरणं तथा निक्षेपस्य च सर्वस्य सुवर्णस्तेयमितं मनुष्य
हरणेनैव सिद्धे स्त्रीपदं षड्वार्षिकत्वार्थः। विष्णुः ब्राह्मणभूहरणं सुवर्णस्तेयसममिति। अत्र षडष्टमित्कल्प
रिभाषायां। अल्पमूल्यरत्नादौ तु चतुर्विंशतिमते रत्नानां हरणे विप्रश्चरेच्चांद्रायणत्रयमिति। मनुरपि। म
णिमुक्ताप्रवालानां ताम्रस्य रजतस्य च। अयस्कांस्योपलानां च द्वादशाहं कणान्नता। स एव। मनुष्याणां तु ह
रणे स्त्रीणां क्षेत्रगृहस्य च। वापीकूपतडागानां शुद्धिश्चांद्रायणं चरेदिति मनुष्योदास। स्त्री दासी स्मृत्यंतरे।
रूप्यं हृत्वा द्विजो मोहाच्चरेच्चांद्रायणव्रतं। गद्याणे दशकादूर्ध्वमाशतात्तान्द्विगुणं भवेत्। आसहस्राच्च
त्रिगुणमूर्ध्वं हेमविधिः स्मृत इति। गद्याणो गुर्जरदेशे प्रसिद्धः। रत्नत्रायकांस्यमनुष्यापहरे प्रायश्च
त्ते यज्ञार्थ नियमेवमल्पेपत्ता ज्ञेयास्तु। धान्यान्नधनचौर्याणि कृत्वा कामाद्द्विजोत्तमः। सजातीयगृहादेव
कृच्छ्राद्धेन विशुध्यतीति स्मृत्यंतरे। अष्टापद्यं स्तेयकिल्बिषं शूद्रस्य द्विगुणोत्तराणीतरेषामिति किल्बि
षं दंडः सशूद्रस्यापह्रियमाणद्रव्याद्दष्टगुणः। विद्वत्त्वे विप्राणां तु षोडश द्वात्रिंशच्चतुःषष्टिगुण इत्यर्थ

प्रा॰ म॰
॥६७॥

अतएव मनुः। अष्टापद्यं हि शूद्रस्य स्तेये भवति किल्बिषं। षोडशैव तु वैश्यस्य द्वात्रिंशत्क्षत्रियस्य च। ब्राह्मणस्य
चतुःषष्टिः पूर्णं वापि शतं भवेत्। शंखः। तथा धनस्यापहारे मणीनां रजतस्य च। धान्यापहरणे चैव कुर्यात्सं
वत्सरं व्रतमिति। इदं च दशकुंभधान्ये तन्मूल्ये च धनादावपकृतेर्नेयं धान्यं दशभ्यः कुंभेभ्यो हरतोभ्यधिको
वध इति मनूक्तेः। कुंभेभ्यो हरतोभ्यधिको वध इति मनूक्तेः। कुंभमाह कात्यायनः। दशद्रोणा भवेद्खारी कुंभो
पि द्रोणविंशतिरिति। द्रोणस्तु पलं च कुडवः प्रस्थ आढको द्रोण एव च। धान्यमानेषु विज्ञेयाः क्रमशो मी चतु
र्गुणा इत्येवं क्रमात् ज्ञेयं। यत्तु जाबालः। पक्वान्नमौषधं तैलं शय्यादासनुपानहौ। कांस्यायस्ताम्रसीसं वा
अर्घंके क्षा इमे वचान्ये उदके फलमूलेषु पुष्पपर्णसुगंधिषु मद्ये द्राक्षामधुमांसेषु संतोष्य स्वामितं ततः। पा
दं निवेद्य विप्रेभ्यः प्रायश्चित्ते न युज्यत इति। तच्छूद्रपादमित्यर्थः। तदधिकपरिमाणगुडादिविषयं जाबा
लः। मणिमुक्ताप्रवालानां ताम्रस्य रजतस्य च। अयः कांस्योपलानां च द्वादशाहं कणान्नतेति। द्वादशगु रामः
णप्रायश्चित्तदर्शनात् तन्मूल्याद्द्वादशगुणमूल्यमणिमुक्ताद्यपहारविषयं तु विष्णुः। रजताभ्यगोन्नमिक ॥६८ पत्री

म्नां नासहस्रहरणे चान्द्रायणमिति। तत्किंचिदधिकविषयं मनुः। कार्पासकीटजोर्णानां द्विशफैकशफ
स्य च। पक्षिगंधौषधीनां च रज्ज्वाश्चैव त्र्यहं पय इति। कीटजाः पट्टादयः। देवद्रव्यापहारे तु मंतुदेहद्विजद्रव्य
हर्त्ताप्सु निमग्नोघमर्षणमावर्तयेदिति। अत्र संवत्सरपक्षमासकेन्नावत्कालानाहृति ज्ञेया। स्तेयप्रसंगाद्वृ
त्तिछेदे प्रायश्चित्तमाह। शंखः। यस्य यस्य तु वर्णस्य वृत्तिछेदं समाचरेत्। तस्य तस्य वधे प्रोक्तं प्रायश्चित्तं स
माचरेत्। अपकृत्य तु वर्णानां विप्रो न्नमिप्रमादतः। प्रायश्चित्तं वधे प्रोक्तं ब्रह्मणानुमते चरेदिति। एतच्च वृत्त्यह
न्नस्य पहारे ज्ञेयं। अपहारन्नाशस्य च त्वा तत्ज्ञानपूर्वपरस्यादन वाचितात्प्रमादत इति शास्त्रार्थापरिज्ञान
परं। अत्रो भयनव धनिमित्तक प्रायश्चित्तानि दे शात्यादीनं। नच्च कामेकामोक्तस्यन्न कामेनकामोक्त
स्येति स्तेयापवादमीह शंखः। अस्तेयमन्नपेकाष्टमस्तेयं च तृणं गवे। कन्याहरणमस्तेयं यो हरन्न
नलंकृतामिति। कन्याहरणं राक्षसविवाहपरं। मनुरपि। द्विजोध्वगः क्षीणवृत्तिर्द्वाविक्षू द्वे च मूलके
आददानः परक्षेत्रान्न दंडं दातुमर्हति। तथा। चणकव्रीहिगोधूमयवानां मुद्गमाषयोः। अनिषिद्धैर्ग

प्रा॰म॰ हीनत्वेप्युष्टिरेकः परिकल्पिते ॥ तथैव समसमे भक्ते भक्तानि षडनश्नता ॥ अभ्यस्तनविधानेन दर्तव्यहीन
॥६७॥ कर्मणा इति ॥ इति भट्टनीलकंठकृते प्रायश्चित्तमयूखे स्तेयप्रायश्चित्तानि ॥ अथ अगम्यागमनप्राय
श्चित्तानि ॥ तत्र गुरुतल्पे शंखः ॥ अधःशायी जटाधारी पर्णमूलफलाशनः ॥ एककालं समश्नीयाद्वर्षे तु द्वा
दशे गते ॥ रुक्मस्तेयी सुरापश्च ब्रह्महा गुरुतल्पगः ॥ व्रतेनैतेन शुध्यंति महापातकिनस्त्विम इति
गुरुतल्पगो गुरुभार्यागामी ॥ गुरुः पिता ॥ अत एव संवर्तः ॥ पितुर्भार्यां तु विज्ञाय मातृवर्जं नराधमः ॥ भ
गिनीं च निजां गत्वा निष्कृतिर्न विधीयत इति ॥ निष्कृति वर्जनं मरणरूपात्वस्यैव ॥ पितुर्भार्यां तु विज्ञा
य मातृवर्यं नराधम जननीं वाप्यविज्ञयेनाम्नतः शुद्धिमाप्नुयादिति षडुत्रिंशन्मतात् ॥ अत्र जननागमने
न महापातकं किं त्वतिपातकं ॥ मातृगमनं दुहितृगमनं स्नुषागमनमित्यतिपातकानीति विष्णूक्तेः ॥
मातृदुहितृभगिनीस्नुषागमनान्यतिपातकानीति मदनरत्ने वीयेवृद्धहारीतोक्तेश्च ॥ एतेन गुरुश्वश्रू सावर्णगते रामः
तिकर्मधारयेण जननीगमनं महापापमिति मदनरत्नोक्तिः स्यात् ॥ यत्तु शूलपाणिः ॥ आचार्यस्तु पिता ज्ये ९६०

ष्टो भ्राता चैव महीपतिः ॥ मातुलः श्वसुरस्त्राता मातामहपितामहौ ॥ वर्णश्रेष्ठः पितृव्यश्च पुंस्येते गुरवो म
ता इति देवलोक्तेः ॥ आचार्यः श्रेष्ठो गुरूणामिति गौतमोक्तेः ॥ त्रयः पुरुषस्य गुरवो भवंति माता पिता आ
चार्यश्चेति विष्णूक्तेः ॥ अत आचार्यादिपत्नीगमनमपि महापापमित्याह तन्न ॥ आचार्यपत्नीं स्वसुतां गच्छं
स्तु गुरुतल्पग इति आचार्यादिपत्नीषु गुरुतल्पातिदेशविरोधात् नाचातिदेशो हीनवर्णपत्नीपरो माना
भावात् ॥ देवलादिवचोमित्याचार्यादीनां पूज्यत्वपराणि कथं च गुरोः श्यालीकनिर्बंध इत्यत्र गुरुदंकेव
लपितृव्यपरमत्वाचार्यादिपरमिति विरुद्धं शूलपाणेर्वचः ॥ आदेयं प्रायश्चित्तांतरमाह अंगिराः ॥ म
हाव्रतं चरेद्वापि दद्यात्सर्वस्वमेव चेति ॥ व्यभिचरितायां सवर्णायां मातरि सकृद्गमने तु योगी चांद्रायण
वीत्रीन्मासान् अथवा त्वर्द्धसंहितामिति ॥ गमने त्वित्थं त्वेतान्येव प्रायश्चित्तानि द्विगुणानि ॥ गमने यच्छूतं प्रोक्तं
गर्भे तत्द्विगुणं भवेदित्युक्तानोवाक्यात् ॥ गमनाद्यत्तावपि प्रायश्चित्तद्वृत्ति ॥ कामतो जनन्यातिरिक्तगु
रुभार्यागमने तु याज्ञवल्क्यः ॥ सेन्नेयः सयते सार्द्धं आयस्यायोषितास्वपेत् ॥ तप्ते शरीरदाहइमे मनुरः

प्रा॰म॰

॥ ६९ ॥

पि स्वयं वाशिश्नवृषणावुत्कृत्याधाय चांजलौ॥ नैर्ऋतिं दिशमातिष्ठेदातिपातादजिह्मग इति॥ आ
तिष्ठेत् गच्छेत्॥ निपातो मरणं॥ अयमेव च दंडः॥ आसामन्यतमां गच्छन् गुरुतल्पग उच्यते॥ शिश्नस्योत्कर्तना
न्नान्यो दंडो विधीयत इति देवलोक्तेः॥ जनन्यामकामतोपि एतदेव मरणांतं प्रायश्चित्तं द्वयैवोध्यं जन
न्यां कामतस्तु वसिष्ठः॥ निष्कालको घृताक्तो गोमयाग्निना पादप्रभृत्यात्मानमवदाहयेदिति शिरस्य
वस्थिता अकालकाः॥ केशाः कालकाः॥ निर्गताः कालका अस्मादसौ निष्कालकः मुंडितशिरा इत्यर्थः॥ आ
से॰ गमनीयत्रौ चेदमेवान्यानुक्तेः॥ एतानि च प्रायश्चित्तान्यौरसपुत्रस्यैव दत्तकादीनां नु नैकस्य मिति नि
बंधकृतः जनन्याकामतः प्रवृत्तस्य रेतःसेकादर्वाङ् निवृत्तौ द्वादशाब्दं अकामतः षडब्दं तत्सपत्न्याकामतः
षडब्दं अकामतस्त्वर्धमिति कल्प्यं॥ शूद्रस्य विप्रागमने तु प्रचेताः॥ शूद्रस्य ब्राह्मणीगमो हाञ्छतः शु
द्धिमिच्छतः पूर्णमेव व्रतं देयं मातीयस्माद्वित्यस्येति॥ गुरुपत्न्युक्तास्वपि साधारणस्त्रीषु गमने गुरुतल्प

रामः

दोषो नास्तीत्याह व्याघ्रपादः॥ जातुकंपारदार्यं च कन्यादूषणमेव च साधारणस्त्रियो नास्ति गुरुतल्पत्व ॥ ८६२ ॥

मेव चेति॥ साधारणस्त्री वेश्या॥ अथ भगिन्यादिगमने मनुः॥ रेतःसेकः कुमारीषु स्वयोनिष्वंत्यजासु च
सख्युः पुत्रस्य च स्त्रीषु गुरुतल्पसमं विदुरिति॥ स्वयोनिर्भगिनी॥ कुमारी उत्तमजातीया कन्या सका
मा स्वतुजो मातु न दोषस्त्वन्यथा दमः॥ दूषणे तु करच्छेद उत्तमायां वधस्तथेति तत्रैव दंडविशेषोक्तेः॥ या
ज्ञवल्क्यः॥ सखिभार्याकुमारीषु स्वयोनिष्वंत्यजासु च सगोत्रासु सुतस्त्रीषु गुरुतल्पसमं स्मृतमिति॥ चं
डालावसायिनः इति चंडालादीनाह याज्ञवल्क्यः॥ ब्राह्मण्यां क्षत्रियात्सूतो वैश्याद्वैदेहकस्तथा॥ शूद्रा
ज्जातस्तु चांडालः सर्वधर्मबहिष्कृतः॥ क्षत्रिया मागधं वैश्यात् शूद्रात्क्षत्तारमेव च॥ शूद्रादायोगवं वैश्या
जनयामास वैश्यसुतमिति॥ विष्णुः॥ पितृष्वमातीमहमातुलपत्नीनिगमनं गुरुदारगमनसमं पितृष्वसृ
मातृष्वसृगमनं श्रोत्रियर्त्विगुपाध्यायमित्रपत्नीनिगमनं चेति॥ अत्र मास्यातिदेशाद्धं प्रायश्चित्तं मित्तु
क्तं परिभाषायां॥ याज्ञवल्क्यः॥ पितुः स्वसारं मातुश्च मातुलानीं स्नुषामपि मातुः सपत्नीं भगिनीं आचा
र्यतनयां तथा॥ आचार्यपत्नीं स्वसुतां गच्छंस्तु गुरुतल्पग इति॥ मातुः सपत्नी हीनवर्णा॥ समोत्तमव

र्गागमनस्य गुरुतल्पतोक्तेः। नारदः। माता मातृष्वसा श्वश्रूर्मातुलानी पितृष्वसा। पितृव्यसखिशिष्यस्नुषा दु
हिताचार्यभार्या च सगोत्रा शरणागता। राज्ञी प्रव्रजिता साध्वी धात्री वर्णोत्तमा च याः। आसामन्य
तमां गच्छन्गुरुतल्पग उच्यते इति राज्ञी अभिषिक्तक्षत्रियपत्नी क्षत्रियांतरपत्न्यां तु प्रायश्चि
त्तस्य वक्ष्यमाणत्वात् मातृग्रहणं दृष्टांतार्थं। अत्र च ताद्रूप्यातिदेशो तिदिष्टरूपमानं प्रायश्चित्तं यादोनं। भव
वेतातिशुद्रपादिपरिभाषायामेव तच्चाकामत एकरात्रादूर्ध्वमसंतताभ्यासविषयं। अत्रैव कामतोभ्या
तीभ्यासे तु हृद्दयमः। रेतःसिक्त्वा कुमारीषु स्वयोनिष्वंत्यजासु च सपिंडापत्यदारेषु प्राणत्यागो विधी
यते इति। चंडाल्यादीनां कामाकामतो यो सकृद्गमने यम। चंडालपुल्कसानां तु भुक्त्वा गत्वा च योषितं
कृच्छ्राब्दमाचरेत् ज्ञानादज्ञानादैंदवद्वयमिति इदमेव च कृत्यादिगमनेपि ज्ञेयं। बृहद्यमः याज्ञ
वल्क्याद्येनेकवचनोपात्तेन तत्तुल्यधर्मत्वात्। बहूनामेकधर्मिणामेकस्यापि यदुच्यते सर्वेषां तत्भवे
त्कार्यमेकरूपा हि ते स्मृता इति विज्ञानेश्वरादयः। अकामत एकरात्राभ्यासे तु त्रैवार्षिकं तथा च

मनुः। यत्करोत्येकरात्रेण वृषलीसेवनात् द्विजः। तद्भैक्ष्यभुग्जपन्नित्यं त्रिभिर्वर्षैर्व्यपोहति॥ इति। वृषली चांत्र चं
डालीति अपरार्कमिताक्षराकल्पतरुमदनदेवीयादिषु तथा च मिताक्षरायां स्मृत्यंतरे। चंडाली बंध
की वेश्या रजस्था या च कन्यका। ऊढा या च सगोत्रा स्याद् वृषल्यः पंच कीर्तिता इति। शूद्रीति शूलपाणि
स्मृत्यंतरे वाक्यं त्वनाकरमिति मेते। अत्र चैकरात्रेणेत्यंतसंयोगवाचित्वात्तथाभ्यासोवगम्य
ते। कामत एकरात्राभ्यासे तु द्विगुणं। माधवीये व्याघ्रः। आश्रितस्यापि विप्रस्य दुहिता ये स्वयो
षितः। आचार्यस्य च राज्ञश्च भार्या प्रव्रजिता तथा। धात्री पुत्री च पौत्री च सखी मातुलस्तथैव च। पितुः सखी
तथा गत्वा गुरुतल्पव्रतं चरेत् एकरात्रादूर्ध्वं कामतोत्यंताभ्यासपरमिदं। अस्मिन्नेव विषये मनुः। चंडा
लांत्यस्त्रियो गत्वा भुक्त्वा च प्रतिगृह्य च प्रति गृह्य च। पतत्यज्ञानतो विप्रो ज्ञानात्साम्यं तु गच्छतीति। अत्रा
ज्ञानात्पत्वादं। ज्ञानतो मरणं ज्ञानन्यां च भगिन्यां च स्वसुतायां तथैव च। स्नुषायां गमनं चैव विज्ञेय
मितिपातकं। अतिपातकिनस्त्वेते प्रविशेयुर्हुताशनं। न ह्यन्या निष्कृतिस्तेषां विद्यते हि कथंचनेति

प्रा०म०
७०॥

कात्यायनोक्ते। बृहद्धारितोपि मातृदुहितृभगिनीस्नुषागमनान्यतिपातकानि सद्याग्निप्रवेशोति पा
तकिनामिति यत्तु संवर्त्तः। मातरं यदि गच्छेत्तु स्वसुस्नुषां पुरुषाधमः। न तस्य निष्कृतिर्विद्यास्वकांडछित्तिरं त
थेति। भ्रातृभार्यागमने संवर्त्तः। पितृव्यभार्यागमने भ्रातृभार्यागमने तथा। गुरुतल्पव्रतं कुर्यान्ना।
न्या निष्कृतिरुच्यत इति एतच्चाकामतो बहुकालाभ्यासविषयं। कामतस्तु मरणांतिकमेव। यत्तु याज्ञ
वल्क्यः। अनियुक्तो भ्रातृजायायां गच्छंश्चांद्रायणं चरेदिति तत्सवर्णव्यभिचरित भ्रातृजायाविषयमिति
कनिष्ठभ्रातुर्भार्यागमने चतुर्विंशतिमते। भ्रातुश्चैव कनिष्ठस्य भार्यां गत्वा तु कामतः। कृच्छ्रत्रयं सांतपनं
प्रकुर्वीत यवापि वेति। आचार्यभार्यागमने जातुकर्ण्यः। आचार्यादिस्तु भार्यासु गुरुतल्पव्रतं चरेत्। आ
दिपदाद्युपाध्यायादीनां ग्रहणं। यत्तु चतुर्विंशतिमते चरेच्चांद्रायणं विप्रो गत्वोपाध्याययोषितं।
आचार्यस्य परां कृत्वा तु बौधायनवचो यथेति। तद्व्यभिचरितोपाध्यायादिपत्नीपरं। यत्तु बृहद्यमः। रामः
चांडालीपुल्कसीम्लेच्छीस्नुषा च भगिनी सखी। मातापित्रोः स्वसारं च निक्षिप्ता शरणं गता। मातुलानी ८६२

प्रव्रजितां समगोत्रां च पयोषितां शिष्यभार्यां गुरोर्भार्यां गत्वा चांद्रायणं चरेदिति। यत्तु सुमंतुः। मातृष्वसृस्नु
षाभगिनीयोगे चांडालीगमने षुतमहल छ्रत्रयं सांतपनं चेति। यच्चांगिराः। पतितां स्त्रियं गत्वा तु स्नाच प्रति
गृह्य च। मासोपवासं कुर्वीत चांद्रायणमथापि वेति। यच्च संवर्त्तः। चांडालीं पुल्कसीं म्लेच्छीं श्वपाकीं पतितां तथा।
एता गत्वा द्विजो मोहाच्चरेच्चांद्रायणं व्रतं। यच्च हारीतः। गुरुतल्पगो मन्मयीं स्त्रीं प्रतिकृतिमग्निवर्णां कृत्वा
तामालिंग्य मृत्युना पूतो भवति। एवमेव पितृव्यस्त्रीगमने स्वसृमातृपितृष्वसृगमने कन्यासगोत्रास्वस्त्रया
भगिनीगमने चांद्रायणं वेति। तत्र चांद्रायणं तेन। सैकादशाब्दिके वृत्तौ ज्ञेयं। यदपि संवर्त्तः। भगिनीं मातुराप्तां च
स्वसारं चान्यमातृजां। एता गत्वा द्विजो मोहात्तप्तकृच्छ्रं समाचरेत्। कुमारीगमने चैव व्रतमेतन्निर्दिशेत्। तथा
गुरोर्दुहितरं गत्वा स्वसारं पितुरेव च। तस्या दुहितरं चैव चरेच्चांद्रायणं व्रतं। मातुलस्य सुतां गत्वा मातुलानीं स
नाभिनीं। एता गत्वा स्त्रियो मोहात्पराकेण विशुध्यतीति। तद्व्यवहितपतितभगिन्यादिगमनविषयं। यत्तु वि
ष्णुः। चांडालीगमने तत्साम्यमाप्नुयात्। अज्ञानाच्चांद्रायणं। यच्च गौतमः। चांडालीगमने कृच्छ्राब्दोऽमत्या

प्रा.मु. मादृशादात्रमिति तत्र सान्तपनकृच्छ्रद्वयोर्विषयकत्वं। चान्द्रायणस्यापि अज्ञानतः सकृद्दारोहणमात्रे द्रष्टव्य
७२ त्र। बौधायनः। मातृष्वसापितृष्वसाभागिनेयीस्नुषामातुलानीसगम्यागमने कृच्छ्रातिकृच्छ्रौ चान्द्रायणमि
ति। संवर्त्तः। सखिभार्यां समारुह्य श्वश्रूं चैव हि मानवः। अहोरात्रोषितो भूत्वा तप्तकृच्छ्रद्वयं चरेत्। चतु
र्विंशतिमते। मातुःस्वसृस्त्रियं गत्वा पितृव्यतनयां तथा। तप्तकृच्छ्रं प्रकुर्वीत षड्रात्रं तत्सुतासु च। गुरोर्दुहि
तरं गत्वा पराकं च समाचरेत्। भागिनेयीं द्विजो गत्वा चरेच्चान्द्रायणं व्रतं। मातुलस्य सुतां गत्वा पितुः पितृ
ष्वसृस्त्रियं तथा प्राजापत्यं प्रकुर्वीत तद्धारीतवचनं यथा। मातुःस्वसृस्त्रीयां गत्वा भार्यां गत्वा तु कामतः। पि
तृव्यतनयां चैव सपादं कृच्छ्रमाचरेत्। दौहित्रे पुत्रतनयां चरेच्चान्द्रायणं व्रतं। तत्सुतां तत्सुतां गत्वा पराकं च
समाचरेत्। सबंधिनं स्त्रियां गत्वा पादकृच्छ्रं समाचरेत्। विधवागमे कृच्छ्रं महोरात्रसमन्वितं। आचार्यस्य
पराकं तु बौधायनवचो यथा। सखिभार्यां समारुह्य जातिस्वजनयोषितं। सकृत्वा प्राकृतं कृच्छ्रं पादं कुर्यात्त राम:
तः पुनः। कुमारीगमने विप्रश्चरेच्चान्द्रायणं व्रतं। पतितां तु द्विजो गत्वा तदेव व्रतमाचरेदिति वृहन्मनुः। मातु ६६४

र्गमने पितृगमने तथा। एतास्वेकामतो गत्वा द्विजश्चान्द्रायणं चरेदिति संवर्त्तः। असतीर्मातुलानी च स्वसा
रं चान्यमातृजां। एता द्विजः स्त्रियो गत्वा तप्तकृच्छ्रं समाचरेत्। इत्याद्यनेकस्मृतिवचनानि संबंधसन्निक
र्षविप्रकर्षापेक्षया योजनीयानि वर्षाणीत्यनुवृत्तौ गौतमः। द्वे परदारे त्रीणि श्रोत्रियस्य द्रव्यलाभे चोत्सर्गो य
थास्थानं वा गमयेदिति तया पहृतं धनं तदुत्सृज्य तदायत्तेन्यैव वा प्रत्यर्पणीयमित्यर्थः। वार्षिकप्राकृतं व्रतमु
क्तास एव उपपातकेषु चैवमिति यमः। देवर्षेः परमार्येसु त्रीणि अश्रोत्रियपत्नीष्विति। तत्रैव व्यवस्था स्थाप
नीयानि। अतएव वृद्धरवः। वैरूप्याममवकीर्णः संवत्सरं ब्रह्मचर्यं त्रिषवणं वानुतिष्ठेत्। क्षत्रियायां देवर्षे
त्रीणि ब्राह्मण्यां वैरूप्यावच्छन्नायामिति वैरूप्यावच्छेति ब्राह्मणपरिणीतायां। शूद्रपरिणीतायां तु षाण्मा
सिकमेव। शूलपाणिस्तु महत्कृच्छ्रं वैरूप्यावत् असवर्णां तु षाण्मासिकमित्याह तेन क्षत्रियस्यापि कुर्यादत्रैव
संगम इति। एवं क्षत्रियस्य वैरूप्यादिस्त्रीपुत्क्रमेण वार्षिकषाण्मासिकं च। एवं वैरूप्यस्यापि वैरूप्यास्त्र्यां वार्षि
कषाण्मासिके। अनुपनुक्तागमने आपस्तंबः। सवर्णायाममन्यपूर्वायां सकृत्सन्निपाते पादः पतत्येवमभ्यासे

प्रा·म·

१७३ पादः पादश्चतुर्थे च सर्वमिति ॥ अनुपनुक्ता या मेकस्यां श्रोत्रियपत्न्यां गमने पादस्त्रैवार्षिकं तादृश्यां द्वितीया-
यांषड्वर्षं तृतीयायां नवाब्दं चतुर्थ्यां द्वादशाब्दं अनन्यतस्त्वायामित्युक्ते रेकस्यामेव चतुरभ्यासेनेदं प्रायश्चित्तं कि
तु पादकपादन्यूनं कल्प्यमिति शूलपाणि विज्ञानेश्वरौ ॥ व्यभिचरितक्षत्रियावैश्यागमने स एव ॥ क्षत्रियांवा
ष्यवैश्यां वागच्छेद्यः कामभोहितः तस्य सांतपनं कृच्छ्रं भवेत्तस्यापमोचकं ॥ तत्सवर्णानुलोमविषयं यत्तुस
एव ॥ विप्रामस्वजनां गत्वा प्राजापत्यं समाचरेदिति ॥ तद्व्यभिचरितं ब्राह्मणीविषये ब्राह्मणस्य यत्तु व
सिष्ठः ॥ ब्राह्मणश्चेदप्रेक्षापूर्वकं ब्राह्मणदारानभिगच्छेन्निवृत्तकर्मणोतिकृच्छ्रइति अप्रेक्षाअज्ञानं ॥ निवृ
त्तधर्मकर्मणो दारानित्यन्वयः ॥ ब्राह्मणस्य स्वैरिण्यां प्रायश्चित्तमाह यमः ॥ ब्राह्मणो ब्राह्मणीं गच्छेत् द्विजेद्य
न्मृगाजिनं ॥ क्षत्रियायां धनुर्दद्याद्वैश्यायामाय सांशिकां ॥ शूद्रांगत्वा तथा विप्रउदकुंभं द्विजातये ॥ त्रिरात्रोषि
तःस्नात्वा दद्यात्समार्जनं तथेति ॥ व्यक्तत्रिरात्रोपोषितः स्नात्वेति प्रत्येकं संबध्यते ॥ एतच्च बंधकीविषयमित्य राम:
न्ये स्वैरिण्यां प्रायश्चित्तांतरमाह तु शंखलिखितौ ॥ स्वैरिण्यां वृषल्यामवकीर्णः सचैलस्नानमुदकुंभं ब्रा २९५

ह्मणाय दद्यात् वैश्यायां चतुर्थकालाहारो ब्राह्मणान् भोजयेत् ॥ क्षत्रियायां त्रिरात्रोपोषितो यवाढकं द
द्याद्ब्राह्मण्यां त्र्यहमुपोषितो घृतपात्रं दद्यादिति ॥ कल्पतरुकारस्तु प्रकीर्णत्वे धर्मस्वतंत्रास्त्विति वाक्य
शेषं पपाठ प्रकीर्णके न चिदनवरुद्धा अस्वतंत्रास्त्ववरुद्धा ॥ तदेवं द्विविधस्वैरिणीगमनेप्येतदेव प्राय
श्चित्तमित्यर्थः ॥ शूलपाणिस्तु स्वैरिण्यां वृषल्यामवकीर्ण इति पठित्वा प्रसूतइत्यनेन स्वैरिण्यामपत्योत्पा
दने तदेव प्रायश्चित्तमित्याह ॥ तन्न ॥ तादृशपाठस्य कल्पतरुप्रभृतिष्वदृष्टत्वात् भौतादने द्विगुणप्रायश्चि
त्तस्य वक्ष्यमाणत्वात् ॥ बंधकीगमने तु षड्विंशन्मते ॥ ब्राह्मणो बंधकीं गत्वा किंचिद्दद्यात् द्विजातये ॥ रा
जन्यां च धनुर्दद्याद्वैश्यं पदत्वा तु चैलकं ॥ शूद्रां गत्वा तु वै विप्र उदकुंभं द्विजातये दिवसोपोषितो वा
स्याद्दद्याद्विप्राय मी भोजनमिति ॥ किंचिदष्टमुष्टितकं धान्यं ॥ अष्टमुष्टि भवेत्किंचिदिति स्मृतेः ॥ प्रायश्चि
त्तांतरमाह प्रचेताः ॥ बंधकीगमने उपस्त्वरूपप्राणायामं कुर्यात् ॥ ब्राह्मणबंधकीं गत्वा कमंडलुं दद्यात् द्वाय
बंधकीमायुधवैश्यबंधकीं प्रतोदमिति ॥ अत्र त्रिषु वर्णेष्वयोपादानात्स्वयमं शूद्रबंधकीपरं ॥ स्वैरिण्या

प्रा॰म॰

॥७५॥ स्यात्संचमेवंधकीतयेति यत्तु मनुः। शूद्रांशयनमारोप्य ब्राह्मणो यात्यधोगतिं जनयित्वा सुतं तस्यां ब्राह्मण्या
देव हीयत इति तत्पापगौरवपरं। एतानि च प्रायश्चित्तानि गर्भानुत्पत्तिविषयाणि। तदुत्पत्तौ तु यद्विशेषयु
क्तं प्रायश्चित्तं तदेव तत्र द्विगुणं त्रिगुणं कर्तव्यं तथा चोशना गमनेतु व्रतं यस्याः गर्भे तु द्विगुणं चरेदिति
आपस्तंबः। चांडालगर्भे दस्वपचकपालव्रतधारिणि। अकामतः स्त्रियं गत्वा पराकव्रतमाचरेत्। कामत
स्तु तो वेति। यथा कामतो द्विगुणमुक्तं तथा गर्भेपि। सर्वैश्चतुर्विंशतिमतेनु जातिभेदेन गर्भे प्रायश्चित्तवि
शेष उक्तः। ब्राह्मणीगमने कृच्छ्रं गर्भे सांतपनं स्मृतं। राज्ञीगर्भे पराकस्याद्विजगर्भे तु अर्धाधिकं। शूद्रगर्भे द्वि
जः कुर्याद्विद्वांश्चांद्रायणं स्मृतं। चांडाल्यां गर्भमारोप्य गुरुतल्पव्रतं चरेदिति। तत्रैव। वृषल्यामभिजातस्तु त्री
णि वर्षाणि चतुर्थकालसमये नक्तं भुंजीतेति। एतत्कामतोऽत्यंताभ्यासेन गर्भोत्पत्तौ। अभिजातः उत्पादितग
र्भः। यत्तु हारीतः। ब्राह्मणो वृषलीं गत्वा अहं भवति सूतकी अथास्यां गर्भमाधत्ते पतत्यनु संशय इति रामः
तदेतानि पापगौरवख्यापनपराणि करणं वा प्रसूतो यस्तु वेश्यायां भेदानुद्भियते प्रिया। ज्ञातं सहस्रमन्य ॥६६६॥

स्यागायत्र्यामेति शुद्धतामिति। अत्र कैवर्तीजरकीचैव वेश्यां वापि गतो नरः। प्राजापत्यविधानेन कृच्छ्रेणैके
न शुध्यतीति ज्ञाततपवाके वेश्यासमभिव्याहृतकैवर्त्यादियुगगर्भोत्पत्तिरेपादमेव प्रायश्चित्तमिति। प्रातिलोम्य
व्यवायेतु नारदः। प्रातिलोम्ये वधः पुंसो नार्याः कर्णादिकर्तनमिति। वधः प्रायश्चित्तदंडश्च नार्याः कर्णादिक
र्तनं तु यथोक्तप्रायश्चित्तमनिच्छत्याः। वधे प्रकारविशेषमाह वसिष्ठः। शूद्रश्चेद्ब्राह्मणीमभिगच्छेद्वीरणै
र्वेष्टयित्वा शूद्रमग्नौ प्रास्येद्ब्राह्मण्याः। शिरसि वपनं कारयित्वा सर्पिषाभ्यज्य नग्नां खरमारोप्य महापथमनुसं
व्राजयेत्पूता भवतीति विज्ञायते। वैश्यश्चेद्ब्राह्मणीमभिगच्छेल्लोहितदर्भैर्वेष्टयित्वा वैश्यमग्नौ प्रास्येद्ब्राह्म
ण्याः। शिरसि वपनं कारयित्वा सर्पिषाभ्यज्य नग्नां गौरखरमारोप्य महापथमनुसंव्राजयेत्पूता भवतीति वि
ज्ञायते। राजन्यश्चेद्ब्राह्मणीमभिगच्छेच्छरपत्रैर्वेष्टयित्वा क्षत्रियमग्नौ प्रास्येद्ब्राह्मण्याः। शिरसि वपनं कार
यित्वा सर्पिषाभ्यज्य नग्नां खरमारोप्य महापथमनुसंव्राजयेत्पूता भवतीति विज्ञायते। एवं वैश्यो राज
न्यायां शूद्रश्च राजन्यवैश्ययोरिति। महापथव्रजनं दंडः प्रायश्चित्तं च॥ घृततोके रितिमिताक्षरायां। अपरा

प्रा.म.
॥७५॥ क्षेपूता प्रायश्चित्तं योग्यमिति व्याख्यातं। एतच्चाकर्कमतो कामतस्तु शूद्रस्य मरणे वैकल्पिकं चतुर्विंशत्यब्दं द्वाद-
शाब्दं शूद्रस्यैव क्षत्रियावैश्ययोर्नव वार्षिकं षड्वार्षिकं। यथाह प्रचेताः। शूद्रस्य ब्राह्मणीं मोहाद्गच्छतः शु-
द्धिमिच्छता। पूर्णमेतद्व्रतं देयं मातापि तस्मादितस्य सा। पादहीनास्त्ववर्णासु गच्छतः सार्ववर्णिकं। प्राय-
श्चित्तमिदं देयं त्रगम्यागमनेकमात्र। एतद्विशावैश्यस्याज्ञानतो विप्रागमने नवाब्दं। क्षत्रियस्य तु षडब्दं
एमेव शूलपाणिरपि। यत्तु माधवीये संवर्त्तः। कथंचिद्ब्राह्मणीं गच्छेत् क्षत्रियो वैश्य एव वा। गोमूत्र-
यावकाहारो मासेनैकेन शुध्यतीति तदस्तं व्यभिचरितायामतो गमने ज्ञेयं मितक्षरायां तु त्तरार्द्धमे-
वं कृच्छ्रं सांतपनं वास्या प्रायश्चित्तं विशुध्यति। रजस्वलागमने प्रायश्चित्तमाह योगी। त्रिरात्रं ते घृतं प्रा-
श्य गत्वोदक्यां विशुध्यति। त्रिरात्रोपवासो इत्यर्थः। इदमकामतः सकृत्कृते। अत्रैव कल्पतरौ शंखलिखि-
तौ। रजस्वलावधूतावगमने त्रिरात्रोपवासो इत्यर्थः। इदमकामतः सकृत्कृते। अत्रैव कल्पतरौ शंख रामः
लिखितौ। रजस्वलावधूतावगमने त्रिरात्रोपवासो घृतप्राशनं च कामतः सकृद्गमने शातातपः। रजस्व ॥६६७॥

लागमने सप्तरात्रमिति। यत्तु वसिष्ठः रजस्वलाव्यवाये शुक्लमृषभं दद्यात् तत्कृच्छ्रपिंगलमिति। यदप्याप-
स्तंबः। उदक्यां यदि गच्छेत्तु ब्राह्मणो मदमोहितः। प्राजापत्येन शुध्येत ब्राह्मणानां च भोजनादिति का-
मतोऽभ्यासेऽकामतः सकृद्गमने च। कामतोऽसंतीनवाभ्यासे छिन्नाभ्यासे तु शंखः। पादं तप्तकृच्छ्रं दत्वा पापमुदक्या-
गमने तपेदिति। कामतोऽभ्यासमात्रे तु संवर्त्तः। रजस्वलां तु यो गच्छेद्गर्भिणीं पतितां तथा। तस्य पापस्य शुध्य-
र्थमतिकृच्छ्रं विशोधनमिति। दिनत्रये दात्त्वा प्रायश्चित्तविशेषश्चतुर्विंशतिमते। रजस्वलां तु यो गच्छेत्स एकेन तु
समाचरेत्। सांतपनं द्वितीयेऽह्नि प्राजापत्यं परेऽह्नीति सांतपनो महासांतपन इति मदनपारिजाते
यत्तु माधवीये शातातपः। अनुदकमूत्रपुरीषकरणे श्वपाकस्पर्शे सचैलस्नानं महाव्याहृतिहोमश्च रज-
स्वलागमने त्वनुपातकप्रायश्चित्तमुक्तं तच्चेत्रियपत्नीं कामतोऽसंतानवच्छिन्नाभ्यासविषयं। एतानि रज-
स्वलां तवस्यादिगमने प्रायश्चित्तानि स्वपत्न्यामेव परपत्न्यां तु तादृशं पापरहार्यं प्रायश्चित्तैर्विजातीयैः समु-
च्चीयते। साजात्ये तु न्याधिकेनन्यूनस्य प्रसंगसिद्धिः साम्ये तु तंत्रमिति एवंविधवाद्यगमने तु योऽन्यः तत्र

प्रायश्चित्तं चतुर्विंशतिमते। विधवागमने कृच्छ्रमहोरात्रसमन्वितं व्रतस्यागमने कृच्छ्रं सपादं तु समाच
रेत्। अथ अन्त्यजागमन प्रायश्चित्तं। आपस्तंब। रजकश्चर्मकारश्च नटो बुरुड एव च। कैवर्त्त मेद भिल्लाश्च
सप्तैते अन्त्यजाः स्मृताः। बृहत्संवर्त्तः। रजकव्याधशैलूषवेणुचर्मोपजीविनां। एतासां ब्राह्मणो गत्वा
चरेच्चान्द्रायणद्वयमिति। आपस्तंबः। म्लेच्छी नटी चर्मकारी रजकी बुरुडी तथा। एतासु गमनं कृत्वा च
रेच्चान्द्रायणद्वयमिति। इदं च विप्रस्य कामतः सकृद्गमने। क्षत्रियादेस्तु पादपादह्रासं कल्प्यं। संवर्त्तः।
रजकव्याधशैलूषवेणुचर्मोपजीविनां। स्त्रियो विप्रो यदा गच्छेत् कृच्छ्रं चान्द्रायणं चरेदिति। तदकाम
तः। अत्रैवापस्तंबः। चांडालमेदश्वपचकपालव्रतचारिणां। अकामतः स्त्रियो गत्वा पराकव्रतमा
चरेदिति। यत्तूशना। कापालिकान्नभोक्तृणां तन्नारीगामिनी तथा। ज्ञानात्कृच्छ्राब्दमुद्दिष्टं अज्ञानादैंद
वद्वयं। तत्कामतो ऽभ्यासे। यत्तु शातातपः। कैवर्त्तरजकीचैव वेणुचर्मोपजीविनां। प्राजापत्यविधानेन कृ
च्छ्रेणैकेन शुध्यतीति। तदपरं अस्मिन्नेव विषये द्विस्त्रिगमनाभ्यासे हारीतः। कैवर्त्ती ध्वजिनीचैव योऽग्र

म्याः त्वंत्यसं न वा। कामतस्तु वसन् विप्र एतान्येव समाचरेत्। द्वौ मासौ भैक्ष्य भैक्ष्येण द्वौ मासौ यवसावकैः
द्वौ मासौ पंचगव्येन षण्मासांश्चरितव्रतं एवं शुद्धिमवाप्नोति प्रायश्चित्तं तु रोचत इति। येत्वत्याव
सायिनश्चांडालादयस्तेषां स्त्रीगमने गुरुप्रायश्चित्तमुक्तं गुरुतल्पातिदेशः। एतासां च रजकाद्यन्त्यज
स्त्रीणां मध्ये यदेकस्याव्यवायेप्रायश्चित्तमुक्तं तत्सदृशत्वात्सर्वासु भवति तथा चोशना। बहूनामेक
धर्माणां एकस्यापि यदुच्यते सर्वेषां तद्भवे कार्यमेकरूपा हि ते स्मृताः इति एतासु गर्भोत्पत्तौ तु वि
शेष उक्त उशनसा। चांडाल्यां गर्भमारोप्य गुरुतल्पव्रतं चरेद् इति एतान्यव्रतातिदेशान्न वा इ तद्वा
कामतः कामतः पुनरापस्तंबः अंत्यजायाप्रसूतस्य निष्कृतिर्न विधीयते। निर्वासनं कृतांकस्यतस्य
कर्मसंशयमिति अथ स्त्रीणां व्यभिचारे प्रायश्चित्तं। मनुः। यत्पुंसः परदारेषु तच्चैनां चारये द्व्रतमिति
एतच्च वानिकानि तिदेशात्पादोनमिति केचित् पूर्णमेवयुक्तं तथा बृहस्पतिः यत्पुंसः परदारेषु समा
नेषु विधीयते व्यभिचारे पिकुर्युः स्त्रीणां तदशेषं समापयेदिति समानेष्वित्यनुलोमानामप्युपलक्षण

प्रा॰म॰

॥७१॥

तच्च प्रातिलोम्यव्यवायव्याहृत्सर्पं॥ तन्नगुरुप्रायश्चित्तोक्तेः॥ नन्तुः॥ असः॥ व्यवस्थितकल्पनात्वन्याय्येवेति॥
व्रतश्चसवर्णासुलोमव्यवायेन्नापुंसयोरोस्सर्गिकिंतुल्यं प्रायश्चित्तं तस्याक्वचिदपवादस्तथाचसंव
र्तः॥ बलात्वमप्यनुत्काचेदृष्टमानेनचेत्॥ तस्याः॥ प्राजापत्येनशुद्धिस्यात्तनस्याःपावनंमिति॥ पराशरो
पि॥ सकृद्भुक्तातुयानारीनेच्छंतिपापकर्मभिः॥ प्राजापत्येनशुध्येतऋतुप्रस्रवणेनचेति॥ बृहस्पतिरपि॥
अनिच्छंतीतुयाभुक्तागुप्तांतांकारयेद्गृहे मलीनांगामधःशय्यांपिंडमात्रोपजीविनं॥ कारयेन्निष्कृतिं
कृच्छ्रंपराकंवासमंगतां॥ हीनवर्णोपभुक्तायात्याज्यावध्यापिवामवेदिति॥ समंसमानजातीयं॥ अन्नस
कृच्छ्रंपरांकंवासमंगतां॥ व्यभिचारिणींनार्याकृचैज
नउपगमनेकृच्छ्रवृद्धिरभ्यासेयपराकः॥ अभ्यासेतुचांद्रायणं॥ तदाहहारीतः॥ व्यभिचारिणींनार्याकृचैज
॥वपिंडगुप्तांनिरुद्धाधिकारांचांद्रायणंपराकंप्राजापत्यंवाकारयेदिति॥ मनुः॥ सौचेत्पुनःप्रदुष्येत्तुसदृशे
नोपयंत्रिता॥ कृच्छ्रंचांद्रायणंचैवतदास्याःपापशोधनमिति॥ इदंचाकामतः॥ कामतस्तद्द्विगुणं॥ यत्तुकृ राम:
ष्यशृंगः॥ बलेनकामिनारीसवर्णेनकथंचन॥ प्रायश्चित्तंत्रिरात्रंवैतस्याशुद्ध्यर्थमादितितदेतःसेकात्या ॥७६९॥

द्विः इत्तोद्दृश्यां॥ पराशरोपिविंदियाहरणयाभुक्ताहत्वाबद्धावलाद्भयात्॥ कृत्वासांतपनंकृच्छ्रंशुद्ध्येत्पाराश
रोब्रवीत्॥ इच्छयाप्रवर्तेतुतस्याःपंतुल्यमेवप्रायश्चित्तं॥ तदाहहतुःशंखलिखितौ॥ इच्छयाव्यभिचारिणीपा
दाषुपुंसो॥ विहितंताचारयेदित्यंगिराः॥ व्रतंयच्चोदितंपुंसांपतितस्त्रीनिषेवणात्॥ तच्चापिकारयेन्मूढां
पतितासेवनात्स्त्रियमिति॥ अभ्यासेवेनादितिपदृच्छेदः॥ तच्चकामतः॥ अकामतस्त्वाहसंवर्तः॥ ब्राह्मणपका
मागच्छेत्तुक्षत्रियंवैश्यमेववा गोमूत्रयावकैर्मासात्तदर्धाद्विशुध्यति॥ ब्राह्मण्याःशूद्रसंपर्केकथंचित्स
मुपागते॥ चांद्रायणेनशुद्धिःस्यात्ततस्याःपावनंस्मृतिः॥ मूलपाणित्वनिच्छतीविषयमेतदिति॥ मासादि
तिवैश्येक्षत्रियेत्वर्द्धमिति॥ षट्त्रिंशन्मतेपि॥ ब्राह्मणीक्षत्रियवैश्यगमनेवायामितिकृच्छ्रंछ्रातिकृच्छ्रंचरेत्॥ क्ष
त्रियायोषितोब्राह्मणराजन्यवैश्यसेया॥ कृच्छ्राईप्राजापत्यंच॥ शूद्रायाःशूद्रसेवानेप्राजापत्यं॥ ब्राह्मणराज
न्यसेवायांतुहोरात्रंकृच्छ्रार्द्धमिति॥ बृहत्प्रचेताः॥ विप्राशूद्रेणसंयुक्तानचेत्तस्मात्प्रसूयते॥ प्रायश्चित्तंस्मर
तेतस्यास्तकृच्छ्रंचांद्रायणोपिदेकृच्छ्रश्चविप्रायावैश्यसंगमे॥ कृच्छ्रंचांद्रायणंस्यात्तातस्याःक्षत्रियसंगमोक्ष

प्रा०म०
॥७९॥

ब्रियाश्चंडालसंपर्के कृच्छ्रं चांद्रायणं द्वयं। चांद्रायणं सकृच्छ्रं तु चरेद्वैश्येन संगता॥ शूद्रं गत्वा चरेद्वैश्या कृच्छ्रं चांद्र
यणोत्तरं॥ आनुलोम्येन कुर्वीत कृच्छ्रं पादावरोपितमिति॥ नचैतस्मात्प्रसूयेत इति सर्वत्र संबध्यते॥ ब्राह्म
ण क्षत्रियवैश्यानां भार्याः शूद्रेण संगता॥ अप्रजाता विशुध्यंति प्रायश्चित्तेन नेतरा इति वसिष्ठोक्तेः॥ पादाव
रोपितपादहान्या॥ अस्याः शूद्रगमने यत्प्रायश्चित्तं तत्तद्विट्क्षत्रियविप्रगमने पादार्द्धत्रिपादोनं भवति॥ ए
वं वैश्यायाः वैश्यगमने यदुक्तं तत् क्षत्रियविप्रगमने पादोनमर्द्धं च भवति॥ क्षत्रियायात् क्षत्रियस्पतत्पैद
व॥ ऐंदवं च पराकं च वैश्यस्याकामकारतः॥ अस्य गर्भे भवेत्साग श्चांडालोऽत्रियगमने नद्विप्रगमने पादोन
मित्यर्थः॥ गर्भोत्पत्तौ तु तुंचे विज्ञातिमते विप्रगर्भे परकस्याद्बालो जायते यत गर्भस्रावे धातुदोषे श्वरे श्चांद्राय
णत्रयं॥ एतच्चाकामकारतः इति विशेषणात्॥ कामतः कामतः पराकाद्विद्विगुणं कुर्यात्॥ गर्भस्रावे यद्गुक्तसं रामः
पूर्णशूद्रगर्भस्य प्रसवस्तदा प्रायश्चित्तं नास्त्येव॥ अप्रजाता विशुध्यंति प्रायश्चित्तेन रा इति वसिष्ठोक्तेः॥ ॥९०
यद्वा त्वाहितगर्भे भिभिचारिति तदगर्भपातशंकया प्रसवोत्तरकालमेव प्रायश्चित्तं कार्यं॥ तदुक्तं मिताक्ष

रायां स्मृत्यंतरे॥ अन्तर्वत्नी तु या नारी समेतेत्यकामतः॥ प्रायश्चित्तं न कुर्यात्सा यावद्गर्भो न निःसृतः॥ जाते गर्भे व्र
तं कुर्यात्षण्मासं तु यावकं॥ न गर्भदोषस्तत्रास्ति संस्कार्यः स यथाविधिरिति॥ अंत्यजगमनेपि स्त्रीणां
प्रायश्चित्तमुक्तं स्मृत्यंतरे॥ चांडालं पुल्कसं म्लेच्छं श्वपाकं पतितं तथा॥ ब्राह्मण्यकामतो गत्वा चांद्रायणच
तुष्टयं॥ तथा रजकव्याधशैलूषवेणुचर्मोपजीविनः॥ ब्राह्मण्येतान्यदागच्छेदकामादैंदवद्वयमिति॥ पराश
रः॥ चंडालेन तु संपर्कं यदि गच्छेत्कथंचन॥ सशिखं वपनं कुर्यात्॥ भुंजीयाद्यावकौदनं॥ त्रिरात्रमुपवासः स्या
देकरात्रं वसेज्जले॥ आत्मानासंमिते कूपे गोमयोदककर्दमे॥ तत्र स्थित्वा निराहारा सा त्रिरात्रं ततः क्षिपेत्
शंखपुष्पीलतामूलं पत्रं वा कुसुमं फलं॥ क्षीरं सुवर्णसंमिश्रं क्काथयित्वा ततः पिबेत्॥ एकभक्तं चरेत्प
श्चाद्यावत्पुष्पवती भवेत्॥ बहिस्तावद्वनिवसेद्यावच्चरति तद्व्रतं॥ प्रायश्चित्ते ततश्चीर्णे कुर्याद्ब्राह्मणभोजनं
गोद्वयं दक्षिणां दद्याच्छुद्धिः स्वायंभुवोऽब्रवीदिति॥ एतच्चाज्ञानविषयं॥ कामतः सकृद्गमने तु कृच्छ्रं गाः सं
एका स्याद्यस्यां तैर्याता च कृच्छ्रांदं समाचरेदिति॥ कामतोसंततसपेकें भोजने मैथुने कृते॥ प्रविश्येत्संप्रदीप्तेग्नौ

प्रा०म०

॥७९॥ मस्तु नासा विशुध्यतीति यत्तु शातातपः । म्लेच्छेनाधिगता स्त्री तु अकामा वा कथंचन । कृच्छ्रत्रयं प्रकुर्वीत ज्ञाने

तु द्विगुणं भवेदिति । अत्र च म्लेच्छग्रहणमेकवाक्यापात्रानां चंडालानामप्युपलक्षणं । वहूनामेकधर्मा

णां मिस्तुशानो वा ख्यात् । यदपि संवर्त्तः । चंडालं पुल्कसं म्लेच्छं श्वपाकं पतितं तथा । एताः गत्वा स्त्रियश्रेष्ठाः कु

र्याञ्चांद्रायणं परमिति । तदकामतो यत्र तस्य रेतःसेकात्प्राक् निवृत्तौ ज्ञेयं । आहितगर्भायाश्चांडालादिभ्य

वापेतु कृष्णस्तंग । अंतर्वत्नी तु युवतिः संपृक्ता चांत्ययोनिना । प्रायश्चित्तं न सा कुर्याद्यावद्गर्भो न निःसृतः ।

ते प्रवारं गृहे कुर्यान्न चांगेषु प्रसाधनं । न शयीत समं भर्त्रा न वा भुंजीत बांधवैः । प्रायश्चित्तं गते गर्भे विधि

कृत्वाष्टिकं चरेत् हिरण्यमप्यथ धेनुं दद्याद्विप्राय दक्षिणामिति । मानसिकवाचिकव्यभिचारयोः प्राय

श्चित्तमाह वसिष्ठः । मनसा भर्तुरभिचारे त्रिरात्रं यावकं क्षीरोदनं वा भुंजाना ऽधःशयीत ऊर्ध्वं त्रिरात्रादप्सु नि

मग्नायाः सावित्र्या चतुर्भिरष्टशतैः शिरोभिर्जुहुयादिति । अष्टाधिकं शतमष्टशतं तैश्चतुर्भिः शिरस्सि राम:

:शिरसा तर्पणं । इदं च मानसिकव्यभिचारे प्रायश्चित्तं रजोदर्शनादर्वाग्वद्या पर्यत्वसिद्धये रजोदर्श ८७१

ने तु सतीति नैव शुद्धिः । तथा च मनुः । मृत्तोयैः शोध्यं नदीवेगेन शुध्यति । रजसा स्त्री मनोदुष्टा संन्यासेन द्विजोत्तम इ

ति । अंत्यजादिभ्यवाये तु पराशरः । हीनवर्णोपभुक्ता या त्याज्या वध्यापि वा भवेत् इति । सान्त्रं कनपक्षे त्यागए

व चतस्रस्तु परित्याज्याः शिष्यगा च या पतिघ्नी च विशेषेण जुंगितोपगता च येति वसिष्ठोक्तेः । जुंगितः प्रति

लोमजः । अत्र च विशेषविधानात्परित्यागो गृहान्निर्वासनमेव । अन्यत्र तु विप्रदुष्टां स्त्रियं भर्ता निरुंध्यादे

कवेश्मनीति मनूक्तो विरोधः । याज्ञवल्क्योपि । हृताधिकारां मलिनां पिंडमात्रोपजीविनीं । परिभूतामधः

शय्यां वासयेद्व्यभिचारिणीमिति । अत्र च वामनं चैराग्यजननार्थमेव यत्तु चतुर्विंशतिमते स्त्रीणां ना

स्ति परित्यागो ब्रह्महत्यादिभिर्विना । तत्रापि गृहमध्ये तु प्रायश्चित्तानि कारयेत् । परित्यक्ता चरेत्पापं बहु

त्वं वापि किंचन । तस्याः परं शतधा भूत्वा वो धवाननुगच्छतीति तत्र गर्भोत्पत्तिपरं । तद्युक्तायास्तु परित्याग

माह पराशरः । जारेण जनयेद्गर्भं मृते त्यक्ते गते पतौ । तां त्यजेदपरे राष्ट्रे पतितां पापकारिणीमिति । अपरे रा

ष्ट्र इत्यनेन गृहान्निष्कासनं गम्यते । अत एव चतुर्विंशतिमते चतस्र एव संत्याज्याः पतने सत्यपि स्त्रियः

प्रा.म.

॥९०॥

॥ श्वपाकोपहतायास्तु नर्द्धं प्राजापत्यं तु त्रगेति॥ अत्र च शिष्यगादीनां गर्भविषयएव व्यभिचाराद्धतोशुद्धिग
र्भेत्यागो विधीयते गर्भभर्तृवधादौ च तथा महति पातक इति याज्ञवल्क्योक्तेः॥ गर्भश्च शूद्रादिकृतः॥ ब्रा
ह्मणक्षत्रियविशां नार्यः शूद्रेण संगताः॥ अप्रजाता विशुध्यन्ति प्रायश्चित्तेन नेतराः॥ इति वसिष्ठस्मरणात्
शूद्रस्य ग्रहणं प्रतिलोमजोपलक्षणार्थं न तत्तु वैवर्णिक व्यावृत्त्यर्थं॥ तेन शिष्यगागुरुगयो रपि त्रैवर्णि
कयोः प्रसवेन त्यागः॥ अयं च त्यागो गर्भगमात्रे किंतु प्रसूवमात्र इति प्राग्व्याख्यातं॥ अयमेवाभि
प्रायो माधवाचार्याणां॥ मिताक्षरायां तु व्यवहारनिरोधएव त्यागशब्देनोक्तो न तु गृहान्निर्वासनमपी
ति॥ इति प्रायश्चित्तं॥ ८ अथ पशुगमने॥ शंखलिखितौ॥ तिर्यग्योनिषु गोवर्जं सचैलं स्नानीय
वसन्नारं दद्यात्॥ पराशरः॥ महिषुष्ट्रखरामामाबहोरात्रेण शुद्ध्यतीति॥ इदमकामतः॥ कामतस्तु
जाबालः॥ इतिरेषाप स्नानं तु कृच्छ्रं पादो विशोधनमिति॥ कामतोभ्यासे संवर्त्तः॥ पशुवेश्याभिगम राम:
ने प्राजापत्यं विधीयते॥ शुनीगमने विशेषश्चतुर्विंशतिमते॥ शुनां चैव द्विजो गत्वा त्रिरात्रं तु स ॥९७२

माचरेदिति॥ यत्तु गौतमः॥ अमानुषीषु गोवर्जं स्त्रीषु गमने कूष्माण्डैर्घृतहोम इति तत्कामं कामसकृद
भ्यासे सा विशात्यष्टोत्तरसहस्रादि संख्यया योज्यं॥ अथ गोगमने॥ पराशरः॥ गोगामी च त्रिरात्रेण गामेकां
ब्राह्मणे दद्यात्॥ इदमकामतः सकृत्कमले॥ कामतो विष्णुः॥ गोव्रतं गोगमने च कामतोभ्यासे तु शंखलिखितौ॥ गोष्ठव
कीर्णः संवत्सरं प्राजापत्यं चरेदिति॥ यत्तु गौतमः॥ गवि गुरुतल्पसममिति तत्ज्ञानाद्वाजन्माभ्यासे॥ अथ व्रतलोपे
योगीश्वरः॥ अवकीर्णी भवेद्गत्वा ब्रह्मचारी तु योषितं गर्दभं पशुमालभ्य नैर्ऋतं स विशुध्यति॥ मनुः॥ अवकी
र्णी तु काणेन गर्दभेन चतुष्पथे॥ पाकयज्ञविधानेन यजेत निर्ऋतिं निशि॥ हुत्वाग्नौ विधिवद्धोमानंततश्च समित्य
चा॥ वाय्विंद्रगुरुवह्नीनां जुहुयात्सर्पिषाहुती॥ एतस्मिन्नेनसि प्राप्ते वसित्वा गर्दभाजिनं सप्तागारं चरेद्भैक्षं स्व
कर्म परिकीर्तयन्॥ तेभ्यो लब्धेन भैक्षेण वर्तयन्नेककालिकं॥ उपस्पृशंस्त्रिषवणमब्देन स विशुध्यति॥ पाक
यज्ञविधानं॥ अथ पशुकल्पस्त्वाश्वलायनसूक्तः॥ अत्र हुतिरिति बहुवचनं कपिंजलन्यायेन हुतित्र
यमेव ज्ञेयं॥ वसिष्ठोपि॥ ब्रह्मचारी चेत्स्त्रियमुपेयादरण्ये चतुष्पथे लौकिकेग्नौ रक्षोदैवतं गर्दभं पशुमालभे

प्रा.म. ॥८१॥

त्। नैर्ऋतंचांचरुं निर्वपेत्। तत्रतस्यजुहुयात् कामायस्वाहा कामकामायस्वाहा रक्षोदेवताभ्यःस्वाहेति। अत्रग
र्दभयागात्पूर्ववायंवेस्वाहेत्यादिचतुर्भिराज्यहोमः। गर्दभसागोत्तरंतुसंमासिंचत्वित्यृचाहोमश्चपरा
कें। अत्रपशोरसंभवेचरुरितिविज्ञानेश्वरः। श्रोत्रियस्यपशुरश्रोत्रियस्यचरुरितिमाधवः। अयंचामावास्या
यांकार्यः। तथाचतैत्तिरीयश्रुतिः। योब्रह्मचार्यवकिरेदमावास्यायांरात्र्यामग्निंप्रणीयोपसमाधायेत्यादि। एतच्च
कामतएव। कामतोरेतःसेकमितिनिमित्तवाक्येनुक्तेः। अन्येतुशक्तस्यतयाप्रोक्तंहितस्यवायोगीश्वरोक्तोग
र्दभयागएव। शक्तस्यतुमनूक्तमाषाष्टिकेतपसोःसमुच्चयः। समुच्चयमेवाहगौतमः। गर्दभेनावकीर्णीनिर्ऋ
तिंचतुष्पथेयजेत्। तस्याजिनमूर्ध्ववालंपरिधायलोहितपात्रःसप्तगृहान्भैक्षंचरेत्कर्माचक्षाणःसंवत्सरे
णशुध्येदिति। इदंचवार्षिकंव्रतमश्रोत्रियविप्रपत्न्यांश्रोत्रियवैश्यपत्न्यांच। यत्तुशंखलिखितौ। गुप्तायांवैश्
यायामवकीर्णःसंवत्सरंत्रिषवणमनुतिष्ठेत्। क्षत्रियायांद्वेवर्षेब्राह्मण्यांत्रीणिवर्षाणीति। तद्ब्राह्मणी रामः
क्षत्रिययोःश्रोत्रियभार्ययोरवकिरणेज्ञेयं। यत्तुपैठीनसिः। अवकीर्णीगर्दभाजिनंवसेत्सरंप्राजापत्यंचरेदि ॥८१३

तितन्मात्रश्रुत्नार्याविषयोर्वैरिण्यादिभिरवकिरणेत्वाहतुःशंखलिखितौ। स्वैरिण्यांवृषल्यामवकीर्णःसचै
लस्नातउदकुंभंदद्यात्ब्राह्मणायवैश्यायांचतुर्थकालाहारोब्राह्मणान्भोजयेत्यवसभारंचगोभ्योदद्यात्।
क्षत्रियायांत्रिरात्रमुपोषितोघृतपात्रंदद्यात्। ब्राह्मण्यांषडात्रमुपोषितोगांदद्यात्। गोष्ववकीर्णःप्राजापत्यंच
रेत्। षंढायामवकीर्णःपलालभारंसीसमाषकंचददाति। कल्पतरौहारीतः। तस्मात्स्त्रीष्ववकीर्णीनिर्ऋत्या
एवचतुष्पथेगर्दभेनपशुमालभेत भूमौपशुपुरोडाशश्रपणमवदानैः। प्रवर्षप्राक्स्विष्टकृतआज्यस्यजु
होति। कामावकीर्णोस्मिकामाकामावपन्नोस्म्यवपन्नोस्मिकामकामायस्वाहाकामभिद्रुग्धोस्मिकामा
यस्वाहाकामाभिद्रुग्धोस्म्यभिद्रुग्धोस्मिकामकामायस्वाहा। समासिंचतुमरुतःसमिन्द्रः। संबृहस्पतिः। स
मायमग्निःसिंचतुयशसाब्रह्मवर्चसेनैनेतितांछवीमूर्ध्वबालांपरिधायमृन्मयपात्रमादायसप्तागारंभै
क्षंचरेत्। स्वकर्मयंस्त्रयोदशेमासेपूतोभवतीति। छंदोगेचर्मविशेषमाहबौधायनः। योब्रह्मचारीस्त्रिय
मुपेयात्सोवकीर्णीगर्दभंपशुमालभेतनैर्ऋतःपशुपुरोडाशोरक्षोदेवतोयमदेवतोवाग्निश्यास्त्रात्रिभवदा

प्रा॰म॰
॥६२॥

नैष्करतीतिविज्ञायते ॥ अथावकीर्णमोवास्यामग्निमुपसमाधाय सम्यक्परिस्तीर्य दार्विहोमिकीं परिचेष्टां कृ
त्वा द्वे आहुती जुहोति कामावकीर्णोस्म्यवकीर्णोस्म्यवकीर्णोस्मि कामकामाय स्वाहा ॥ कामाभिदुग्धोस्म्य
भिदुग्धोस्मि कामाकामाय स्वाहा ॥ इति हुत्वा करोतियुगग्निमभिमंत्रयेत् समासिंचेत्विति ॥ परिशेषेतिक
र्त्तव्यता स एव ॥ अथ ब्रह्मचर्यव्रतमेव किमेव किनेन्मासं वाम्नियास्त्रियं वो येवात्स वोस्वा निघितरागारे
ऽग्निमुपसमाधायसंपरिस्तीर्य प्रायश्चित्ताज्याहुती जुहोति ॥ कामेन कृतं कामः करोति कामायैवेदं सर्वमि
गान्कारयतितस्मै स्वाहा ॥ मनसा ततं मनुत एवेदं सर्वोयं कारतितस्मै स्वाहा जयान्मुति सिद्धमाधेनुवरप्र
दानात् ॥ अपरेणाग्निं कृष्णाजिने न प्राचीनग्रीवेणोत्तरलोम्ना माहत्यवसति कुष्टायां जघनात्मानं मम
कृष्यतीरं गत्वा स्नात्वा च म्याचिमं आञ्लिंगाभिर्वारुणीभिर्हिरण्यवर्णाभिः पावमानीभिरिति मार्जयित्वा तर्जल
गतोऽघमर्षणेन षोडश प्राणायामान् धारयित्वा नार्यवासः पाउयित्वाऽन्यद्धौतं वासः परिधायाचम्यप्र
सिद्धमादित्योपस्थानं कृत्वा आचार्यस्य गृहानेति जयापदेन जयाहोमा ॥ आग्निर्भूतानामधिपतिरित्या

रामः
॥६७४

दिसाध्यहोमाः ॥ अतोजयाहोमादेनुवरप्रदानांतमत्रकुर्यादित्यर्थः ॥ अपरेणाग्निमग्निपश्चिमभागे वसतीत्य
स्यायेरात्रौविति ॥ रोष ॥ कुष्टायामितिनुषकाल्लेजघनात्कृष्णाजिनजघनप्रदेशात्मानपपक्रषपन्निःसार्ये
त्यर्थः ॥ शंखलिखितौ ॥ सप्तरात्रेणावकीर्येग्निग्न्याग्निकार्यंकुर्वन्नसद्यः ॥ कामाउत्सर्गेरेतसोन्यत्रस्वप्नात्तत्र
प्रायश्चित्तं महाव्याहृतिभिर्जुहुयाद्दोपूविकाभिः ॥ संवत्सरं वानक्तं भैक्षं चरेच्चतुर्थकाले मितभुग्गायत्री
वासवत्सराऽनुगां जयेदिति महाव्याहृतिहोमैरत्रलघुत्वाद्भैक्ष्याग्निकार्याकरणे ॥ संवत्सरं चेत्यादिना मि
ततनुगित्यादिना च ॥ प्रायश्चित्तद्वयमुक्ततत्सर्वोक्तसंवत्सरव्रतसमानविषयं वत्सरानुगां वत्सरपर्यंतमि
त्यर्थः ॥ स्वप्ने रेतसउत्सर्गेमनुविष्णु ॥ स्वप्ने सिक्त्वा ब्रह्मचारी द्विजः शुक्रमकामतः ॥ स्नात्वार्कमर्चयित्वा त्रिःपु
नर्मामित्यृचं जपेत् ॥ दिवास्वप्ने उत्सर्गेविल्लाउत्सर्गेचैनैकृतयागमात्रं रात्रौ हे रेतस उत्सर्गे दिवास्वप्नेवेतिव
सिष्टेनयागमात्रातिदेशात्कृच्छ्रं चांद्रायणं द्विवतांतरेष्वतिद्विब्रह्मचर्येषु रेतःस्कंदने वव्रतानेषु चैवमि
तितेनैवातिदृष्टत्वात् ॥ इदमेवच दीक्षितस्यापि वानप्रस्थपत्योरपि रेतःस्कंदने आह शंखः ॥ उत्स्य ॥ वा

धा॰म॰ नप्रस्थो यतिश्चैव स्कंदने सति कामतः ॥ पराकत्रयसंयुक्तमवकीर्णिव्रतं चरेत् ॥ इदं च ब्रह्मचर्यादिद्देशे । अवकीर्णिवि
॥९३॥ तं गुरुत्वात्परस्त्रीगमन एवाकल्प्य । सूर्यस्यो त्रिर्नमस्कारं स्वप्ने सिक्त्वा गृही चरेत् । वानप्रस्थो यतिश्चैव
त्रिः कुर्यादघमर्षणं । स्त्रीसंयोगमंतरेण कामादुत्सर्गे तु क एव यत्रोत्सर्गे गृही त्वावारुणीभिरुपस्थेत् ।
वानप्रस्थो यतिश्चैव चरेच्चांद्रायणत्रयं । सप्तरात्रं संध्यादित्यागेनावकीर्णत्वं बृहस्पतिः । संध्योपासन
मुद्दिष्टं प्रथमं ब्रह्मचारिणः । अग्नीधनं भैक्ष्यचर्यां चैतत्कुर्वीत प्रत्यहं । अस्य त्वयस्याकरणात् व्रती रोग
विवर्जितः । अवकीर्णिव्रतं कुर्यात्सप्तरात्रेन संशयः । याज्ञवल्क्योपि । भैक्ष्याग्निकार्ये त्यक्त्वा तु सप्तरा
त्रमनातुरः । कामावकीर्ण इत्याभ्यां कृत्वा चाज्याहुती द्वयं । उपस्थानं ततः कुर्यात्समासिंचंत्वनेन तु
कामावकीर्ण इत्येतौ पूर्वमुक्तौ सं मासिंचंत्विति वा इदं च कार्यव्यासंगादिप्यादित्यागे तदभावे तु अकृ
त्वा भैक्ष्यचरणमसमिध्य च पावके । अनातुरः सप्तरात्रमवकीर्णिव्रतं चरेदिति मनूक्तेः । ज्ञेयं नैष्ठिके वि राम:
शेषमाह हारितः । उपकुर्वाणिस्तु यत्कुर्याकिमतोकामतोपि वा ॥ तद्द्विगुणं कुर्यात् ब्रह्मचारी तु नैष्ठि ॥९७५॥

क इति । एवानिवावकीर्णिप्रायश्चित्तानि त्रैवर्णिकस्यापि ब्रह्मचारिणः समानानि । अवकीर्णि द्विजो
राजा वैश्यश्चापि खरेण तु । दृष्ट्वा भैक्ष्याशिनो नित्यं शुध्यत्याशु समाहित इति शौंडिलोक्तेः । द्विजो विप्र
: । अत्र मदगम्यागमनप्रायश्चित्तात्समं न्यूनं वा तद्दिने नैव सिद्धं यत्त्वधिकं तेनैव तस्य सिद्धिः । गर्दभया
गस्तु पृथगेव कार्य इति । ब्रह्मचारिणो वेदव्रतान्याम्नातानि तेषां लोपे प्रायश्चित्तमाह त्रिः । पिता भ्राता प
रेवापि प्राजापत्यत्रयं चरेत् । महापगासु संस्ताप्य पापाद्विमोच्य यन्त्राद्भुतिः । पंचगव्यैरदमाहांत व्रतलोप
कृते सती संवत्सरमध्य एव व्रतलोप एतत्प्रायश्चित्तमिति केचित् । महानाम्न्यादिव्रतलोपप्रायश्चित्तपू
र्वकं तानि समावर्तनादिना वर्कयाणीति प्रयोगपारिजाते । व्यासोपि वेदव्रतानि कृत्वैवं तथैवारण्यव्रतं
स्वशाखाविहितं सर्वं कृत्वा वेदमुपक्रमेत् । अकृत्वेमानि सर्वाणि वेदो वाप्यसते यदि । प्रायश्चित्तानि कृ
त्वैव व्रतान्येपि तथाक्रमात् । गोदानिकं ततः कृत्वा समावर्तनमाचरेदिति । तत्र प्रायश्चित्तमाह शौनकः ।
व्रतानि विधिवत्कृत्वा स्वशाखाध्ययनं चरेत् । अकृत्वा वसते यत्र स पापो विधिपातकः । प्रत्येकं कृच्छ्रमेकैकं

चरित्वाज्याहुतीः शतं हुत्वाचैवतु गायत्र्यात्मायादिता ह शौनकः। देवलोपि व्रतादीनुपक्रम्य कालातिक्रमणे
कुर्यात्प्रायश्चित्तं विधानतः। कृच्छ्रं शदशरावान्ते हुत्वा चाज्याहुतीः शतं। अष्टाविंशतिमष्टौ वा क्रमात्कुर्याद्बु
तानिहि। न्यूनत्वे यावदसम्पत्तेर्वेदता वक्तुनः पवेदिति। वेदोदितानां नित्यानां कर्मणां समतिक्रमे स्नात
कव्रतलोपेव प्रायश्चित्तमभोजनमिति। व्रतलोपे प्रायश्चित्तं। अथ परिवेदने। दाराग्निहोत्रसंयोगं कु
रुते योग्रजे स्थिते। परिवेत्ता स विज्ञेयः परिवित्तिस्तु पूर्वजः। गार्ग्योपि। सोदर्ये तिष्ठति ज्येष्ठे न कुर्याद्दारसंग्र
हं। आवसथ्यं तथाधानं पतितस्त्वन्यथा भवेत्। सोदर्यग्रहणादसोदर्ये न दोषः। तदाह शातातपः। पितृ
व्यपुत्रमात्मपरनारीसुतेषु च। ज्येष्ठेष्वपि च तिष्ठत्सु आर्षेणतु कनीयसो। दाराग्निहोत्रसंयोगे न दोषः परिवे
दने परनारीसुताः क्षेत्रजदत्तकाद्याः। पुत्रदानेन प्रतिग्रहीतृपितृत्वपुत्रत्वादिप्रयुक्तकार्यप्रवृत्तिर्जनककु राम:
ले च तन्निवृत्तिः सप्रमाणमुक्ता व्यवहारमयूखे। तेन दत्तकसोदरस्यापि कनिष्ठस्य दत्तकमुक्रम्योद्वाहे ॥८७६
न दोषः शातातपः। क्लीबे देशान्तरस्थे च पतिते भिक्षुकेपि वा। योगशास्त्राभियुक्ते च न दोषः परिवेदने। भिक्षुको

यतिः। योगशास्त्राभियुक्तो विरक्तः। कात्यायनोपि। देशान्तरस्थक्लीबैकवृषणानसहोदरान्। वेश्यातिसक्त
पतितशूद्रतुल्यातिरोगिणः। जडमूकान्धबधिरकुब्जवामनखोडकान्। अतिवृद्धानभार्यांश्च कृषिसक्तान्नृ
पस्य च। धनवृद्धिप्रसक्तांश्च कामतोकारिणस्तथा। कुहकांस्तस्करांश्चापि परिविन्दन्न दुष्यति। खोडको भ
ग्नचरणः। अभार्योऽकृतभार्यः। कामतोकारिणः स्वैच्छयैव नित्यं विवाहमकुर्वाणाः। अत्र ये सर्वो वाहे
नधिकारिणः क्लीबादयस्तेषु सत्सु कालविशेषमन्तरेणापि परिवेदने न दोषः। ये तु कालान्तरेपि संभावि
तविवाहाधिकारा विरक्तवेश्यातिसक्तशूद्रतुल्यकृषिसंसक्तराजपरंतत्रधनवृद्धिप्रसक्तकामतो
कारिकुहकतस्करास्तेषु तत्स्वभावत्वावधारणे न दोषः। देशान्तरस्थे विशेषमाह वसिष्ठः। अष्टौ द्वाद
शवर्षाणि ज्येष्ठं भ्रातरमनिविष्टमप्रतीक्षमाणः प्रायश्चित्ती भवतीति। धर्मार्थमप्रोषितविद्यार्थं वा देशान्तर
स्थे द्वादशवर्षप्रतीक्षा। कार्यान्तरार्थं दशाब्दस्त्वेवेति। तथा च स एव। द्वादशैव तु वर्षाणि ज्यायान्धर्मार्थ
योगतः। नाप्यः प्रतीक्षितुं भ्राता श्रूयमाणः पुनः पुनरिति। हेमाद्रिः। मूलपाणिस्तु द्वादशाब्दवर्षाणि व्यास

प्रा॰म॰ गास्य विद्यासंबंधेनेति गौतमवाक्ये ब्राह्मणग्रहणात्स एव द्वादशवर्षाणि प्रतीक्ष्य ॥ क्षत्रियवैश्यपरस्तु द्वादशा
॥८५॥ ष्टौ षडिति ॥ अस्मृतषट्त्वन्यायां प्रमाणाभावात् ॥ धर्मार्थयोरसक्तियाहावपि संभवात् ॥ विवाहे ज्येष्ठानुज्ञा
या मापि दोषमाह हारीतः सोदराणां च सर्वेषां परिवेत्ता कथं भवेत् दारैस्तु परिविद्येत नाग्निहोत्रेण नेज्यया पू
ति ॥ अथ प्रायश्चित्तं ॥ वसिष्ठः परिविविदानः कृच्छ्रातिकृच्छ्रौ चरित्वा तस्मै दत्वा पुनर्निविशेत । अत्र परार्के
कनिष्ठेनोढां ज्येष्ठ उद्वहेत् अत्रशास्त्रीयविवाहेन कनिष्ठनिरूपितभार्यात्वानुत्पत्तेर्ज्येष्ठोद्वाहयोग्यत्वेन का
निष्ठस्त्वन्यामुद्वहेदिति । तन्न तां चैवोपयच्छेदिति विज्ञानेश्वरोक्तेर्वाक्यदोषात् भार्यात्वानुत्पत्तिस्तु कनिष्ठे
द्वाहेपि साधिकास्पष्टं च हारीतेन ज्येष्ठस्याप्युक्तमुक्तान्योद्वाहस्तु वोक्ता समाप्ते दत्तां कन्यां ज्येष्ठायोपपादये
युः समाममनुमान्यन्यया विविशेतैवं धर्मेनितुष्यत इति तस्मात्परिवेधा कृच्छ्रातिकृच्छ्रोत्तरस्योढां ज्येष्ठाय दत्त्वा
चार्यात्वत नैन व कुरु परिभवपरिहारार्थेन विवेघतो नानुज्ञानांतरमेवोद्वहयेदिति वाचस्पत्यर्थ । यत्तु सुमंतु रामः
कनीयसं प्रत्याह नत्वयश्चैनामभिगच्छेदिति तत्सुन विवाहात् प्रागेवेति तंत्रैव व्यवस्था सन्निधाच काम ॥८११॥

तः कृच्छ्रातिकृच्छ्रौ याज्ञवल्कीयं वक्ष्यमाणमुपपातकसामान्यव्रतचतुष्टयं च वर्णशक्त्याद्यपेक्षया योजनी
यं कामतः सन्निधौ कन्यापित्राद्यनुज्ञानोद्वाहे तु मानवं त्रैमासिकं । यत्तु विष्णुः परिवेत्तिः परिवेत्ताय
या च परिविद्यते तदाना याजकश्चांद्रायणं कुर्युरिति तत्कृच्छ्रपरं । यत्तु यमः कृच्छ्रौ द्वयोः परिवेदके
न्यायाः कृच्छ्र एव च । अपि कृच्छ्रं चरेद्दाता होता चांद्रायणं चरेत् इति तदज्ञानतः सन्निधिविषयं । द्वयोः प
रिवेत्तृपरिवित्योः प्रत्येकं द्वौ कृच्छ्रौ । यत्तु समंतुः परिवित्तिपरिवेत्तृकन्यादातृयाजकानां द्वा
दशरात्रं सकृत्प्राशनं ब्राह्मणतर्पणं च । तां पुनर्नवसा चरेत्वते न त्वयश्चैनामभिगच्छेदिति छंदपरं । प्रसंगादु
च्यते देवलः ज्येष्ठायां यद्यनूढायां कन्यायामुह्यतेनुजा सा चाग्रेदिधिषूर्ज्ञेया पूर्वा तु दिधिषूः स्मृते । प्राय
श्चित्तमाह वसिष्ठः अग्रेदिधिषूपतिः कृच्छ्रं द्वादशरात्रं चरित्वा निविशेतां चैवोपयच्छेद्दिधिषूपतिः कृच्छ्रं द्वा
दशरात्रं चरित्वा निविशेतां चैवोपयच्छेद्दिधिषूपतिः कृच्छ्रं द्वादशरात्रं चरित्वा निविशेतां चैवोपयच्छेद्दिधिषूप
तिः कृच्छ्रातिकृच्छ्रौ चरित्वा तस्मै दत्वा पुनर्निविशेतेति । अग्रेदिधिषूपतिः प्राजापत्यं चरित्वा तामेव ज्येष्ठां प

प्रा॰म॰
॥८६॥

स्वादन्येनोढासु इत्येतत्॥ दिधिषूपतिस्तु कृच्छ्रातिकृच्छ्रौ कृत्वा स्वोढां ज्येष्ठां कनीयस्यां॥ पूर्वं विवाहे त्वन्यासु
द्वहे त्वन्यासु द्वहेत्वन्यासूद्वहेदिति मिताक्षरायां कल्पतरौ च॥ व्याख्यांतरमपि स्मृत्यर्थसारे॥ कनिष्ठाप
तिर्द्वादशरात्रं कृत्वा तां स्वोढामेव ज्येष्ठोद्वाहे जाते उद्वहेत्॥ ज्येष्ठापतिस्तु कृच्छ्रातिकृच्छ्रौ कृत्वा स्वोढां कनि
ष्ठापतये ब्रह्मचार्यकृतमैथुनां निवेद्य तदनुज्ञातां ज्येष्ठामेवोद्वहेदिति॥ अपरार्के तु अग्रेदिधिषूपस्थाने दि
धिषूपतिरेवं तद्दिधिषूपतिस्थाने त्वग्रेदिधिषूपतिरिति॥ तत्र च प्रायश्चित्ते विकल्प इति॥ यत्तु गौत
मः परिवित्तिपरिवेत्तृपर्याधात्रग्रेदिधिषूपतिदिधिषूपतीनां संवत्सरं प्राकृतं ब्रह्मचर्यमिति॥ तत्परिवेत्तृसं
वत्सरसमानविषयं पर्याहितपर्याधात्रोः स्वरूपमुक्तं संवर्तेन॥ अनाहिताग्नेर्ज्येष्ठे तु कनीयानादधीत चेत्प
र्याधाता कनिष्ठस्याज्ज्येष्ठः पर्याहितः स्मृत इति॥ इति गुरुतल्पप्रसक्तानुप्रसक्तप्रायश्चित्तानि॥ अथ संस
र्गप्रायश्चित्तं॥ तत्र संसर्गभेदानाह बृहस्पतिः॥ एकशय्यासनं पंक्तिः भांडपंक्त्यन्नमिश्रणं॥ याजना
ध्यापने योनिस्तथा च सहभोजनं॥ नवधा संकरः प्रोक्तो न कर्तव्योऽधमैः सहेति॥ योनिः पातकिनः कन्याद

राम:
॥८१८

नं॥ तत्कन्यापरिणयनं चेति विज्ञानेश्वरकल्पतरुकारादयः॥ पातकिन्यागमनमित्यपरार्कः॥ शूलपाणिः॥ योग
पारित्यागात्त्विदमेव युक्तं छागलेयः॥ आलापात् गात्रसंस्पर्शान्निश्वासात्सहभोजनात्॥ सहशय्यासनायात्
त्पापं संक्रमते नृणामिति देवलः॥ संलापस्पर्शनिश्वाससहयानाशनासनात्॥ याजनाध्यापनाद्यौना
त्पापं संक्रमते नृणामिति॥ वसिष्ठः॥ पतितसंप्रयोगे तु ब्राह्मणेन वा यौनेन वा यास्तेभ्यः सकाशान्मात्रा उप
लब्धास्तासां परित्यागस्तैश्च सह संपिबेदिति॥ मात्राद्यं एतेषां कर्मणां मध्ये केन कर्मणा कियता कालेन पाति
त्यं तत्राह विष्णुः॥ संवत्सरेणायन निपतति पतितेन सहाचरन्नेकयानभोजनयाजनासनशयनैः॥ यौनस्रौवमु
खैस्तु संबंधैः सद्य एवेति॥ मुखो मुख्याऽध्ययनमध्यापनं च॥ एकत्रान्नभोजनेपि सद्यः पातित्यं याज
नं योनिसंबंधं स्वाध्यायं सहभोजनं कृत्वा सद्यः पतत्येव पतितेन न संशय इति देवलोक्तेः॥ यौनस्रौव
मुख्यैरिति सत्यपि द्वंद्वनिर्देशे प्रत्येकमेवैषां पातित्यहेतुत्वं॥ पतितैः सह यौनमुख्यस्रौवाणां संबंधमा
न्यतमेन सह संवत्सरं संपर्कयातस्यापि तदेव प्रायश्चित्तमिति पाव॥ तत्रान्यान् परं घजानतः पंचमहाय

प्रा॰म॰ ज्ञादियाजनं॥तथैवाप्यध्यापनं॥तथैवयोनिसंबंधोप्यव्हितो विवाहसंबंधश्चेतिज्ञेयं॥एतेनसंवत्सरेण
॥८७॥ पतितेनसहाचरन् याजनाध्यापनाद्यौनादेकशय्यैकभोजनादिति॥हारीतोयं॥षाण्मासिकेतुसंसर्गे
याजनाध्यापनादिभिः॥एकवासनशय्याभिः प्रायश्चित्तार्धमाचरेदिति॥संवत्सरेणसंस्पर्शयोनियुक्तेर्वि
शेषतः॥पूर्वोक्तेनविधानेनपतितव्रतमाचरेदिति॥चबार्हस्पत्यंव्याख्यातंजिकनुक्तुसमुच्चितानामेवया
जनादीनांसद्यःपतनहेतुत्वं प्रत्येकहेतुत्वंतु संवत्सरसंसर्गइतियुक्तंसूचे॥ परंतुतद्रूपंयुविरुद्धं॥ कौ
मो॥याजनंयोनिसंबंधंतथैवाध्यापनंद्विजः त्वासद्यःपतेज्ञानत्सहभोजनमेवच॥अज्ञानादथवामोहा
तत्कुर्यादध्यापनंद्विजः॥संवत्सरेणपततिसहाध्यायतमेवचेति॥द्वितीयवचनमंगाद्यध्यायनपरं॥
बौधायनः॥संवत्सरेणपततिपतितेनसहाचरन्याजनाध्यापनाद्यौनात्सद्योनशयनादिति शयनासना
त्संयोनकितुसंवत्सरेणेतिसंबंधः॥एतेनसंवत्सरेणपतति पतितेनसहाचरन्याजनाध्यापनाद्यौना रामः
तुयानाशनासनादितिमानवमभिव्याख्यातं॥पैठीनसिस्तुनत्वेकत्रायनाशनादित्संतंपावंपपाव ॥८७॥

अत्रज्ञानकृतएवसंसर्गपातित्यंनाज्ञानकृते॥संवत्सरंतुपतितैःसंसर्गंपीकुरुतेतुयः॥यानशय्यासनैर्नि
त्यंजानन्वैपतितोभवेदिकोमौक्ते॥पतितेनसंगोषित्वाजानन्संवत्सरंद्विजः॥मिश्रितस्तेनसोष्टांतेस्वयंचपति
तोभवेदितिदेवलोक्तेश्च॥अत्रसंवत्सरमित्यंतसंयोगवाचिद्वितीयाश्रुतेषष्ट्यधिकत्रिशतत्रयदिनव्यापिने
वसंसर्गेपातित्यंभवतिनतुतन्न्यूनत्वेइतिविज्ञानेश्वरादयः॥अतएवसंवत्सरेणपततिपतितेनसहाच
रन्॥भोजनासनशय्यादिकुर्वाणःसार्वकालिकमितिदेवलीयंसार्वकालिकपदमपिसंगच्छते॥ब्रह्मह
दिचतुष्टयंसंसर्गएवचमहापातकंनतुसंसर्गिकसंसर्गोपि॥ब्रह्महामद्यपस्तेनस्तथैवगुरुतल्पगः॥एते
महापातकिनोयश्चतैःसहसंवसेदितियाज्ञवल्क्यादिषुतैरितिसर्वनाम्नाब्रह्महादिचतुर्णामेवपरामर्शा
त्संवत्सरेणपततिपतितेनसहाचरन्नित्यादिषुपतितपदमपिब्रह्महादिचतुःपरमेव॥शपथस्तुसंसर्गिसंस
र्गेप्यस्त्येव॥एतेनत्विभिरनिर्णिक्तेनार्थंकंचित्समाचरेदितिमनूक्तेः॥अयंतुसंसर्गित्रिविधः॥उत्तमोम
ध्यमःकनीयांश्च॥तत्राद्यश्चतुर्धायौनस्रौवमौरवैकपात्रभोजनशय्यैकपंक्तिभोजनभेदाच्चतुर्धा॥

ऽसंसक्तसंलापस्पर्शनिश्वासैकपंक्तिभांउपंक्तिनदीयानभोजनतत्प्रतिग्रहतत्स्पृष्टान्नभोजनादिभेद
दनेकविधइतिनिबंधकृतः॥क्वचित्संसर्गदोषमयवदतिवसिष्ठः॥यतिनोऽसन्नःपतितोभवत्यन्यत्र
स्त्रियाः॥साहिपरगामिनीभवतिनामकाम्रुपपर्यंछेतेतियाज्ञवल्क्योपि॥कंन्यांसमुद्वहेदेषांसोप॥
वासामकिंचनामिति॥सोपवासांकृतसंसर्गानुरूपप्रायश्चित्तमितिविज्ञानेश्वरः॥तत्रः अकृतसंस
र्गायाःप्रायश्चित्ताभावेननित्यवत्श्रवणाविरोधात्॥अतस्मात्तेनित्यपूर्वेद्दिनेउपवासोविधीयते॥अ
किंचनाअग्रहीतपितृवस्त्रादिकांहृद्धारीतः॥पतितस्यकुमारींविवस्त्रांअहोरात्रोपोषितांप्रातःशु
क्लेनातेनवाससाहितानाहममैतेषांनममैतइति॥त्रिरुच्चैरभिदधानातीर्थेस्वगृहेचोद्वहेदिति॥उद्व
हेदित्यनेनस्वयमेवास्यकृपतितसंसर्गास्तुद्वहेत्रमुनापतितात्पतिग्रहीयादितिलभ्यते॥पातकुत्स्त्र
योःस्त्रीसुपपत्ययोःप्रायश्चित्तमाहबौधायनः॥अशुचिशुक्लोत्पन्नानांतेषांशुद्धिमिच्छतांप्राजापत्यंपत
नीयानांतनीयांशाःस्त्रीणामंशास्तृतीयमितिप्राजापत्यंप्रायश्चित्तंपतनीयानांनरकेपततीयमितिप्रा

राम॰
॥ ९९० ॥

जापत्यंप्रायश्चित्तं॥तपनीयानांनरकपतंतानिपतनीयाः॥कर्त्तव्यंनायतछत्यस्तुदोबहुत्वमिति
स्मृतेकर्मप्रवचनायवत्॥तेनपतितोत्पन्नस्यपुत्रस्यंततीयोंशः॥कन्यायास्तुतस्तृतीयोंशोमौलिकन
वमांशइतियावत्॥यत्तुपराशरः॥त्यजेद्देशंकृतयुगेत्रेतायांग्राममुत्सृजेत्॥द्वापरेकुलमेकंतुकर्ता
रंतुकलियुगे॥कृतेसंभाषणादेवत्रेतायांस्पर्शनेनच॥द्वापरेत्वन्नमादायकलौपततिकर्मणेति॥तत्रा
द्यश्लोकेकर्त्तारंत्वितितुशब्देनैवकारायार्थेवपूर्वप्रकृतयुगभेदेनसर्वत्रयोत्कंदेशग्रामकुलसंस
गत्यमेववार्यते॥नत्वप्रकृतोयाजनादिसंसर्गोपीतिद्वितीयश्लोकेपिकृतेसंभाषणादेवेत्यवकारेणो
तरवाक्यद्वयेतदनुषंगेणकृतेसंभाषमात्रात्पततित्रेतायांपततिस्पर्शमात्राद्वापरेतुतत्स्वामिकान्न
प्रतिग्रहमात्रात्कलौतुकृत्स्नेननिषिद्धकर्मणायाजनादिनिरित्यर्थः॥अन्यथापूर्ववाक्येकर्त्तारंक
लौन्यसेदित्यनेनसाक्षात्कर्त्रादेःसंसर्गोनिषिद्धः॥द्वितीयवाक्येतुकलौपततिकर्मणेत्यनेनासाक्षात्क
र्तुरेवदोषेणसंसर्गः॥कर्त्तुरितिपरस्परविरोधःस्यात्॥एवंचमाधवस्यकलौसंसर्गदोषाभावोक्तेर

प्रा॰म॰ त्रैवतात्पर्यं तथा च कलिनिषिद्धेषु संसर्गदोषपरिगणनोक्तिः देशादिमात्रसंसर्गकृतयुगादौ दोषजनकत्वेनोक्त
॥९९॥ पाराशरपूर्वश्लोके। यश्चोत्तरश्लोके कृतयुगादौ संभाषणमात्राद्दोषः उक्तस्तद्विषयः। अथ प्रायश्चित्तं
याज्ञवल्क्यः। यो येन पतितेनैषां संसर्गं याति मानवः। स तस्यैव व्रतं कुर्यात्तत्संसर्गविशुद्धय इति पति
तयद्यत्पापिमात्रोपलक्षकं संसृगिये न संसर्गं कुर्यात् कृतमाचरेदिति जाबालोक्तेः। मतिपूर्वेपि संस
र्गे मिरणातिदेशः। किंतु द्वादशस्यैव व्रतपदात् अत्र च सत्यप्यतिदेशे पूर्वमेव द्वादशाब्दं भवति। द्वादशा
ब्दं निर्विषमहापातकिनः प्रयंत इति हारीतोक्तेः। निचेदं संसर्गिभिन्नमहापातकिपरं कृष्णस्तेयं सुरापश्च
ब्रह्महा गुरुतल्पगः। एतेनैते यश्चष्ठ्यंति महापातकिनस्त्विमे इति साक्षवाक्येनोपसंहारादिति वाक्यं
महापातकसंज्ञाया आनर्थक्यापत्तेः। अत एव वाक्यं तु संसर्गिणोप्युपलक्षणार्थं कामकृते ब्रह्मवधे त
त्संसर्गेपि च कामकृते मरणातुल्यकल्प्यं चतुर्विंशतिमते। अकामतस्तु द्वादशाब्दमित्याहुः अकामतः स राम:
घः पतितहेतुसंसर्गे तु वसिष्ठः। पतितसंप्रयोगे तु ब्राह्मेण वा स्रौवेण वा यौनेन वा तेभ्यः सकाशात्॥ ॥९९॥

मात्रा उपलब्धास्तासां परित्यागस्तेश्च न संवसेत् उदीचीं दिशं गत्वा अनश्नन् संहितामधीयानः शुद्धो भवती
ति। पराशरः। संसर्गमाचरेद्विप्रः पतितादिष्वकामतः। पंचाहं वा दशाहं वा द्वादशाहमथापि वा। मासार्धं मासमेकं
वा मासत्रयमथापि वा। अब्दार्धमब्दमेकं वा भवेदूर्ध्वं तु तत्समः। त्रिरात्रं प्रथमे पक्षे द्वितीये कृच्छ्रमाचरेत्। चरे
त्सांतपनं कृच्छ्रं तृतीये पक्ष एव तु। चतुर्थे दशरात्रं तु पराकः पंचमे मतः। षष्ठे चांद्रायणं कुर्यात्सप्तमे त्वैंदव
द्वयं। अष्टमे वाप्यथवा पक्षे षण्मासान् कृच्छ्रमाचरेदिति। ऊर्ध्वमिति नेन वर्षं द्वयं व्याप्य संसर्गो गृह्यते। अज्ञान
तः कृतस्य तावत्स्यैव पातित्यादकत्वात्। कामकृते तु मिताक्षरायां स्मृत्यंतरे। पंचाहं तु चरेत्कृच्छ्रं दशाहे त
प्तकृच्छ्रकं। पराकं त्वर्धमासे स्यान्मासे चांद्रायणं चरेत्। मासत्रये चैव कुर्वीत कृच्छ्रं चांद्रायणोत्तरं। षण्मासिके
तु संसर्गे कृच्छ्रं त्वब्दार्धमाचरेत्। संसर्गे त्वाब्दिके कुर्यादब्दं चांद्रायणं नरः इति किंचिन्न्यूने त्वेष्टव्यं। पूर्वं तु द्वाद
शाब्दविधानात्। उशना। कृतलक्षणे दर्शनस्पर्शनसंभाषणादि वर्जयेत् दर्शने ज्योतिषां दर्शनेन शुद्धया
लंघनं संभाषणे ब्राह्मणसंभाषणं पुनरपि स्पर्शने चेति कृतलक्षणेश्वपदांकितेनांकिते। पतितैरितिया

प्रा॰म॰
॥ ९०॥

वत्। स्पर्शनं च परं परया विवक्षितं। साक्षात्पतितस्पर्शने स्नानविधानात्। यथा मनुः। दिवाकीर्तिमुदक्यां च प
तितं सूतिकां तथा। शवं तत्स्पृष्टिनं चैव स्पृष्ट्वा स्नानेन शुध्यति। संभाषणं द्विचतुरायावृत्तं। सकृत्संभाष
णे पतितानां च संभाषेद्दक्षिणश्रवणे स्पृशेदिति लघुप्रायश्चित्तश्रवणात्। बृहस्पतिः। पतितानां गृहे गत्वा
भुक्त्वा च प्रतिगृह्य च। मासोपवासं कुर्वीत चांद्रायणमथापि च। चांद्रायणमज्ञानाभ्यासे। भोजनं तद्गृहे
ति केचित्। एकपंक्ताविति परे। भोजने वर्षस्य पातिकत्वाद् गृहगमनप्रतिग्रहयोरपि वर्षमेगच्छमेव शूलपाणि
ः। द्वांरवः। श्वमेध्यपातितचांडालपुल्कसरजस्वला धृतकुणिकुष्ठिकनस्वित्स्पृष्टानि भुक्त्वा कृच्छ्रमाचरेत्। इदं
सकृदज्ञानतः। ज्ञानतस्तु कृच्छ्रद्वयं पतितस्वामिकान्नभोजने स्वाह प्रचेताः। पतितान्नं तु यो भुंक्ते स यावत्सुद
के वसेत्। पानीयपानं तस्यैव कुशवारि पिबेदहं। इदं च सकृदज्ञानविषयं। पतितान्नभक्षणे तत्सिद्धान्नभक्ष
णस्य चतुर्थो भागः। चंडालान्नभक्षणे तथा दर्शनात्। तथा च वसिष्ठः। चंडालान्नं तु भुक्त्वा त्रिरात्रमु रामः
पवसेत्। सिद्धान्नं भुक्त्वा पराक इति पतितोच्छिष्टभक्षणे त्वंगिराः। चंडालपतितादीनामुच्छिष्टस्य भक्षणे ॥ ९९२॥

द्विजः शुध्येत्पराकेण भुक्त्वा कृच्छ्रेण शुध्यतीति। एतदपि सकृदज्ञानत एव। मार्कंडेयः। एकपंक्त्यां यस्य यः कश्चि
त्पंक्तौ भुंक्ते द्विजोत्तम। अहोरात्रोषितो भूत्वा पंचगव्येन शुध्यतीति। अत्र ब्रह्महादिचतुष्टयसंसर्गे संपूर्णमे
व व्रतमतिदिश्यते इतरपापसंतु चतुर्थांशेन। यो येन संपिबेद्वर्षं सोऽपि तत्तुल्यतामियात्। पादन्यूनं चरेत्सोऽपि त
स्य तस्य व्रतं द्विज इति व्यासोक्तेः। इतरपापेषु यो येन पापिना संसृज्यते स तदीयमेव प्रायश्चित्तं पादोनं कुर्यात्। ने
नापः संसर्गिणि वा तृतीयः पादोनं स प्राप्तमित्यादि। यत्तु महापापविषये विषये विज्ञानेश्वरः। द्वितीयसंस
र्गिपादोनं तृतीयोऽर्द्धं तृतीयः पादं चतुर्थः पादमित्यादि। यच्च शूलपाणिः। अपः पादोनं द्वितीयोऽर्द्धं तृतीयः
पादं चतुर्थो न किंचिदिति। एतदत्राशिरे वा विप्रः कृच्छ्रं तेषां विधीयते। तद्भोजिनोऽर्द्धकृच्छ्रेण तदन्नादास्तु पा
दत। चंडालान्नसंकरे व्यासोक्तेः। भुक्त्वा यैस्तत्र पक्वान्नं भुंक्ते तेषां विधीयते। तेषामपि च ये भुंक्ते कृच्छ्रार्द्धं ते
षां विधीयते तेषामपि च ये भुंक्ते कृच्छ्रं पादो विधीयते इति तत्रैवापस्तंबोक्तेः। तत्र एतयोर्वाक्ययोश्चंडाला
न्नसंसर्गविषयत्वेन सामान्यापि संसर्गविषयत्वेन तत्र लिंगदर्शनतावाच्या सा तु प्रत्यक्षव्यासवाक्येन बो

प्रा॰म॰
ऐ १

ध्यते अपनिषिद्धस्पर्शे याज्ञवल्क्यः चंडालपुल्कसम्लेच्छभिल्लपारसिकादिकान् महापातकिनश्चैव स्पृ
ष्ट्वा स्नायात्सचैलकः षट्त्रिंशन्मते बौधमाशुपतांश्चैव लोकायतिकनास्तिकान् विकर्मस्थान् द्विजान्स्पृ
ष्ट्वा सचैलो जलमाविशेत् मनुः दिवाकीर्तिमुदक्यां च पतितं सूतिकां तथा शवं तत्स्पृष्टिनं चैव स्पृष्ट्वा
स्नानं समाचरेत् दिवाकीर्तिश्चंडालः एतदकामतः तथा बृहस्पतिः दिवाकीर्तिं चितिं यूपं पतितं च रज
स्वलां स्पृष्ट्वा प्रमादतो विप्रः स्नानं कृत्वा विशुध्यति कामतो स एव पतितः सूतिकामन्त्यशवं स्पृष्ट्वा चकामतः
स्नात्वा सचैलं स्पृष्ट्वा घृतं प्राश्य विशुध्यति होमो व्याहृतिभिः स्नानविशेषमाह शातातपः चांडालं पतितं व्यं
गमुन्मत्तं शवसंत्यजं सूतिकां सूतिकां नारीं रजसा च परिप्लुता श्वकुक्कुटवराहांश्च ग्राम्यान्संस्पृश्य मान
वः सचैलं सशिरः स्नात्वा तदानीमेव शुध्यति छागलेयोपि चांडालं पतितं स्पृष्ट्वा सचैलं जलमाविशेत् शा
वं तत्स्पृष्टिनं चैव संस्पृश्य रजस्वलां अत्र श्वादिस्पर्शवत्स्नानं तत्स्वशिरोदेशावस्पर्शे त्वन्यत्र त्वाचमनं तदाह राम:
शातातपः रजकश्चर्मकारश्च व्याधजालोपजीविनौ निर्णेजकसौचिकश्चठकः शैलूषकस्तथा मुखेभ ९९३

वस्तपाम्याच वनिता सर्ववर्णगा चक्री ध्वजी वध्यघाती ग्राम्यसूकरकुक्कुटौ एभिर्यदंगं संस्पृष्टं शिरोवर्जं
द्विजादिषु तोयेन क्षालनं कृत्वा आचांतः शुचितामियात् अकामतः शिरःस्पर्शे तु वायुपुराणे उदक्यां सूति
कां चैव व्याधानंत्यावसायिनं नग्नादीन्मृतहारांश्च स्पृष्ट्वा स्नानं विधीयते स्नात्वा सचैलं मृद्भिः शुध्येद्द
दशनिर्नरः नग्नो बौद्धादयः तथा च विष्णुपुराणे सर्वेषामेव वर्णानां त्रयी संवरणं स्मृतं तां समुज्झति यो मो
हात्स नग्नः पापकृन्नर इति गार्ग्यः क्रव्यादश्वखरोष्ट्रस्पर्शे व्यतिहिते द्विजः अचैलवा सचैलं वा स्नानं कृ
त्वा विशुध्यति मतिपूर्वे सचैलमन्यदचैलं तथा मूढं स्पृष्ट्वा निषादं च शुध्येदाचमनाद्द्विजः तद्दीनस्पर्शना
द्बलात् प्राणायामैस्तपोबलात् अत्र चमनं स्नानं तु समं स्पर्शे स्पर्शे वा अत एव पराके स्मृत्यंतरं एडकं
कुक्कुटं काकं श्वानमंत्यावसायिनः दृष्ट्वैतानाचमेत्कर्मस्थः स्पृष्ट्वैषां स्नानमाचरेत् कर्मइति कर्मकाल इत्यर्थ
ः वृद्धयाज्ञवल्क्यः चंडालपुल्कसम्लेच्छभिल्लकापालिपारदान् उपपातकिनांश्चैव स्पृष्ट्वा स्नानं समाचरेत्
संवर्तः कैवर्तमृगयुव्याधशैलशाकनिकानपि रजकं च तथा स्पृष्ट्वा स्नात्वैवाशनमाचरेत् यत्वाप

स्तंबः॥ चर्मकारं रजकं धीवरं नटमेव च एतान् स्पृष्ट्वा द्विजो मोहादाचामेत् प्रयतोपि सन्। एतैः स्पृष्टस्तु उच्छि-
ष्ट एकरात्रं पयः पिबेत्। तैरुच्छिष्टैस्त्रिरात्रं स्यात् घृतं प्राश्य विशुध्यतीति। तत्राचमनमशक्तस्यान्नकामो
त्वाशौचायनिः॥ कापालिकानां संस्पर्शे स्नात्वा विशुध्यतीति। प्राणायामशतं कृत्वा घृतं प्राश्य विशु-
ध्यति शातातपः॥ यस्तु छायां श्वपाकस्य ब्राह्मणो ह्यधिगच्छति। तत्र स्नानं तु तस्यैव घृतं प्राश्यो विसर्जनं
एतच्चिरकालाधिष्ठान इति मदनदेवः॥ सर्वाङ्गीणे तु चंडालस्पर्शे प्रचेताः। स्वकायेन चंडालकायाभिस्पर्शने
त्रिरात्रं शुद्धिरिति यत्वापस्तंबः। सर्वेषामंत्यजादीनां स्पर्शे दाचमनं विडादरिति। तदातुरस्य स्पर्शे
तु मनुः। जान्वधः स्नानमात्रं स्यादाजानोरेकभक्तकं। नाभेरूर्ध्वं त्रिरात्रं स्यान्मूर्ध्नि रास्पर्शने विधिः। यत्तु मद-
देवोयं स्मृत्यंतरे मघेन स्पृष्टे यस्तु ब्राह्मणः ग्रामितव्रतं उपोष्य रजनीमेकां पंचगव्येन शुध्यतीति
तद्वद्वस्त्रस्य जान्वधः स्पर्शे मार्कंडेयपुराणे। अन्योन्यस्पृतिकाः खंडमार्जारो खुश्च कुक्कुटान्। पतिताप-
विशुद्धचांडालमनद्धारांश्च धर्मवित् संस्पृश्य शुध्यति स्नानादुदक्याग्रामसूकरौ। अन्योन्याः रजकाद् राम: ९९४

यच्चापविद्धोवहिष्कृतः। मृतहारो मूल्येन शवबहारकः। अंगिराः। आसवासमार्जाररखरोष्ट्रांश्च श्वसूकरान्
अमेध्यानि च संस्पृश्य सचैलो जलमाविशेदिति मार्जारो वनमार्जारः। गृहमार्जारस्य तु उचितात्। यथा
सुमंतुः। स्त्रीबालमशकमक्षिकामार्जारमूषिकछायासनशयनं तु विष्टपो निध्यमेध्याः बृहस्पतिः। स्त्रि-
यो वृद्धाश्च बालाश्च न दुष्यंति कथंचन। मार्जारश्चैव दर्वी च मारुतश्च सदा शुचिः। मशकमक्षिकासा-
हम्याश्रयान् मार्जारोत्र गृहस्थ एवेति शूलपाणिः। मिताक्षरायां तु मार्जारस्पर्शे स्नानमुच्छिष्टसमये अनुच्छि-
ष्टसमये वेति आपस्तंबः। एकशाखां समारूढश्चांडालो वा रजस्वला। ब्राह्मणस्तत्र निवसन् सवासा ज-
लमाविशेत्। शाखायां ग्रहणमेकावयवोपलक्षणं तेन काष्ठपाषाणादेरपि ग्रहणं। एतदकामतः। कामतस्तु
द्विगुणं। अभ्यासे तु मरणं वा। एकवृक्षसमारूढश्चांडालो रजस्वला। अहोरात्रोषितो मर्त्यः पंचगव्येन शु-
ध्यति। एतच्च स्नानानंतरं कार्यं यम। चांडालैः श्वपचैर्वा स्पृष्टे निशि स्नानं विधीयते। न वसेत्तत्र चैव योरात्रौ सद्यः
स्नानेन शुध्यति। अथ तत्र वसेद्रात्रावविचक्षणः। तदा तस्य तु तत्पापं शतधा परिवर्तते। पराशरः। अस्तंगते

प्रा॰म॰ ॥ ९३ ॥

यदा सूर्ये चांडालपतितं स्त्रियं सूतिकास्पृशातस्यैव कथं शुद्धिर्विधीयते जातवेदसुवर्णं च सोममार्गं तथैव च ब्रा
ह्मणानुगतस्यैव स्नानं कृत्वा विशुध्यतीति रात्रौ स्नाने विशेषमाह देवलः दिवाहृतेन जलेन स्नानं निशि कुर्या
दग्निमिन्नतः प्रक्षिप्य च सुवर्णं च सन्निधाप्य च पाकं शातातपः आदित्येऽस्तमिते रात्रावस्पृश्यस्पृशते य
दि गंगावन्येन शुद्धिः स्यादग्ने ब्राह्मणेऽस्तु निश्चितं अनस्तमित आदित्ये संगृहीतं तु यत्कृतं तेन सर्वात्म
ना शुद्धिः शावस्पृष्टं च वर्जयेत् पराशरः स्नानमाचरणं प्रोक्तं दिवोद्धृतजलेन तु स्त्रीणां विशेषमाह शा
तातपः स्त्रीशौरस्पृश्यस्पर्शनं प्रोक्तं बालस्याचमनं स्मृतं रजस्वलादिसंस्पर्शे स्नानं न तु कुमारकैः स एव प्राकृ
चूडाकरणात् बालः प्रागन्नप्राशनं छिन्नु कुमारस्तु सविज्ञेयो यावन्मौंजीनिबंधनं शावस्पर्शे चंडालस्पर्शे ष
ट्त्रिंशन्मते चंडालशवसंस्पर्शे कृच्छ्रं कुर्यात् यानशय्यासने तु त्रिरात्रं जीवतश्चंडालेन सह यानादिषु त्रि
रात्रं व्रणबंधनाभ्यंजनरुधिरोत्पादनेषु कृच्छ्रं द्वादशरात्रं चरेत् व्रणबंधनादीनां चांडालं प्रति करणे च राम॰
डालेन सह यानादिषु चात्मनि करणे आपस्तंबः येन केनचिदभ्यक्तश्चंडालं पतितं स्पृशेत् उपवा ॥ ९९५ ॥

सेन चैकेन पंचगव्येन शुध्यति एतच्चाभ्यासे अनभ्यासे त्वपराकेऽप्रचेताः चंडालो यदि कायस्य रक्तमु
त्पादयेत्कचित् त्रिरात्रेणाविशुद्धिः स्यादेकरासेऽपणोचोत्तरे उत्तरे क्षत्रियादौ त्रिरात्रादेकैकस्याह्नः क
तुः चंडालस्योच्छिष्टदाने चंडालकृतुदर्शने गौतवादिकं श्रवणे षस्प्याक्रियायां च त्रिरात्री भोजने न शु
द्धिः अशुचिं दृष्ट्वादित्यमीक्षेत प्राणायामं कृत्वा पंचदशमात्रकं सुमंतुः चंडालदर्शने सूर्यदर्शनं भाषणे
ब्राह्मणाभिभाहारः स्पर्शने सचैलं स्नानमिति ब्रह्म गायत्री कचिदस्तु चिदर्शनेपि गायत्रीजपस्तथा चरां
स्व लिखितौ अशुचिदर्शने गायत्रीमेव जपेदिति गौतमः न म्लेच्छाशुच्या धार्मिकैः सह संभाषेत संभाष्य त
संभाष्य पुण्यकृतो मनसा ध्यायेत् ब्राह्मणेन वा सह संभाषेत तु व्यान्नधनलाभे वेधे पृथक् वर्षाणीति त
त्संभार्याः पृथक् प्रत्येकं वृद्धपराशरः दारान्नधनलाभानां बुधाविघ्नसमाचरेत् प्रत्येकं प्राकृतं कुर्या
द्ब्रह्मचर्यं तु वार्षिकमिति मनुः आचम्य प्रयतो नित्यं जपेदशुचिदर्शने सौरान्मंत्रान् यथोत्साहं पावमानी
श्च शक्तितः देवलः चंडालधर्मसंयोगे राजापत्यं समाचरेत् चरेत्त्रिरात्रे चंडालं कूपतीर्थनिषेवणे

प्रा.म. तृ घर्मसंयोगं तु पदेशः। पराशरः। चंडालैः सह सुप्तस्तु त्रिरात्रमुपवसेत्॥ चंडालैकपथं गत्वा गायत्रीस्मरणा-
॥९४॥ च्छुचिः। एतच्चाल्पकालसाध्ये अत्र प्रायश्चित्ताधिकारस्य वक्ष्यमाणत्वात्॥ अपरार्के वसिष्ठः। चंडालेन तु सं-
स्पृष्टे कांस्यभांडे सम्मृन्मये अज्ञानात् कांस्यभोजी तु मृन्मये जलपानकृत्। कांस्ये कृच्छ्रं चरेत् कृच्छ्रं जलपाने
तु कृच्छ्रकं कृच्छ्रकः पादकृच्छ्रः। अथ चांडालसंकरे पराशरः। अविज्ञातस्तु चांडालो यत्र वेश्मनि तिष्ठ-
ति। ज्ञात्वा पक्रम्य दध्ना सर्पिःपयोभ्यां च मुक्तं गोमूत्रयावकं। भुंजीत सह भृत्यैश्च त्रिसंध्यमवगाहनं। त्र्यहं
भुंजीत दध्ना च त्र्यहं भुंजीत सर्पिषा। त्र्यहं क्षीरेण भुंजीत एकैकेन दिनत्रयं। भावदुष्टं न भुंजीत नोच्छिष्टं कृमि-
मिदूषितं। त्रिपलं क्षीरदध्नोश्च पलमेकं तु सर्पिषः। भाकरेषु भवेत् शुद्धिरारकूटे स कांस्यके। जलशौचेन वस्त्रा-
णां परित्यागो मृन्मये। कुसुंभगुड कार्पासं लवणं तैलसर्पिषी। द्वारे कृत्वा च धान्यानि दद्याद्वेश्मनि पावकं रामः
एवं शुद्धः स्मृतः। पश्चात्कुर्याद्ब्राह्मणतर्पणं। त्रिंशतं गावृषं चैकं दद्याद्विप्रेषु दक्षिणां। पुनर्लेपनखना-
ते न होमजप्येन शुद्ध्यति। आधारेण च विप्राणां भूमिदोषो न विद्यते इति। स्वल्पकालसंपर्क एतत्। य ॥९९६॥

तु संवर्तः। अंत्यजः पतितो वापि निरुद्धो यत्र तिष्ठति। सम्यक् ज्ञात्वा तु कालेन ततः कुर्याद्विशोधनं। चांद्रायणं परा-
को वा द्विजातीनां विशोधनं। प्राजापत्यं तु शूद्राणां शेषाणामिदमुच्यते। येस्तत्र मुक्तं पक्वान्नं तेषामुक्तोपि
विक्रमः। शेषाणां प्राजापत्य इत्यर्थः। तेषामपि तु यैर्भुक्तं कृच्छ्रं पादो विधीयते। कूपैकपानदुष्टा ये तथा सं-
सर्गदूषिताः। सर्वे ते चोपवासेन पंचगव्येन शोधयेत्। बालापत्या तथा रोगी गर्भिणी वृद्ध एव च तेषां नक्तं
प्रदातव्यं बालानां प्रहरद्वयं। वकुकालार्घ्यमेतत्। अत्र विशोधनप्रकारं प्रायश्चित्तांतरं वाह च्यवनः॥
चांडालसंकरे भवनदहनं सर्वमृद्भांडभेदनं दारवाणां तु तक्षणं शंखशुक्तिसुवर्णरजतचैलानामद्भिः स्ना-
पनं। कांस्यताम्राणामाकरे शुद्धिः। सौवीरदधितक्राणां परित्यागस्तैलरसद्रव्यरक्षणं गोमूत्रं यावकाहारो
मासं न क्षपयेत्। बालवृद्धस्त्रीणामर्द्धप्रायश्चित्तं आषोडशाद्बालाः सप्ततेरूर्ध्वं वृद्धाः। एतेषां प्रायश्चित्ते ब्राह्मण-
भोजनं गोशतं दद्यात्। अभावे सर्वस्वमिति। एतदतिचिरकालसंकरे। पराशरः। चंडालैः सह संपर्कं मासं मा-
सार्द्धमेव च। गोमूत्रयावकाहारो मासार्द्धेन विशुध्यतीति कृत्वेति शेषः। मासार्द्धं न मासार्द्धं मास संपर्के

प्रा॰म॰

॥ ९५ ॥

मासेवानर्द्दसंपर्के त्वह्निन चंडालश्राद्धे न तत्समः पुल्कसादयो प्युपलक्ष्यंते अत एव संवर्त्तः। चांडालैः सकरैर्वि
प्रः श्वपाकैः पुल्कसैरपि गोमूत्रयावकाहारो मासार्द्धेन विशुध्यति मासधिककिंचित्कालसंकरे हारीतः
चांडालैः संयोगे प्राजापत्येन शुध्यति। विप्रान् दशावरान् कृत्वा तैरनुज्ञाप्य शासनात्। आर्कं वस्य प्रमाणं तु
कुर्याद्गोमयकर्दमं। तत्रस्थित्वा त्वहोरात्रं पात्रं नक्षयमाहितः। बालकृच्छ्रं ततः कुर्यात् गोष्ठे वसति सर्व
था सके शंवपनं कुर्यात् परमां शुद्धिमिच्छतीति। बालकृच्छ्रलक्षणमुक्तं यत्तु हारीतः। चंडाश्वलेपाचानां च
संकरे समुपस्थिते। अहोरात्रं द्विरात्रं वा त्रिरात्रं षडहं स्मृतं। अविज्ञातकचंडालः समाहं निव
सेद्यदि। तस्य ज्ञात्वोपपन्नस्य विप्राः कुर्युरनुग्रहं। दधिक्षीरघृतैर्युक्तं कृच्छ्रं गोमूत्रयावकं प्राशये-
त्सह न्द्यैः सक्तमासमेकं निरंतरमिति। तदहोरात्राद्यनिसंकरे परावार। रजकीचर्मकारीच लुब्धकीवेणु
जीविनी चातुर्वर्ण्यस्य गेहे तु चाज्ञानाद्याधितिष्ठति। ज्ञात्वा तु निष्कृतिं कुर्यात्पूर्वोक्तस्यार्द्धमेव तु। गृहदाहं च
कुर्वीत शेषं सर्वं च कारयेदिति। अत्र यादृशा चांडालसंसर्गे पतरजकादिताद्दृशा संसर्गेति दृढीरजक्या

राम:

९९१

द्विषुलिंगमविवक्षितं। बृहस्पतिः। अर्कस्य तस्या परिवापहा त्रायेत संकरः। तदा कार्यं तिलैर्होमं गायत्र्याऽयुज
नं तथा। स्नात्वाघमर्षणं कुर्यात् प्राणायामं च संकरा। गायत्री सूक्तजपनं तिलैर्होमश्च शक्तितः। अका
मतः कृते स्वल्पे शुद्धिरेषा प्रचोदितेति। अथोच्छिष्टादिस्पर्शे आबस्तंबः। येनकेनचिदुच्छिष्टः संस्पर्शेय
:परैः सह। गच्छेत्स यमभाशुष्मप्राय श्चित्तेन युज्यत इति। शातातपः। चंडालैः श्वपचैः स्पृष्टो विण्मूत्रे कृ
कृते द्विजः। त्रिरात्रं तत्र कुर्वीत भुक्तोच्छिष्टः षडाचरेत्। अत्रषडुपवासे प्राजापत्यतुल्यता। तत्रानुच्छिष्टस्य
परस्पर्शे स्नानं तस्योच्छिष्टस्याकामतस्त्र्यहं शेषषडुपवासतुल्यं प्राजापत्यं तथा च हारितः। अनुच्छिष्टस्य
संस्पर्शे स्नानं येन विधीयते। उच्छिष्टस्तेन संस्पृष्टः प्राजापत्यं समाचरेत्। तथाह मनुः। चंडालपतितं वापि त
था नारी रजस्वलां उच्छिष्टस्तु जस्पृष्टा प्राजापत्येन शुध्यति एतत्कामतः। यत्त्वापस्तंबः। भुक्तोच्छिष्टस्त्व
जैः स्पृष्टः प्राजापत्यं समाचरेत्। अर्द्धोच्छिष्टे स्मृतं पाद। पादमामा त्रानेतथेति। अत्र अर्द्धोच्छिष्टश्च रवे
मासप्रदेयमात्रं कृतं न तु निगीर्णः। अकामतः स एव भुक्तोच्छिष्टत्वनाचंतश्चांडालैश्वपचेन वा प्रमादा-

प्रा·म·

॥ ९९ ॥

स्पर्शनं गच्छेत्तत्र कुर्याद्विशोधनं गायत्र्यष्टसहस्रं तु द्रुपदानां शतं तथा त्रिरात्रोपोषितो भूत्वा पंचगव्येन शु
ध्यति। यस्तु स एव चांडालेन तु संस्पृष्टो विशेषश्चात्र द्विजोत्तमः। उपस्पर्शेज्जनामेकं पंचगव्येन शुध्यतीति
यत्तदापस्तंबमतं। काश्यपः। अस्पृश्यकरोत्य चांडालमद्यभांडरजस्वला। भुक्तोच्छिष्टः स्पृशेत्तत्र कृच्छ्रं सांतप
नं चरेत्। एतत्कामतोऽभ्यासे मद्यं सुरा। अन्यत्राल्पप्रायश्चित्तस्योक्तत्वात्। तथा च वृद्धशातातपः। उच्छि
ष्टः संस्पृशेद्विप्रो मद्यस्पृश्यं श्वनौ शुचान्नहोरात्रोषितो भूत्वा पंचगव्येन शुध्यतीति। यत्तूच्छिष्टादेः श्वादि
स्पर्शे संवर्त्तः। कृतमूत्रपुरीषो वा भुक्तोच्छिष्टोऽथवा द्विजः। श्वादिस्पर्शे जपेद्देव्या सहस्रं स्नानपूर्वकमिति तद
कामतः। यत्तु पराशरेणापस्तंबः। उदक्यास्पृष्टउच्छिष्टो विड्वराहैश्च कुक्कुटैः। काकमार्जारक्रव्याद्भिरुप
वासेन शुध्यतीति तदामघकामतः। यत्तु व्याघ्रः। चंडालोदकसंस्पृष्टस्नानं कृत्वा विशुध्यति। उच्छिष्टस्ते
न संस्पृष्टस्त्रिरात्रेण विशुध्यतीति तदप्यकामत एव। यत्तु दक्षः। पाने मैथुनसंसर्गे तथा मूत्रपुरीषयोः सं
स्पर्शं यदि गच्छेत्तु शावोदक्यांत्यजैः सह। दिनमेकं चरेन्मूत्रे पुरीषे तु दिनद्वयं त्रिदिनं मैथुने स्यात्पाने त्वन्ये तु

रामः

॥ ९९ ॥

स्याच्चतुष्टयमिति तत्कामतः। संवर्त्तः। चर्मारं रजकं वेणं धीवरं नटमेव च। एतान्स्पृष्ट्वा ततोच्छिष्ट एकरात्रं पयः
पिबेत्। तैरुच्छिष्टैस्त्रिरात्रं स्यात् घृतं प्राश्य विशुध्यतीति। अधोच्छिष्टविषयं चेदं। ऊर्ध्वोच्छिष्टे तु त्रिरात्रं। तथा
च लघुहारीतः। उच्छिष्टः संस्पृशेद्यस्तु नटरजकमोचकान्। अधोच्छिष्टे यदा तस्य स्यादेकरात्रं विभोजनं। ऊर्ध्वो
च्छिष्टे यदा तस्य प्रायश्चित्तं भवेदिदं। उपवासस्त्रिरात्रं स्यात् घृतं प्राश्य विशुध्यतीति। अतस्त्वत ऊर्ध्वोच्छिष्टस्य
तैरुच्छिष्टैः स्पर्शे षड्रात्रं। एवमेव यत्रोर्ध्वोच्छिष्टस्य चांडालादिस्पर्शे षड्रात्रं। तत्रोच्छिष्टस्य तदर्द्धं त्रिरात्रं
अत एव शातातपः। उच्छिष्टस्तु स्पृशेद्विप्रश्चांडालं तु कथंचन। ऊर्ध्वोच्छिष्टस्तु संस्पृश्य द्विजः सांतपनं चरे
त्। अधोच्छिष्टस्त्रिरात्रेण तेन पंचगव्येन शुध्यतीति। सांतपनमिदं समाद साध्यं। यत्तु चांडालादीनुपक्रम्य वृ
द्धशातातपः। अशुचीनेतान्यमप्येतानशुद्धश्च यदा स्पृशेत्। विशुध्यत्युपवासेन त्रिरात्रेणाततः शुचिः। त
थाऽशातानेव प्रकृत्याह देवलः। अशुद्धान्स्वयमप्येतानशुद्धो यदि संस्पृशेत्। विशुध्यत्येयवासेन कृच्छ्रेण
वा पुनरिति। अत्राशुद्धानिति स्वरूपकीर्त्तितं मूत्रादिकरणेन वा। स्वयमशुद्ध इत्यधोच्छिष्टादिना एकरा

प्रा॰म॰
॥९७॥ जमायायज्ञानतः। त्रिरात्रज्ञानतः। कृच्छ्रस्त्वभ्यासे मिताक्षरायांतु कृच्छ्रः। श्वपाकादिविषयम्। श्वादिषु तूपवास इ
ति यमशातातपौ। श्वस्पृष्टे हस्त काष्ठे न वास सास्पृष्ट एव वा। प्रक्षाल्यांगं तदाचामेत्। उच्छिष्टस्तु निशां द्विपदि
ति। तदप्युक्त एव विषये। उच्छिष्टस्य पुरुषस्य श्वस्पर्शे हारीतः। श्वविष्ठां काकविष्ठां वा अंकं ग्रघ्नं नरः स्पृश
न्नधोच्छिष्टस्तु संस्पृष्टः सचैलो जलमाविशेत्। ऊर्ध्वोच्छिष्टस्तु संस्पृष्टः प्रायश्चित्तमिदं चरेत्। उपोष्य
रजनीमेकां पंचगव्येन शुध्यतीति। उच्छिष्टस्य चांडालान्त्यस्पर्शे विशेषमाह हारीतः। उच्छिष्टस्तु स्पृशेद्विप्र
श्चांडालान्कथंचन। ऊर्ध्वोच्छिष्टस्तु संस्पृष्टो द्विजश्चांद्रायणं चरेत्। अधोच्छिष्टयदास्पृष्टः प्रायश्चित्तं च वेदिदं
त्रिरात्रमुपवासस्यात्पंचगव्येन शुध्यतीति। पराशरः। उच्छिष्टोच्छिष्टसंस्पृष्टः शुना शूद्रेण वा पुनः। उपोष्य
रजनीमेकां पंचगव्येन शुध्यतीति। उच्छिष्टश्वासावुच्छिष्टसंस्पृष्टश्चेति विग्रहः। सवर्णाविषयमेतत्। अत्रिः।
उच्छिष्टोच्छिष्टसंस्पृष्टो ब्राह्मणो ब्राह्मणेन तु। दशरूपं जपेत्सम्यग्गायत्र्या शोधनं भवेत्। ब्रह्मपुराणे उच्छि रामः
ष्टेन तु विप्रेण द्विजः स्पृष्टस्तु तादृशा। उभौ स्नानं प्रकुर्वीत सद्य एव समाहिताविति। उच्छिष्टं विप्रहस्ता ॥९९॥

ह पराशरः। अनुच्छिष्टेन शूद्रेण स्पर्शे स्नानविधीयते। तेनोच्छिष्टेन संस्पृष्टः प्राजापत्यं समाचरेदिति। यत्तु
ब्राह्मे। उच्छिष्टेनापि शूद्रेण विप्रः स्पृष्टस्तु तादृशः। उपवासेन शुद्धः स्याच्छुना संस्पृष्ट एव चेति। तदापद्ध
शक्तस्याद्विवलोपि। उच्छिष्टं मानवं स्पृष्ट्वा भोज्यं वापि समाहितः। तथैव हस्तौ चैव पादौ च प्रक्षाल्याचाम्य शुध्य
तीति। द्रव्यहस्तस्योच्छिष्टस्पर्शे मनुः। उच्छिष्टेन तु संस्पृष्टो द्रव्यहस्तः कथंचन। अनिधायैव तद्द्रव्यमा
चांतः शुचितामियात्। एतदभोज्यविषयं। भोज्यविषये तु वसिष्ठः। प्रचरन्नन्नपानेषु यद्युच्छिष्टमुपस्पृ
शेत्। भूमौ निधाय तद्द्रव्यमाचांतः प्रचरेत्ततः। तद्द्रव्यस्य तु प्रोक्षणं कार्यमित्याहतुः। शंखलिखितौ। द्रव्यह
स्त उच्छिष्टोनधायाभ्युक्षयेत् द्रव्यमिति। उच्छिष्टो उच्छिष्टस्पृष्टः। एतच्चानुच्छिष्टहस्तादिना स्पर्शे सौज्ञा उच्छि
ष्टहस्तादिस्पर्शे त्वभोज्यमेव। यथाह वसिष्ठः। उच्छिष्टमगुरोरभोज्यं स्वमुच्छिष्टोपहतं चेति। उच्छिष्टस्य तै
लाभ्यक्तस्य च मूत्रादिकरणे आपस्तंबः। तैलाभ्यक्तस्त्वनाचांतः। श्मश्रुकर्मणि मैथुने। मूत्रोच्चारं य
दा कुर्यादहोरात्रेण शुध्यति। उच्छिष्टस्य सूर्यादिदर्शने दोष उक्तो मार्कंडेयपुराणे। सूर्येंदुतारका दृष्ट्वा

प्रा॰म॰ ९८ योच्छिष्टैः कदाचन तेषामामर्येन रे रश्मिन्नस्तौ वह्निः समिष्यते ॥ अत्र च स्नातकव्रतलोपप्रायश्चित्तं मभोजन
मिति मन्वुक्तं द्रष्टव्यं ॥ तस्यैव चांडालादिस्पर्शे बौधायनः ॥ चांडालदर्शने ज्योतिषां दर्शनं संभाषणे ब्राह्म
णसंभाषणं उच्छिष्टस्पर्शने त्वेकरात्रमुपवासः ॥ संभाषणे द्विरात्रं संस्पर्शने त्रिरात्रं सहगमने स
चैलं स्नानमिति ॥ चंडालदर्शनं इत्यनुच्छिष्टस्य दर्शनं इति उच्छिष्टस्य चांडालदर्शन इत्यर्थः ॥ एवमन्ये
पि उच्छिष्टस्य पलांडुवादिस्पर्शे बृहस्पतिः सुरापलांडुलशुनस्पर्शे कामकृते द्विजः ॥ अहं पिबेत्कुशाजलं
सावित्रीं च जपेत्तथा कृदस्य चोच्छिष्टस्येति शूलपाणिः ॥ यत्तु सएव ॥ पलांडुलशुनस्पर्शे स्नात्वान कीर्त
समाचरेत् ॥ कृतो चारसत्य देरात्रं उच्छिष्टो ह्यहमाचरेदिति ॥ इष्योच्छिष्टविषयं तद्योच्छिष्टेऽन्यकामविष
यं वा ॥ अथानुच्छिष्टस्य नीलीवस्त्रपरिधाने भविष्यत्पुराणे ॥ शृणु षेति महाबाहो नीलीवस्त्रस्य धारण
त् ॥ वाससो मणाशाई लगादतो मम हृत्स्थशः ॥ पालनं द्विककपाठेयत हनेरुपजीवनात् ॥ पतितस्तु भ राम॰
वेद्विप्रस्त्रिभिर्वर्षैर्विशुध्यति ॥ नीलीरक्तेन वस्त्रेण यत्कोर्मकुरुते द्विजः ॥ स्नानं दानं तपो होमः स्वाध्यायपि ॥ ९९ ॥

तृतर्पणं वृथा तस्य महायज्ञो नालवस्त्रस्य धारणात् ॥ नीलवस्त्रं पदारक्तं कश्चिद्विप्रस्तु धारयेत् ॥ अ
होरात्रोषितो भूत्वा पंचगव्येन शुध्यति ॥ रोमकूपे यदा गच्छेद्रसो नील्यादिकः क्वचित् ॥ त्रिवर्षेषु चसीमानंत
मकृच्छ्रं विशोधनं ॥ नीलदारु यदा भिद्याद्ब्राह्मणस्य शरीरतः ॥ शोणितं दृश्यते यत्र द्विजश्चांद्रायणं चरेत् ॥ इदम
ज्ञाने ज्ञाने तु द्विगुणः ॥ अत्रायपवादः ॥ नीलीमनुवर्तनीवापस्तंब ॥ स्त्रीणां क्रीडार्थसंयोगे शयनीये न दुष्यती
ति ॥ एवमेवके शानिमितवस्त्रधारणेऽपि सः ॥ पंचगव्य घृतं हिरण्योदकं चाधिकमिति स्मृत्यर्थसारे ॥ अथ पदजनि
र्माल्यस्पर्शे कालिकापुराणे ॥ स्पृष्ट्वा रुद्रस्य निर्माल्यं सवासा आप्लुतः शुचिः ॥ अथ रजस्वलाया अन्यस्पर्शस्पर्शे त
त्र रजस्वलयोः सपत्न्योरेकगोत्रयोः स्पर्शे वसिष्ठः ॥ स्पृष्टे रजस्वलेऽन्योन्यं सगोत्रे त्वेकभर्तृके ॥ कामादकामतो वा
पि सद्यः स्नानेन शुध्यतः ॥ असपत्न्योस्तु सवर्णयोः स्पर्शे मार्कंडेयः ॥ उदक्यां तु सवर्णा यास्पृष्टा चेत्स्यादुदक्य
या ॥ तस्मिन्नेवाहनि स्नाता शुद्धिमाप्नोत्यसंशयः ॥ रजस्वलानुसंस्पृष्टा ब्राह्मणा ब्राह्मणी यदि ॥ एकरात्रं निरा
हारा पंचगव्येन शुध्यति ॥ यत्तु पराशरः ॥ स्पृष्ट्वा रजस्वलान्योन्यं ब्राह्मणी ब्राह्मणी ... तावत्तिष्ठेन्निराहा

रात्रिरात्रेणैव शुध्यतीति तत्कामतोऽभ्यासे सहशयनादिचिरस्पर्शे वा। सएव वर्णस्पर्शे पुनः सएव रजस्वला
तु संस्पृष्टा राजन्या ब्राह्मणी यदा। त्रिरात्रेण विशुद्धिः स्याद्व्यासस्य वचनं यथा। रजस्वला तु संस्पृष्टा वैश्यया
ब्राह्मणी च या। पंचरात्रं निराहारा पंचगव्येन शुध्यति। रजस्वला तु संस्पृष्टा शूद्रया ब्राह्मणी च या। षड्रात्रे
ण विशुद्धिः स्याद्ब्राह्मण्याः कामकारतः। अज्ञानतश्चरेदर्द्धं ब्राह्मणी सर्वजातिषु। अत्र यथा ब्राह्मणी रजस्वला
योः स्पर्शे उपवासः पंचगव्याशनं च तथान्यासामपि सामपि सवर्णरजस्वलास्पर्शे इति देव यथा ब्राह्मण्याः क्षा
त्रियास्पर्शे त्रिरात्रं तथा क्षत्रियाया वैश्यायास्पर्शे वैश्यायाः शूद्रास्पर्शेऽपि तदेव तथा च मदेवनिबंधे स्मृ
तिः रजस्वला तु या नारी अन्योन्यमुपसंस्पृशेत्। सवर्णे पंचगव्येन त्रिरात्रमसवर्णके। पंचगव्येन उपवास
सहितेनेति मदेवः। तथा शातातपः। रजस्वले तु ये नार्यावन्योन्यं स्पृशतो यदि। सवर्णे पंचगव्यं च ब्रह्मकूर्च
मतः परमिति। यत्तु बृहद्वसिष्ठः स्पृष्ट्वा रजस्वलान्योन्यं ब्राह्मणी शूद्रजापि वा। कृच्छ्रेण शुध्यते पूर्वा शूद्रा
दानेन शुध्यति। स्पृष्ट्वा रजस्वलान्योन्यं ब्राह्मणी वैश्यजापि वा। पादहीनं चरेत्पूर्वा कृच्छ्रपादं तथोत्तरा।

स्पृष्ट्वा रजस्वलान्योन्यं ब्राह्मणी क्षत्रिया तथा। कृच्छ्रार्द्धाच्छुध्यते पूर्वा उत्तरा तु तदर्द्धतः। स्पृष्ट्वा रजस्वलान्योन्यं
क्षत्रिया शूद्रजातिया। उपवासैस्त्रिभिः पूर्वा त्वहोरात्रेण चोत्तरा। स्पृष्ट्वा रजस्वलान्योन्यं क्षत्रिया वैश्यजापि
च। त्रिरात्राच्छुध्यते पूर्वा त्वहोरात्रेण चोत्तरा। स्पृष्ट्वा रजस्वलान्योन्यं वैश्या शूद्रा तथैव च। त्रिरात्राच्छुध्यते
पूर्वा उत्तरा तु दिनद्वयात्। वर्णानां कामतः स्पर्शे शुद्धिरेषा पुरातनीति। एतच्चाकामतोऽभ्यासे दानेन पादकृ
च्छ्रमन्यत्राप्यायेत्। पतितचांडालादिस्पर्शे वृद्धवसिष्ठबृहस्पती। पतितांत्यश्वपाकेन संस्पृष्टा चेद्रजस्व
ला। तान्यहान्यतिक्रम्य प्रायश्चित्तं समाचरेत्। प्रथमेऽह्नि त्रिरात्रं स्याद्द्वितीये त्र्यहमेव तु। अहोरात्रं तृती
येऽह्नि चतुर्थे नक्तमेव च। शूद्रयोच्छिष्टया स्पृष्टा शुनाथ त्र्यहमाचरेत्। तान्यवशिष्टानि दिनानि व्यति
क्रम्य। अनाशकेन तत्त्वेत्यर्थः। अत्र सर्वत्र पंचगव्यप्राशनमपि कर्तव्यमिति देवलः। यत्तु बौधायनः रज
स्वला तु संस्पृष्टा श्वचांडालात्यवायसैः। तावत्तिष्ठेन्निराहारा यावत्कालेन शुध्यतीति। एतदशक्तायाः। अ
कामे वा। अत्र तु शातातपः। उदक्या सूतिका वापि शवं चांत्यं संस्पृशेद्यदि। त्रिरात्रेणोषिता भूत्वा पंचगव्येन

प्रा॰म॰
॥१००॥

णो व्युध्येत इति शातातपोऽब्रवीत्। तथा। चांडालैः श्वपचैर्वापि स्पृष्टा स्त्री त्वृतुमती यदि। त्रिरात्रोपोषिता भूत्वा पं
चगव्येन शुध्यति। कारयेत्। चांडालेन तु संस्पृष्टा कदाचित्स्त्री रजस्वला तान्यहानि तिक्रम्य प्रायश्चित्तं समाच
रेत्। त्रिरात्रमुपवासः स्यात्पंचगव्येन शोधनं। तनिता स्तु व्यतिक्रम्य स्नानं प्राप्नोति तु कारयेदिति। तदेतत्प्र
थमदिनविषयं शूलपाणिस्तु कामोपवासोऽप्रथमादिदिनव्यवस्थानास्ति। त्रिरात्रेणैवेति वृद्धशातात
पवाक्यात्। तथा च कामविषयमित्याह। तन्न बार्हस्पत्येन प्रथमदिन एव त्रिरात्रस्य व्यवस्थितत्वात् तद्वि
षयत्वमेव न्याय्यमिति। उपवासासमर्थायां तु अंगिराः। चांडालैः श्वपचैर्वापि पात्रे यो स्पृष्टा यदि। स्नानकाल
स्त्वशेषेर्विवस्त्रैः तु पंचगव्येन शुध्यतं। पंचगव्यपानं तु स्नानं तरं कार्यं। चांडालेन सहैक वृक्षारोहणे पराशर
: एकवृक्षं समारूढो श्वांडालो यो रजस्वला। अहोरात्रोषितो भूत्वा पंचगव्येन शुध्यति। श्वादिस्प
र्शे विशेषमाह यमः। रजस्वला तु संस्पृष्टा श्वुनो जंबूकवायसैः। निराहारा भवेत्तावत्पीवत्कालेन शुध्य राम:
ति। एतदकामतः कामतः। कामतस्तु रजस्वला तु वृत्तौ बृहस्पतिः। श्वुनोच्छिष्टया श्वदासस्पृष्टा घूस्ना ९९२

चरेत्। अहोरात्रत्तताये क्षिप्रतो नक्तमाचरेदिति। प्रथमद्वितीयदिने श्वादिस्पर्शे ग्रहं। परस्त्र चतुर्थे। त्रि
रात्रोपितान्यहानि व्यतिक्रमेति योज्यं। यत्तु बौधायनः रजस्वला तु संस्पृष्टा ग्राम्यकुक्कुटसूकरैः। श्वभिः स्ना
त्वा पिबेत्तोयं यावद्वै उस्पदर्शनमिति। चेद्दर्शनं नक्तमित्यर्थः। एतद् ग्राक्रयाः चतुर्थदिनविषयं वा र
जकादिस्पर्शे तु श्वस्पर्शसमानमेव तपो समानत्वादिति शूलपाणिः। यत्तु प्रचेताः रजस्वला तु संस्पृ
ष्टा श्वुना चांडालरासभैः। पंचरात्रं निराहारा पंचगव्येन शुध्यतीति तत्कामतो भ्यासे भोजनकाले श्वांत्यजा
दिस्पर्शे तु बौधायनः। रजस्वला तु भुंजाना श्वांत्यजादि स्पृशेद्यदि। गोमूत्रयावकाहारा षड्रात्रेण विशुध्यति
अशक्तौ कांचनं दद्याद्विप्रेभ्यो वापि भोजनमिति। उच्छिष्टयोः परस्परं स्पर्शे त्वत्रिः। उच्छिष्टोच्छिष्टसंस्पृष्टा क
दाचित्स्त्री रजस्वला। कृच्छ्रेण शुध्यते पूर्वा शूद्रा दानैरुपोषितेति। अत्र पूर्वा शिष्टेन ब्राह्मण क्षत्रियवैश्यस्त्रि
यो विधीयंते। ते न रजस्वलयोः समानजातीययोरुच्छिष्टयोः ब्राह्मणक्षत्रियावैश्यानां परस्परं स्पर्शे प्राजाप
त्यः। स्वस्वातं स्पर्शे त्वेकैक वृद्धिरूह्नीया। तादृशयोः स्पर्शे परस्परं तूपवासः सहितं प्राजापत्यमाम्नाय दाने

प्रा·म·

॥१०२॥

न शुद्धिः॥ एतच्चाकामतः॥ अकामतस्तद्धर्मस्पर्शनपाशिक्त उच्छिष्टे न तु संस्पृष्टा कदाचित्स्त्री रजस्वला॥ कृच्छ्रेण तु
विशुध्येत पूर्वा दानेन शुध्यतीति यथाव तत्रोच्छिष्टे न चैव डालादिना दानेन कृच्छ्रप्रत्याम्नायेन एषु रजस्व
लात्वमेव निमित्तमतो न क्षत्रियवैश्ययो ब्राह्मण्यादिभ्यो विशेष इति आह॥ उच्छिष्टद्विजसंस्पर्शे तु मार्कंडेयः॥ द्वि
जान्नकं चिदुच्छिष्टान् रजःस्त्री यदि संस्पृशेत्॥ वैश्ययो ब्राह्मण्यादिभ्यो विशेष इति आह अधोच्छिष्टे त्व
होरात्रं उ धोच्छिष्टे त्र्यहं क्षिपेदिति॥ अत्र यद्यप्यविशेषः श्रूयते तथापि ब्राह्मण्यापेक्षया उच्छिष्टक्षत्रियादि
स्पर्शे ब्राह्मण्या आधिकं कल्प्यं एवं हीनापात उच्छिष्टोन्नमस्पर्शेप्यूहं॥ भोजनकाले रजनकाले रजस्वलां नरं दृष्ट्वा
युत भोजने त्वापस्तंबः॥ उदक्या यदि वा शुक्ले दृष्ट्वान्यातुरजस्वलां॥ आस्नानकालं नाश्नीयात् ब्रह्मकूर्चं ततः पि
बेत्॥ एतच्चाकामतः चांडालदर्शने त्वत्रिः॥ रजस्वला तु संजाता चांडालं यदि पश्यति उपवासस्त्र यं कुर्यात् प्रा रामः
जापत्यं तु कामत इति रजस्वलायाश्वादिदर्शने व्यासः॥ रजस्वला यदा दृष्टा शुना जंबुकरासभैः॥ पंचरात्रं नि
राहारा पंचगव्येन शुध्यतीति॥ रजस्वलायाश्चाशौचिस्पर्शे मिताक्षरा तप॥ आर्त्तवाभिप्लुता नारी स्पर्शे चेच्छ १०३

वसूतकं॥ उ धं त्रिरात्रं स्नातां तां त्रिरात्रमुपवासयेत्॥ स्पृष्ट्वा भोजनादौ त्वत्रिः॥ आर्त्तवाभिप्लुता नारी मृतसूत
कयोः स्पृशेत्॥ तु स्त्री पात्यान्वरे कृच्छ्रं स्पृष्ट्वा तु महमं व त्विति॥ आंत्रौ॥ चिस्पर्शे स्नानात्प्रायश्चित्तोदर्शने
मार्कंडेयः॥ मृतसूतकसंस्पर्शे कृच्छ्रं तु दृष्ट्वा कथं भवेत्॥ तास्नानकालमश्नीयाद्भुक्त्वा चांद्रायणं चरेदि
ति॥ आस्नानकालपर्यंतं चतुर्थदिनपर्यंतं॥ मदनरत्ने स्मृत्यंतरे॥ अघापत्ये समुत्पन्ने मलवद्वाससा यदि
अभिषेकेण भुक्तिः सद्यः स्नानेन भोजनं॥ इदमशक्तायाः बालापत्याविषयं वस्त्रान्यस्यास्तु त्रिरात्रोपवासः बं
धुमरणश्रवणादौ व्यासः॥ मलवद्वसना यास्तु अप्रायत्यं भवेद्यदि॥ अभिषेकेण शुद्धिः स्यात्स्नानं वादि
नत्रयमिति॥ अत्रापि पूर्ववद्व्यवस्थादिनत्रयमित्यवशिष्टकालोपलक्षणं॥ अघापत्यं बंधुमरणादि
ना स एव॥ आर्त्तवाभिप्लुता नारी ज्वरगाहा कदाचन॥ उद्धृतेन जलेनैव स्नात्वा ला शेषं समापयेत् स्वकं गो
पां गमस्त्रैर्युतं॥ न वस्त्रपाउनं कुर्यान्नान्यसान्नवेत्तु नरिति॥ तथा पराशरः॥ स्नाने नैमित्तिके प्राप्ते नारी यदि र
जस्वला॥ पात्रांतरिततोयेन स्नानं कृत्वा व्रतं चरेत्॥ सिक्तगात्रा भवेदद्भिः सांगोपांगा कथंचन॥ न वस्त्रपी

प्राय.

१०२ डानं कुर्यान्नास्य ह्रासश्च धारयेत्॥ अथ परंपरास्पर्शे तत्राचेतनदंडादिनाव्यवधाने याज्ञवल्क्यः॥ उदक्या
शुचिभिः स्नायात्संस्पृष्टस्तैरुपस्पृशेत्॥ अब्लिंगानि जपेच्चैव गायत्रीं मनसा सकृदिति॥ तैरुदक्याद्यशुचि
संस्पृष्टादिभिः संस्पृष्टः उपस्पृशेदाचामेत् इत्यर्थः॥ चेतनव्यवधाने तु स्नानं वृंशावतस्पृष्टिनं चैव स्पृ
ष्टा स्नानेन शुध्यतीति॥ अशुचिनशुनादिस्पृष्टिस्पर्शने तु शातातपः॥ अशुचिसंस्पृष्टेयस्तु एक एव स
दुष्यति॥ तत्स्पृष्टान्यो न दुष्येत सर्वद्रव्येष्वयं विधिरिति॥ तथा॥ संहतानां तु पात्राणां यद्येकमुपहन्यते॥
तस्य तच्छोधनं प्रोक्तं न तु तत्स्पृष्टिनामपि॥ क्वचिदचेतनव्यवधानेपि वचनात्प्रायश्चित्ताधिक्यं यथा
हापस्तंबः॥ एकशाखां समारूढश्चांडाल्यादिर्यदा भवेत्॥ ब्राह्मणस्तत्र निवसन् स्नानेन शुचितामियात्॥ आदिशब्दा
दुदक्यादीनां ग्रहणं॥ शाखाग्रहणमवयवमुपलक्षणमिति शंख्याख्यातं॥ तथा स एव॥ एकवृक्षसमारू
ढौ चांडालब्राह्मणौ यदि॥ फलं भक्षयतस्तत्र प्रायश्चित्तं कथं भवेत्॥ ब्राह्मणानामनुज्ञाप्य सवासा जल रामः
मा विशेत्॥ अहोरात्रोषितो भूत्वा पंचगव्येन शुध्यति॥ तथा स एव॥ एकशाखासमारूढफलान्यश्नाति सोय ९०४

दि॥ प्रायश्चित्तं त्रिरात्रं स्यात्पापे च गव्यं विशोधनमिति॥ अत्र व्यवधानसंनिधानाभ्यां एकरात्रत्रिरात्रे मतिपूर्वं
चैतत्॥ अमतिपूर्वं तु ब्रह्मपुराणे॥ विप्रश्चंडालसहितो मं चैकस्मिन्वनस्पतौ॥ अज्ञानात्फलं भुंक्तो चरेत्तत्राघ
मर्षणं॥ अत्रापवादमाह पराशरः॥ रथ्याकर्दमतोयानि नावः पंथास्तृणानि च॥ स्पर्शान्न दुष्येत पक्वेष्ट
कचितानि च॥ अत्र परंपरास्पर्शेपि स्पर्शेपि स्पर्शो ज्ञाशेगोगः॥ तत्र च वचनात्प्रायश्चित्तं॥ स्पर्शप्रायश्चि
त्तापवादे बृहस्पतिः॥ तीर्थे विवाहे यात्रायां संग्रामे देशविप्लवे॥ नगरग्रामदाहे च स्पृष्टास्पृष्टिर्न दुष्यती
ति॥ एवमन्यान्यपि उक्तानि वचनानि व्यवस्थापनीयानि॥ ब्राह्मणस्य चैत्यशावादिस्पर्शेपि शातातपः॥ चैत्य
वृक्षश्चितिर्यूपश्चंडालः सोमविक्रयी॥ एतांस्तु ब्राह्मणः स्पृष्ट्वा सवासा जलमाविशेत्॥ इति॥ क्षत्रिया
दीनां न्यूनं कल्पनीयं॥ इत्यस्पृश्यस्पर्शप्रायश्चित्तानि॥ अथ श्वादिदंशे॥ तत्र मनुः॥ श्वसृगालखरैर्द
ष्टो ग्राम्यैः क्रव्याद्भिरेव च॥ नराश्वोष्ट्रवराहैश्च प्राणायामेन शुध्यतीति॥ प्राणायामे विशेषं घृतं प्राशनं
वा हयाज्ञवल्क्यः॥ शुश्रूवानैरखरैर्दष्टः दिवापर्वसु॥ प्राणायामं जले कृत्वा घृतं प्राश्य विशुद्ध्यतीति॥ एतच्च

नाभेरधस्ताद्दोषदुष्टस्यायन्तु सुतुं मे। श्वशृंगालमृगाजमहिषाजातिखरकरभनकुलमार्जारमूषिकाप्लव
काकपुरुषदष्टानां प्रायो हिष्टायामि। स्नानप्राणायामत्रयं चेति एतच्च पादयोः किंचिदधिकदंशे यत्तु
गग्घदेवलः विषाग्निदंष्ट्रैः श्वशृगालविद्वराहखरनरवायसपुंश्चलीनिर्दष्टः सवंतीमासाद्य षोडशप्रा
णायामान् कुर्यादिति एतदपि ततोधिकदंशे नाभेरूर्ध्वं दंष्ट्रस्तु बौधायनः शुनादष्टस्तु यो विप्रो नदीं गत्वा
समुद्रगां प्राणायामं शतं कृत्वा घृतं प्राश्य विशुध्यतीति नाभेरधस्तादिति गोदंष्ट्रा विषयं वा एत
स्मिन्नेव विषये देवलः श्वदंष्टः सागारगां यान घ्रात्वा तो निराहा प्राणायामशतं मावर्त्तमस्त्रिरात्रादपग
तपाप्मा भवतीति तत्रा नाभेरूर्ध्वं गात्रदंशे अत्रैव वृद्धारवः नीलीकाष्ठहतो विप्रः शुनादष्टस्तथैव च त्रिरा
त्रं व्रतं कुर्यात्सुश्रस्लादशनक्षत्रतरति यमो पि श्वशृगालसूकरखरोष्ट्रश्ववानरकुंजरैः एतैस्तु ब्राह्म
णो दष्टस्त्रिरत्रः समुपस्पृशोत् हविष्यं भोजयेदन्नं ब्राह्मणान्सघृतं पंचवेति। ब्रह्मचार्यधिकारे हारी
तः शुनादष्टस्त्वहमेकाहारः समुद्रगां नदीं गत्वा प्राणायामशतं कृत्वा घृतं प्राश्य ततः शुचिरेव भव

गोमायुमार्जारनकुलमूषकैर्दष्टानां। ब्रह्मचार्यधिकारपैविनसिरपि शुनादष्टस्तु त्रिरात्रमुपवासे वि
प्रगृह्वेवा सश्वा यत्तु शातातपः गवां शृंगोदकस्नातः शुनादष्टस्तु ब्राह्मणः समुद्रदर्शनाद्वापि शुनाद
ष्टः शुचिर्भवेत् वेदविद्व्रतस्नातः शुनादष्टस्तु वै द्विजः हिरण्योदकमिश्रं च घृतं प्राश्य विशुध्यति तन्नाभेरध
स्तादोषदुष्टविषयं वचनादिशिष्टब्राह्मणमात्रविषयं वा समुद्रदर्शनं तत्तीरवासिनः व्रतस्नातस्य विशेषमा
ह बौधायनः व्रतस्थस्तु शुनादष्टस्त्रिरात्रमुपवासयेत् सघृतं पावकं पीत्वा व्रतशेषं समापयेत् यत्तु शा
तातपः अव्रतो वापि शुनादष्टो नवे द्विजः हिरण्योदकमिश्रं तु घृतं प्राश्य विशुध्यतीति तदत्यंताशक्तविषयं
ब्राह्मणरहितग्रामे तु पराशरः अथ सद्यः स्नानकेनाभेः शुनादष्टो द्विजोत्तमाद्दंप्रदक्षिणीकृत्य सद्यः स्नात्वा
शुचिर्भवेत् स्त्रीणां विशेषमाह पराशरः ब्राह्मणी तु शुनादष्टा जंबूकेन वृकेण वा उदितं ग्रहनक्षत्रं दृष्ट्वा स
द्यः शुचिर्भवेत् कृष्णपक्षे यदा सोमो न दृश्येत कदाचन यां दिशं व्रजते सोमस्तां दिशं त्ववलोकयेदिति
अंगिरसा तु त्रयं चगव्यप्राशनमप्युक्तं ब्राह्मणी तु शुनादष्टा सोमे दृष्टिं निपातयेत् यदा न दृश्यते सोमः श

प्रा.म. यश्चित्तं कथं भवेत्॥ यो दितुगतः सोमस्तो दिशं चावलोकयेत्॥ सोममार्गेण स्नाना पंचगव्येन शुध्यतीति॥ ब्राह्म
॥१०४॥ णी यहरणासु पलक्षणं व्रतस्थस्त्री विषय पराशरः॥ त्रिरात्रमेवोपवसेकुनादृष्टात्तु सव्रता॥ स घृतं पावकं तु हुत्वा
व्रतशेषं समापयेत्॥ रजस्वलायां विशेषमाह पुलस्त्यः॥ रजस्वला यदादृष्टा शुना जंबूकरासभैः॥ पंचरात्रं नि
राहारा पंचगव्येन शुध्यति॥ ऊर्ध्वं तु द्विगुणं नाभेर्वक्त्रे तु त्रिगुणं तथा॥ चतुर्गुणं स्मृतं मूर्ध्नि दृष्टेऽन्यत्राशुचिर्भ
वेदिति॥ अन्यन्नरजस्वलावस्थायामिति शेषः॥ शुना घ्राता दिषु शातातपः॥ शुना घ्रातावलीढस्य नखैर्विदलितस्य
च॥ अद्भिः प्रक्षालनं शौचमग्निना चोपचूलनमिति॥ उपचूलनं तापनं॥ व्रणे कृम्युत्पत्तौ तु बौधायनः॥ ब्राह्मण
स्य व्रणद्वारे पूयशोणितसंभवे॥ कृमिरुत्पद्यते यस्य प्रायश्चित्तं कथं भवेत्॥ गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशो
दकं॥ अहः स्नात्वा च पीत्वा च कृमिदष्टः शुचिर्भवेदिति॥ एतच्च नाभेरधस्ताज्ज्ञेयं॥ मनुरपि॥ ब्राह्मणस्य व्रतद्वारे पू राम:
यशोणितसंभव॥ कृमिरुत्पद्यते यस्य प्रायश्चित्तं कथं भवेत्॥ गवां मूत्रपुरुषेण त्रिसंध्यं स्नानमाचरेत्॥ त्रि १०६
रात्रं पंचगव्याशी त्वधोनाभ्या विशुध्यति॥ नाभिकंठांतरोद्भूते व्रणे चोत्पद्यते कृमि॥ षड्रात्रं तु तदा प्रोक्तं प्राज

पत्य शिरो व्रण इति॥ मनुशातातपः॥ ब्राह्मणस्य व्रणद्वारे यदा संद्यते कृमिः॥ प्रायश्चित्तं तदा कार्यमिति शा
तातपोऽब्रवीत्॥ गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकं॥ स्नात्वा पीत्वा च कृत्वा च कृमिदष्टः शुचिर्भवेदिति
तदा षट्टष्टविषयां पराशरेण तु वर्णभेदेन प्रायश्चित्तविशेष उक्तः॥ ब्राह्मणस्य व्रणद्वारे पूयशोणितसंभ
वे॥ कृमिरुत्पद्यते यस्य प्रायश्चित्तं कथं भवेत्॥ गवां मूत्रपुरीषेण दध्ना क्षीरेण सर्पिषा॥ अहः स्नात्वा च पी
त्वा च कृमिदष्टः शुचिर्भवेत्॥ क्षत्रियोपि सुवर्णस्य पंच माषान्प्रदापयेत्॥ गोदक्षिणां तु वैश्यस्याप्युप
वासं विनिर्दिशेत्॥ शूद्राणां नोपवासः स्यात् शूद्रो दानेन शुध्यतीति॥ स्नानं यानं च पंचगव्येनैव॥ दानं गोदानं
एतदपि नाभेरधस्तात् ज्ञेयं नाभेरुपरि विशेष उक्तो भविष्यत्पुराणे॥ ब्राह्मणस्य व्रणद्वारे पूयशोणितसं
भवे॥ कृमिरुत्पद्यते यनि कृतिवक्ष्मितस्य तु॥ गवां मूत्रपुरीषेण त्रिसंध्यं स्नानमाचरेत्॥ दधि क्षीरं घृतं प्रा
स्य त्रिरात्रेण विशुध्यति॥ अधोनाभेः प्रदष्टस्य आपादाद्विनतात्मज॥ एतद्धि निर्दिशेत्तत्र प्रायश्चित्तं खगा
धिप॥ नाभिकंठांतरे वा रपदश्चेत्स घते कृमि॥ षड्रात्रं तु तदा प्रोक्तं प्रायश्चित्तं मनीषिभिः॥ इति संसर्गप्रा

प्रा॰म॰ ॥ १०५ ॥

यश्चित्तं ॥ ५ ॥ अथोपपातकेषु प्रायश्चित्तानि तान्याह याज्ञवल्क्यः। गोवधो व्रात्यता स्तेयमृणानां चानप
क्रिया। अनाहिताग्निता पण्यविक्रयः परिवेदनं॥ भृताद्ध्ययनादानं भृतकाध्यापनं तथा पारदार्यं पा
रिवित्त्यं वार्धुष्यं लवणक्रिया॥ स्त्रीशूद्रविट्क्षत्रवधो निंदितार्थोपजीवनं॥ नास्तिक्यं व्रतलोपश्च सुता
नां चैव विक्रयः॥ धान्यकुप्यपशुस्तेयमयाज्यानां च याजनं॥ पितृमातृसुतत्यागस्तडागारामविक्रयः॥ कन्या
संदूषणं चैव परिविंदकयाजनं॥ कन्याप्रदानं तस्यैव कौटिल्यं व्रतलोपनं॥ आत्मनार्थे क्रियारंभो म
द्यपस्त्रीनिषेवणं॥ स्वाध्यायाग्निसुतत्यागो बांधवत्याग एव च॥ इंधनार्थं द्रुमच्छेदः स्त्रीहिंसौषधिजीव
नं॥ हिंस्रयंत्रविधानं च व्यसनान्यात्मविक्रयः॥ शूद्रप्रेष्यं हीनसख्यं हीनयोनिनिषेवणं॥ तथैवानाश्र
मे वासः परान्नपरिपुष्टता॥ असच्छास्त्राधिगमनमाकरेष्वधिकारिता॥ भार्याया विक्रयश्चैषामेकैकमु
पपातकमिति॥ तत्र गोवधे उक्तवधप्रायश्चित्तप्रसंगेन॥ तत्र त्रैमासिकमानवानि मासिकादीनि याज्ञवल्क्य ॥ राम॰
यानि चांद्रायणादीनि च वक्ष्यमाणेषु व्रात्यत्वादिष्वपि विशेषविहितैः प्रायश्चित्तैः सह तुल्यविकल्पत ॥ १०५ ॥

यान्यवच्छया वायोज्यानि नच विहितैः सामान्यविहितानां वाधा उपपातकसंज्ञानर्थकापत्तेः। सामा
न्यप्रायश्चित्तप्रवृत्त्येव हि सार्थवती तान्यथा प्रयोजनांतराभावात्॥ अत एव याज्ञवल्क्यः॥ उपपातक
शुद्धिः स्यादेवं चांद्रायणेन वा॥ पयसा वापि मासेन पराकेणाथवा पुनः इति॥ मनुश्च॥ एतदेव व्रतं कुर्युरुपपा
तकिनो द्विजाः॥ अनवकीर्णिवर्ज्यं शुद्ध्यर्थं चांद्रायणमथापि वेति॥ एतदेव त्रैमासिकं अवकीर्णिपर्युदा
साद्वोकानुक्तप्रायश्चित्तेष्वेतस्यापि निर्गम्यते॥ अथ व्रात्यतायाः॥ याज्ञवल्क्यः॥ आषोडशाद्द्वाविंशाच्चतुर्वि
शाच्च वत्सरात्॥ ब्रह्मक्षत्रविशां काल औपनायनिकः पर इति॥ अत्र सावित्रीपतिता यस्य दश वर्षाणि पंच
च सशिखं वपनं कृत्वा व्रतं कुर्यात्समाहितः॥ एकविंशतिरात्रं च पिबेत्प्रसृतिपावकं॥ हविषा भोजयेच्चैव
ब्राह्मणान्सप्त पंच च॥ ततो पावकशुद्धस्यातस्योपनयनं स्मृतमिति॥ व्यासोक्तेरा षोडशादित्याङ्मर्या
दायां नातिव्याप्तौ॥ द्वाविंशाच्च चतुर्विंशाच्चेत्यत्रापि तदर्थं कएव जुषज्यते तेन पंचदशैकविंशतित्रयोवि
शतिवर्षसमाप्तुरमेव विप्रक्षत्रियविशां क्रमात्पातित्यमिति॥ याज्ञवल्क्यः॥ अत ऊर्ध्वं पतंत्येते सर्वध

प्रा॰म॰

॥१०६॥

र्मबहिष्कृता॥ सावित्रीपतिता व्रात्या व्रात्यस्तोमादृते क्रतोरिति॥ अत्राह मनुः॥ येषां द्विजानां सावित्री ना
नूद्येत यथाविधि॥ तांश्चारयित्वा त्रीन्कृच्छ्रान्यथाविध्युपनाययेदिति॥ उपनेत्रभावश्चैते व्रात्यता
यां तु पूर्वोक्तमेकविंशतिरात्रं॥ उपनेतृसत्वे कामतः पंचदशवर्षातिक्रमे वसिष्ठः॥ आहापतितसावि
त्रीक उद्दालकव्रतं चरेत्॥ द्वौ मासौ यावकेन वर्त्तयेत्॥ मासं पयसार्द्धमासामिक्षयाऽष्टरात्रं घृतेन षड्रा
त्रमयाचितं त्रिरात्रमुपवसेदिति॥ यत्त्वापस्तंबः॥ अतिक्रांते सावित्र्याः काल ऋतुं त्रैविद्यकं ब्रह्मचर्यं चरे
दथोपनयनं ततः संवत्सरमुदकोपस्पर्शनं तथाध्याप्य इति॥ ऋतुं मासद्वयं त्रैविद्यकं ब्रह्मवेदव्र
तार्थं भैक्षाशनगुरुशुश्रूषणादिकं तदुद्दालकं व्रतात्राक्स्य स एव॥ यस्य पितापितामह इत्यनुपनी
तौ स्यातां ते ब्रह्महसंस्तुतास्तेषां गमनं भोजनं विवाहमिति वर्जयेत्तेषामिच्छतां प्रायश्चित्तं यथा प्रथ
मेतिक्रमे ऋतुमेवं संवत्सरमथोपनयनं ततः उदकोपस्पर्शनं प्रतिपुरुषं संख्याय संवत्सरान्या रामः
वंतोनुपनीताः स्युः सप्तभिः पावमानीभिर्यदंतियच्च दूरक इत्येताभिर्यज्ञपवित्रेणांगिरसेनेत्यपिवा ॥१०६॥

व्याहृतिभिरेवं वासोध्याप्यो यस्य प्रपितामहादीनां न स्मर्यत उपनयनं ते श्मशानसंस्तुतास्तेषामभ्यागम
नं भोजनं विवाहमिति वर्जयेत्तेषामिच्छतां प्रायश्चित्तं द्वादशवर्षाणि त्रैविद्यकं ब्रह्मचर्यं चरेदथोपनयनं
तत उदकोपस्पर्शनं पावमान्यादिभिरथ गृहमेधोपदेशनं नाध्यापनं ततो यो निवर्त्तते तस्य संस्कारो यथा
प्रथमेतिक्रमे तत ऊर्ध्वं प्रकृतिवदिति ब्रह्महसंस्तुताः ब्रह्महत्याद्दूष्याः॥ यथा प्रथमेतिक्रम ऋतुमे
वं संवत्सरमिति प्रथमातिक्रममवदनुष्ठाने संवत्सरस्तेन प्रतिपुरुषमब्दं ब्रह्मचर्यं उपनयनोत
रं यावंतोनुपनीताः पुरुषास्तावत्संख्याकवर्षपर्यंतं प्रत्यहमेभिर्मंत्रैः प्रायश्चित्तार्थं स्नानं कार्यं मंत्रास्तु:
यदंतियच्चेसप्त पावमान्योपेनदेवाः पवित्रेणेति यज्ञपवित्रं कयान इति साम पवित्रं हंसःशुचिषदित्यां
गिरसः श्मशानसंस्तुताः श्मशानवन्निरसनीयाः द्वादशाब्दं ब्रह्मचर्यं कार्यं उदकोपस्पर्शनं तु पुरुष
संख्याहानि यावत् मंत्रास्त एव गृहमेधो गार्हस्थ्यं तेषामध्यापनं नास्ति ततः उत्पन्नस्य प्रकृतिवत्
यथाकालोपनयनमिति इति व्रात्यता। अथ कन्यानयाकरणे। तच्चतुर्विधं परत्वेनस्वत्वेनगृही

प्रा.म.

॥१०८॥

त्वात्तस्याधानं तच्च जायमानो वै ब्राह्मणस्त्रिभिर्ऋणैर्ऋणवा जायते यज्ञेन देवेभ्यः प्रजया पितृभ्यो ब्रह्मचर्येण ऋ-
षिभ्यः इति । यज्ञेनेति सत्यधिकारे । मनुः । इष्टिं वैश्वानरीं चैव निर्वपेदब्दपर्यये । क्लृप्तानां पशुयज्ञा-
नां निष्कृत्यर्थमसंभवे इति । अब्दपर्यये संवत्सरे ते । क्लृप्तानां प्रारब्धानामिति केचित् । नित्यत्वात्क्लृ-
प्तानां नित्यमिति तु युक्तं । प्रजापतिः । समांते सोमयज्ञानां सौ चांद्रायणं चरेत् । इति । तथा चाधिकारोत्तरं वर्ष-
गणनया कामाकाम यो स्त्रैमासिकचांद्रायणादीनि योज्यानि । अत एव पञ्चमसिसंवत्सरं सोमः पशुः प्रत्ययनं
तथा । कर्तव्याग्रयणेष्टिश्च चातुर्मास्यानि चैव हि । एषामसंभवे कुर्यादिष्टिं वैश्वानरीं द्विजः । इति याज्ञ-
वल्कीयमपि सोमादहितायादिवर्षं प्रत्ननुष्ठाने वेदितव्यं । अन्याधानाहिताग्नितायां तच्चासत्यधिकारे त्वाधा-
नाभावे वेदितव्यं । तत्रानाहिताग्नेः संवत्सरादूर्ध्वमापदि याज्ञवल्कीयमुपपातकसामान्यव्रतं चतुर्थ-
यं वर्णसाधनपारापेक्षया योज्यं । अनापदि तु तत्रैव मानवं त्रैमासिकं । अर्वाक् संवत्सरात्कालाजि-
निराह काले स्वाध्यायकर्माणि कुर्याद्विप्रो विधानतः । तदकुर्वंस्त्रिरात्रेण मासि मासि विशुध्यति । का-

रामः

९९९

ले इत्यधिकारोपलक्षणं । तदाधानं सएव । अनाहिताग्नेरपि चादौ पक्षमाणः श्रुतौ यदि स हि व्रात्येन श्रु-
ना यजेत्त्रिनिष्क्रयायतु यक्ष्यमाणस्याधाता पश्चाच्चेति स्मृत्यर्थसारे । व्रात्येन क्रियमाणे व्रात्येन निमित्ते-
न वा विहितः पशुरिति वैयधिकरण्येनान्वयः । अत्र व्रात्यो यथाकालात्तु पनीतो न गृह्यते तत्र व्रात्यस्तोम-
रूपसोमयागविशेषस्यैव विधानात् । विष्णुः यस्य पिता पितामहो वा सोमं न पिबेत्स व्रात्यः इति वा केचिद्गृह्य-
ते । तस्यैव व्रातपशोर्विधानात् । तथा च श्रुतिः । यस्य पिता पितामहः सोयं पिबेदथ पिपासेत्सऐंद्राग्नं पुनरु-
त्सृष्टमालभेतेति । अवसथ्याधानेपि विशेषमाह कात्यायनः । कृतदारो गृहे ज्येष्ठो यो नादध्यादुपास-
नं चांद्रायणं चरेद्वर्षं प्रतिमासं सहो पिबेति । ज्येष्ठग्रहणात्तस्मिन्नकृतावसथ्याधाने कनिष्ठस्यानधिकार
ः । ज्येष्ठेपि पितर्यकृतावसथ्याधाने सति नादध्यात् । पितुः सत्यप्यनुज्ञाने नादधीत कथंचन । त्यस्मात्तो-
धानेपि अवसथ्यविशेषात् । तथा ज्येष्ठग्रहणात् कनिष्ठः कृतदारोपि गृह्यति मरणाद्विभागाद्वा प्रागनधि-
कारि ज्येष्ठप्रायश्चित्तीयत इति सिद्धं । एवोक्तं का इंचप्रायश्चित्तं अवसथ्याधानं दारकाले दायाद्यं काले

प्रा.म.
॥२०८॥ षेतेवाग्गृहपतावितिकात्यायनः युक्तकालत्रयातिक्रमेऽभ्यस्यं स्यथाविक्रेयविक्रयेप्रायश्चित्तानि शं
खलिखितौ न विक्रीणीयादविक्रेयाणि तिलतैलदधिक्षौद्रलवणलाक्षामधुमांसकृतान्नस्त्रीपुरुषहस्त्यश्ववृ
षगंधरसक्षौमकृष्णाजिनसोमोदकनीलीविक्रयात्सद्यः पततिब्राह्मणः इत्युपक्रम्य संवत्सरं तप्तकृच्छ्रमा
चरेदिति हारीतः गुडतिलपुष्पमूलफलपक्वान्नविक्रयेसोमायनं लवणमधुमांसतैलक्षीरदधिघृतगं
धचर्मवाससामन्यतमविक्रयेचांद्रायणं तथोर्णिकेशिकेशारिष्टधेनुवेश्मरमाब्रास्त्रविक्रयेच मात्स
मांसस्नाय्वस्थिशृंगनखशुक्तिविक्रयेतप्तकृच्छ्रं हिंगुगुग्गुलुहरितालमनःशिलांजनगैरिकक्षारलवणम
णिमुक्ताप्रवालवेणवेणुमन्मयेषु च आरामतडागोदपानपुष्करिणीसुकृतविक्रयेत्रिषवणस्नायी अध
ःशायी चतुर्थकालाहारो दशसहस्रं जपन् गायत्रीं संवत्सरेण पूतो भवति हीनमानोन्मानसंकरव्याजद्रव्य
संकीर्णविक्रीयकन्यकां गां च कृच्छ्रं सांतपनं चरेदिति चतुर्विंशतिमते सुराया विक्रयं कृत्वा चरेत्सौम्य रामः
चतुष्टयं लाक्षालवणमांसानां चरेच्चांद्रायणत्रयं मध्वाज्यतैलसोमानां चरेच्चांद्रायणद्वयं पयःपायस ॥९००॥

पूपानां चरेच्चांद्रायणव्रतं दध्यम्लेक्षुरसक्षौद्रगुडखंडादिविक्रये सर्वेषां स्नेहपक्वानां पराकं तु समाचरेत्
कदलीकेरंचनारंगबीजपूरकं एतेषां पादकृच्छ्रं स्यात्कंबीरादेस्तथैव च कस्तूरिकादिकं गंधानां विक्र
येकृच्छ्रमाचरेत् कर्पूरादेस्तदर्धं स्याद्दिनहिंग्वादिविक्रये तिलानां विक्रयं कृत्वा प्राजापत्यं समाचरेत्
धर्मार्थं कृमिजानां श्वयज्ञार्थे विक्रयं जयेत् रक्तपातादिवस्त्राणि कृष्णाजिनमथापि च विक्रयेत्स्वह
मेतेषां गर्गस्य वचनं यथा गोविक्रयं नरः कृत्वा लाभार्थं धनमोहितः प्राजापत्यं प्रकुर्वीत राजानामैरव
स्मृतं खराश्वाश्वतराणां च करभाणां च विक्रये पराकं तत्र कुर्वीत सुतानां द्विगुणं चरेत् नारीणां वि
क्रयं कृत्वा चरेच्चांद्रायणव्रतं द्विगुणं पुरुषस्यैव व्रतमाहुर्मनीषिणः चांद्रायणं प्रकुर्वीत एकादशादि विक्र
ये च गानां तु पराकः स्यात्स्मृतीनां कृच्छ्रमाचरेत् इतिहासपुराणानां चरेत्सांतपनं द्विजः रहस्यपंचरा
त्राणां कृच्छ्रमेव समाचरेत् यथा आगमानीतिशास्त्राणां प्राकृतानां तथैव च सर्वेषामेव विद्यानां पादकृ
च्छ्रं समाचरेदिति च्यवनः दधिमधुपिष्टसर्पिः पक्वान्नैलतक्रक्षीररसविषशास्त्रतिलाश्मनालीकोशेय

प्रा॰म॰
॥१०९॥

सोलाक्षारक्त। लवणविक्रये प्राजापत्यं चरेत्। शातातपः। आममांससुरासोमलाक्षालवणसर्पिषां विक्र-
ये सर्वपण्यानां द्विजश्चान्द्रायणं चरेत्। शंखः। रक्तवस्त्ररंगरत्नगुडगंधमधुरसोर्णाविक्रयी त्रिरुपवसे-
त्। प्राणिनः पण्यसोमविक्रयी तप्तकृच्छ्रं कुर्यात्। तं च भूयश्चोपनयेत्। शंखः। धारयित्वा तु लावकाव-
षमांकारपन्यणि सुरालवणमद्यानां कृत्वा क्षीरस्य विक्रयं। लाक्षायाश्चैव मांसस्य कुर्याद्देव महाव्र-
तं विक्रीतो प्राणिनाम् इति। तस्य च तप्याचरेदिति। महाव्रतं द्वादशाब्दं। भूयोभ्यासविषयमेतत्। पैठीन-
सिः। ब्राह्मणस्य लवणं पक्वान्नं मधुक्षारं दधि घृतमुदकं सर्वगंधान्तिलारक्तं वासोर्णं उतैलग्राम्यपश्व-
मेकशफकेशानिश्चसर्वेचा ररणपाशीपत्रावो विद्यागावः। शंखवाश्चोर्णश्चेति विक्रयणे नैकेकैषामेकेकस्मि-
न् प्राजापत्यं चरेदिति स एव। आरामतडागोदकपानपुष्करिणीसुकृतसोमविक्रये त्रियवणस्नाप्पध-
ःशायी चतुर्थकालाहारः संवत्सरेण पूतो भवतीति। सुमंतुः। देवर्षिसोमवैत्यात्मा यस्तकूपोदयाद्-
नां दात्मनां विक्रये तप्तकृच्छ्रं चरेदिति। देवर्षीतिमात्रिप्रायेण। भविष्यपुराणे। गुडतिलास्तथा नीलीके-

राम॰
॥९०२॥

केशा गोधूममत्स्यकाः। विक्रयी ब्राह्मणो गांच कृच्छ्रं सांतपनं चरेदिति। गोविक्रये निदार्थवादमाह यम-
ः। गवां विक्रयकारी तु गेवि रोमाणि यानि तु। तावद्वर्षसहस्राणि गवां गोष्ठे क्रिमिर्भवेदिति। एतानि च ल-
घुगुरुप्रायश्चित्तानि कामाकामसकृदसकृच्छक्त्याद्यपेक्षया योजनियानि। इदं सर्वं प्रायश्चित्तजातं च आ-
पदि वैश्यवृत्त्याजीविनो ब्राह्मणस्येव। इतरेषां त्वापद्दिनदोषः। वैश्यवृत्तात्वं किंविक्रेयं ब्राह्मणस्याप-
योदधातिनारद्दोक्तेरिति मिताक्षरायां। यत्र च निषिद्धस्तत्रैव प्रायश्चित्तविषयः। अत एव क्वचित् क्वचित् प्रा-
यश्चित्तविधौ ब्राह्मणग्रहणं कृतं। शूलपाणिस्तापदिश्रदृस्यैव दोषाभावमाह। तथा च पराशरः। लव-
णं मधु मद्यं वा दधितक्रं घृतं पयः। तद्भेच्छूद्रजातीनां कुर्यात् सर्वेषु विक्रयं। कालिकापुराणेऽपि। विक्रयं सर्व-
वस्तूनां कुर्वन् शूद्रो न दोषभाक्। मधुचर्मसुरालाक्षां त्यक्त्वा मांसं च पंचममिति। तन्न। अतया वाक्य-
पोरायद्विषयत्वे प्रमाणाभावात्। न च विषेधानामाद्यदि ब्राह्मणमात्रविषयत्वात् शूद्रे प्रतिप्रसवानुप-
पत्तिरिति वाच्यं। शूद्रस्य द्विजशुश्रूषेति नियतेनोपायात राणव्यावर्त्तितत्वात्। अतश्च शूद्रस्यापापद्य-

प्रा॰म॰ पिमद्यादिपंचव्यतिरिक्तानि विक्रेयाणि। क्षत्रियवैश्ययोस्त्वनापदि शूद्रवत्पतित्वमसत्त्वात्सर्वरसविक्रेयाणि।
॥२२०॥ ह्यापदितु न दोषः। निषेधानां प्रायश्चित्तानां च ब्राह्मणमात्रविषयत्वोक्तेः। ब्राह्मणानामेवृत्त्वा यदि वैश्यवृ
त्त्याजीवतां दोष इति निष्कर्षः। इदं च प्रायश्चित्तजातमपण्यविक्रयार्जितधनपरित्यागपूर्वकं कार्यमित्याह
मनुः। यद्गर्हितेनार्जयंति कर्मणा ब्राह्मणा धनं। तस्योत्सर्गेण शुध्यंति जप्येन तपसैव चेति। अत्र जपतप
सोर्विकल्पः। उत्सर्गस्य तु नयत्वमस्तु त्रप इति। मनुः। काममुत्पाद्य कृष्यां तु स्वयमेव कृषीवलः। विक्रीणीत
तिलान् शुद्धान्धर्मार्थमचिरस्थितान्। कृष्यादिग्रहणं नियमार्थं तेन क्रीतानां तिलानां विक्रये दोष एव।
इत्यपण्यविक्रये। भृतकाध्यापकभृतकाध्यापितयोश्च पूर्वोक्तव्रतानि। तत्राकालव्रतापेक्षया योज्यानि
अशक्तस्य शुद्धिराह। भृतकाध्यापनं कृत्वा भृतकाध्यापितस्तथा। अनुयोगप्रदानेन त्रीन्पक्षान्नियतः पिबेदि
ति ब्रह्माण्डपुराणमिति शेषः। अधीयानस्य विप्रादेः सत्कारोऽनुयोग इति मिताक्षरायां। सुतानां विक्रये पैठी रामः
नसि सुतविक्रये त्रिषवणस्नायी पयोधः शायी चतुर्थकालाहारः संवत्सरेण पूतो भवति इदमेकपुत्रस्याकाम ॥५०२॥

तोऽनापदि सुतविक्रयं कृत्वा तप्तकृच्छ्रं चरेदिति विज्ञानेश्वरोक्तं त्वापद्यनेकपुत्रस्याकामतो ज्ञेयं। अन्ये वाकामतो दे
वर्षिसोमच्चेत्याः। अपत्यरूपोदारात्मनां विक्रये कृच्छ्रद्वयमिति सोमनं। कामतोऽनेकपुत्रस्यानापदि कन्यापु
त्रादिविक्रये तु चतुर्विंशतिमते। नारीणां विक्रयं कृत्वा चरेच्चांद्रायणं व्रतं। द्विगुणं पुरुषस्यैव व्रतमाहुर्मनीषि
णः। अनापद्यकामतः। कन्याविक्रये तु। विक्रीय कन्यकां गां च कृच्छ्रं सांतपनं चरेदिति वृद्धपराशरोक्तेः। इत्यपण्य
विक्रये। असद्याजने मनुः। व्रात्यानां याजनं कृत्वा परेषामंत्यकर्म च। अभिचारमहीनं च त्रिभिः कृच्छ्रैर्व्यपोह
ति। परेषां शूद्रादीनां अंत्यकर्मौर्ध्वदैहिकं। यद्वा परेषामसपिंडानां स्वजातीयानामेव। अस्मिन्पक्षे आवृत्ता
वेतत्प्रायश्चित्तं। अत्र चानेकस्यैव कृच्छ्रस्याभ्यासः संख्यायाः पृथक्कानिवेशित्वात्। तेन भिन्नास्त्रयः कृच्छ्राः
कार्याः। ते च प्राजापत्यसांतपनातिकृच्छ्रस्या इति शूलपाणिः। तेषां च गुरुलघुभूतानां त्रित्वं निमित्तगौरवला
घवाभ्यां योज्यं। अहीनो द्विरात्रादिर्द्वादशाहपर्यंतोऽहर्गणयागः। एतच्चाकामतः। उपपातकमात्रप्राय
श्चित्तापवादार्थः। व्रात्यस्य कामतो याजने तु ज्ञानातपः। पतितसावित्रीकान्नोपनयेन्नाध्यापयेद्यद्येतानुपनयेध

जपेद्मासमुद्दालकव्रतं चरेदिति । उद्दालकव्रतं तु व्रात्यताप्रायश्चित्ते उक्तं । यत्तु पैठीनसिः शूद्रयाजकस्सर्वद्रव्य
त्यागस्स्तोत्र भवति प्राणायामसत्रेषु दशकृत्वोभ्यस्य धिति तदकामतोभ्यासविषयं । अत्रैव कामतोभ्यासेन शू
द्रयाजकादीन्प्रक्रित्योशना आह तेते पंचतपो भावकाः कृच्छ्रजलशयनान्युत्तिष्ठेयुः क्रमेण ग्रीष्मवर्षाहेमंतेषु
मासं गोमूत्रयावकमश्नीयुरिति । यत्तु यमः । पुरोधाः शूद्रवर्णस्य ब्राह्मणो यः प्रवर्त्तते नो भादर्ष प्रसंगाद्भूत
स्य कृच्छ्रं विशोधनमिति तदकामतोज्ञात विषयं । चांडालादिसंनिधौ कृत्यादीनामकामतः । पावेतु षड्रात्रम्
ते चांडालश्रोत्रावकाशे श्रुतिस्मृतिपाठे त्वेकरात्रमिति । यत्तु वसिष्ठः । पतितचंडालसूताबव्रावशोत्रिरात्रवा
ग्यताश्च नश्नंतश्चासीरन् सहस्रपरमं वा तदभ्यस्यंतः पूता भवतीति । विज्ञायत इत्यनेनैव गर्हिताध्यापकयाज
काव्याख्याता दक्षिणात्यागाच्च पूता भवंत्वीति तत्बुद्धिपूर्वविषयमिति विज्ञानेश्वरः । इत्ययाज्ययाजनं । पितृमा
तृस्तुतामन्तकाचापि भार्यात्यागस्य त्वकारणे परित्यक्तामातापित्रोर्गुरोस्त्यजेत्स पांक्तेयमध्येपा व तत्रप्रा
यश्चित्तमाह मनुः । षष्ठान्नकालतामाससंहिताजप एव हि । होममश्च शाकलो नित्यं त्वपोत्पानां विशोधनं

मिति । शाकलो यद्देवादेवहेलनमित्यादिमंत्रकरणकः । अथ कन्यादूषणे । शंख आह कन्यादूषी सोमवि
क्रयी च कृच्छ्रमब्दं चरेयातामिति हारीतोपि । कन्यादूषी त्वाद्युपकाम्य तते पंचतपो भावकाः कृच्छ्रजलशयना
न्युत्तिष्ठेयुः ग्रीष्मवर्षाहेमंतेषु मासं गोमूत्रयावकमश्नीयुरिति । शूद्रस्य तु प्रातिलोम्येन कन्यादूषणे वध
एव दूषणे तु करच्छेदः उत्तमायां वधस्तथेति वचनात् । इति कन्यादूषणं । अथाग्नित्यागे मनुः । अग्नीहो
त्र्यपविध्याग्नी ब्राह्मणः कामकारतः । इदं चाकामतः । यत्तु हारीतः । संवत्सरोत्सन्ने चांद्रायणं कृत्वा पुनराद्ध्या
त् । द्विवर्षोत्सन्ने सोमापनं चांद्रायणे कुर्यात् । त्रिवर्षोत्सन्ने च संवत्सरं कृच्छ्रमभ्यस्य पुनराद्ध्यादिति तदका
मे ज्ञेयं । शंखस्तु त्रिवर्षोत्सादे गोदानमप्यधिकमाह । अग्नीनुत्सादे संवत्सरं प्राजापत्यं चरेद् गां च दद्यादिति
विष्णुरपि पिवेदा स्फत्सादी त्रिषवणस्नायी अधःशायी संवत्सरं भैक्षाणवर्त्तेदिति कामतस्त्वेतान्येव त्वस्व विष
ये द्विगुणानि । यत्तु वसिष्ठः । योग्नीनपविध्येत् स कृच्छ्रं द्वादशरात्रं चरित्वा पुनराधानं कारयेदिति । व्याघ्रः । मा
सद्वयं तु योवह्निं त्यजेदेवं समाचरेत् । नास्तिक्यात् कृच्छ्रमेकं तु होमद्रव्यं ददाति च । होमद्रव्यया ज्ञवल्क्य

प्रा॰म॰
॥२१२॥

लं होमो कृतस्त्वावृद्धीमं पर्याप्ते। तथा जरद्वाजगृह्ये। यावत्कालं होमो स्यात्तावदव्यप्रशीवत। तद्दानं चैव वि
प्रेभ्यो यथा होमस्तथैव चेति। जातूकर्ण्योपि। अतीतकालं तु कुर्यो द्रव्यौ विप्राय वा स्वयं। दद्याद्द्विदेस
म्यक् कृत्वाधानं पुनर्द्विज इति। इदं च होमद्रव्यदानं स्मार्ताग्नित्यागविषयमिति माधवः। उभयत्यागे।
पि मुक्तमिति तु प्रतिभाति। मासचतुष्टयत्यागे तु स एव। चतुष्टये तु संपूर्णमासनां तु ऊताशने सत्कातिकृ
च्छं कुर्वीत ततः पापात्प्रमुच्यते। षण्मासत्यागे पराकः। अत ऊर्ध्वं मष्टपर्यंतं पयोव्रतं यथा हेमाद्रौ। षण्मासां
श्चकुर्वीत ततः पापात्प्रमुच्यते। षण्मासत्यागे पराकः। अत ऊर्ध्वं पयोव्रतं कुर्यान्मासमेकं समाहितः। वर्षं वर्षं तमेवाऊर्मुनयः। सं
त्सजते यो वैपराकं तु समाचरेत्। ऊर्ध्वं पयोव्रतं कुर्यान्मासमेकं समाहितः। वर्षवर्षं तमेवाऊर्मुनयः। सं
सितव्रताः। मासषट्कादूर्ध्वं संवत्सरं यावद्याज्ञवल्क्योक्तमुपपातकसामान्यप्रायश्चित्तं निजातिशक्तिगुणा
द्यं पक्षपायाजनायानि संवत्सरादूर्ध्वं तु मन्वुक्तं द्वैमासिकं त्रैमासिके कालाल्पत्वमेहात्वा तेषेह्लया योज्ये
एतानि च सर्वाणि प्रायश्चित्तानि नास्तिकाहम्नित्यागे। चद्दातुं प्रद्दीमादाग्सजति तदा जरद्वाजगृह्ये वि
शेषक्तः। प्राणायामशतं वा त्रिरात्रउपवासः स्यादाविंशतिरारात्रात्। अत ऊर्ध्वं मासं षष्टिरात्रात्रिंशत्

राम:
॥१०४॥

रात्रीरुपवसेत्। अत ऊर्ध्वं मासं संवत्सरात्प्राजापत्यं चरेत्। अतऊर्ध्वं कालबहुत्वे दोषबहुत्वमिति इदमे
ववाकामतो गृह्याग्नित्यागस्य परो वा। अत्रैव विषये एकांदेऊंताशनं तु यो विप्रमादात्सजति प्रत्नो त्रा
णायामशतं कुर्यादुपवासमथापि वेति कामतस्त्यागे तु तत्रैव। द्वादशाहातिक्रमे त्र्यहमुपवासः। मासाति
क्रमे द्वादशाहमुपवासः। संवत्सरातिक्रमे मासोपवासपयो भक्षरसं वा। कुर्यात्पुनराग्निहोमः। क्रमेणो नयं चे
ति उपवासाशक्तौ मासं पयोभक्षणं। संवत्सरानंतरमधिककालातिक्रमे तु उभयतिमदनपारिजाते
इदमेव वातस्येनश्रौताग्नित्यागेपि यथा। तथा च स्मृत्यंतरे आलस्येन यदा वह्निं द्वादशाहं त्यजेत्स्वतो। त्रिरात्रमु
पवासं च चरेत्पापविशुद्धय इति। इत्यग्नित्यागे। कुमारदारत्यागे तु विशेषमाहन्नातातपः। कौमारदारत्यागा
त्मासंमयोन्नतः शुध्यति। इदं चाल्पकालत्यागे। बहुकालत्यागे तु कौमारदारत्यागं प्रक्रम्य हारीतः। पंचत
पोश्रावकाशजलन्नायतान्यनुतिष्ठेद्ग्रीष्मवर्षाहेमंतेषु मासं गोमूत्रपावकमश्नायुरिति। अथ द्रुमछे
दे मनुविष्णू। फलदानां च वृक्षाणां छेदयेजप्यमृक्शतं। गुल्मवल्लीलतानां च पुष्पितानां च वीरुधां। य

तुयम॥ वृक्षलतागुल्मलताच्छेदने ऋक्छ्छूफलवतां प्राजापत्यमिति। प्रायश्चित्तविवेके परा केचि वृक्षगुल्मलता
वीरुच्छेदनेर ऋक्छ्छू इति पाठउक्तः। वृक्षच्छि इत्यपि इष्टदिनसाध्यप्रागुक्तः। यत्तु हारीतः। स्थावरस्यु॥
रीस्टपाविवधे पस्येदं प्राणमित्येतयाज्यं हुत्वा तिलपात्रं ब्राह्मणायदं द्यादिति। तदश्वत्थादिपुण्यवृक्ष
विषयमिति केचित्। युक्तं तु चैत्यश्मशानादिस्थलजवृक्षाणां कामतश्छेदनविषयं तन्नदं उक्तगुणपादिदर्शना
त्। यथाह याज्ञवल्क्यः। चैत्यश्मशानसीमासु पुण्यस्थाने सुरालये जातद्रुमाणां द्विगुणो दमो वृक्षप्रविख्या
ते गुल्मगुच्छक्षुपलताप्रतानौषधिवीरुधां। पूर्वस्मृतादर्धदंडः स्थानेषूक्तेषु कर्तनइति। गुल्मामालात्याद
यः। गुच्छाः कुरंटकादयः क्षुपाः करवीरादयः। लताद्राक्षाद्याः प्रतानाः सारिवाद्याः। ओषध्यः शाल्याद्याः। वि
रूढोगुडूच्याद्याः इति विज्ञानेश्वरः। यस्येदमिति मंत्रस्तु तैत्तिरीये यस्येदं प्राणंनिमिषद्यजे जाति यस्य जातं
जन्मानं च केवलं सोमाग्निना पितोजो हवामिस नोमुंचत्व ८ हस इति। यत्तु संवत्सरं व्रतं कुर्याच्छित्वाव
क्षं फलप्रदमिति शंखोक्तं तन्महाफलप्रदानालिकेरादिवृक्षाणां कामतश्छेदनाभ्यासविषयं। वृक्षा

मित्येकवचनं त्वनुवाद्यविशेषणत्वादविवक्षितं। यत्तु विष्णुपुराणे। भिनत्ति वीरुधो यस्तु वीरुधो यस्तु
वीरुत्संस्थे निशाकरे। पत्रं वा यातयत्येकं ब्रह्महत्यां स विंदतीति। न दर्शवादमात्रं। स्थलपालिरप्येवमे
त। इति द्रुमच्छेदव्यसनेषु बौधायनः। स्तेनवा कृतस्कारो राजन्येपौषध्वारोपति भौजिकोन क्षत्रोपजीवा स्वह
त्रिर्बृल्नजो चिकित्सिको देवलोकः पुरोहितः कितवो मद्यपः कूटकारकोपत्यविक्रयी मनुष्यविक्रेता चेति
तानुद्देरत्समत्येतान्यायतो ब्राह्मणान्यवकल्पयास वर्ज्य यत्नागेन चतुर्थकालाहारा। संवत्सरं त्रिषवणमनु
तिषेषुरत्स्पांतदेवपितृतर्पणं गवांह्निकं चेत्येवं व्यवहार्या इति तदसत्यामासे। स्वागणिकोयः स्वगणेन
जीवति। स्वगणाद्दुर्जचेतिऽस्यां उक्तस्त्यादिस्ववैराज्ञा प्रबोधयिता। स्वहत्रि सेवकः। ब्रह्मजीवी मूल्ये
न वैदिककर्णकर्त्ता गवाह्निकं गोवधप्रायश्चित्तमुक्तं। यदपि बौधायनः। अथाशुचिकराणि द्यूतमभिचा
रो नाहिताग्नेरुञ्छवृत्तिः। समावृत्तस्य भैक्षचर्या तस्य चगुरुकुले वासऊर्ध्वं चतुर्भ्यो मासेभ्यो यश्चातमध्यापय
नक्षत्रनिर्देशं चेति। द्वादशमासान्द्वादशार्द्धमासान् द्वादशाहान् द्वादशषडहान् द्वादशत्र्यहान् त्र्यहमे

प्रा०म० काहं चेति द्वते संवत्सरमाहृतदयत्संतान्यासविषयमेव। यत्तु शूद्रसेवायां बौधायनः समुद्रयानं ब्राह्मण
॥१२४॥ स्य न्यासापहरणं सर्वपण्यैर्व्यवहरणं भूम्यनृतं शूद्रसेवया शूद्रायामभिजायते तदपत्यं च भवतीति
षां तु निर्देशश्चतुर्थकालमितभोजिनः स्युरपोऽभ्युपेयुः सवनानुकल्पं स्थानासनाभ्यां विहरंतस्त एते त्रिभिर्व
र्षैरपघ्नंति पापमिति तदुक्तं तच्छूद्रसेवाविषयं। अप्यानाश्रमे हारीतः। अनाश्रमी संवत्सरं प्राजाप
त्यं कृच्छ्रं चरित्वाश्रममुपेयात् द्वितीयेतिकृच्छ्रं तृतीये कृच्छ्रातिकृच्छ्रं अत ऊर्ध्वं चांद्रायणमिति। इति या
ज्ञवल्क्योक्तोपपातकप्रायश्चित्तानि। अथ मनूक्तोपपातकेषु तत्राभिचारे मनुः। व्रात्यानां याजनं कृत्वा प
रेषामंत्यकर्म च अभिचारमहीनं च त्रिभिः कृच्छ्रैर्व्यपोहति। अहीनो द्विरात्रादिः। अहीनो धार्मिकस्त
द्विषयमभिचारमिति सामानाधिकरण्यमिति शूलपाणिः। केचित्त्वेतदात्मोक्तकर्मयाजनपरमेवैतत्प्रा रामः
यश्चित्तं न तु यजनस्येत्याहुः। त्रिभिः कृच्छ्रैः प्राजापत्यसांतपनातिकृच्छ्रैरित्यर्थः। एतच्चासकृत्करणे। अत्रा
भ्यासे महत्कर्मणि च साधारणप्रायश्चित्तानि जातिशक्तिगुणाद्यपेक्षया योज्यानि। अथ प्रासत्प्रतिग्र ॥९०६॥

हे। तत्र दुष्प्रतिग्रहनिषेधो मनुः। अप्रतिग्रहीतारस्तु ये वा याज्ययाजकाः नश्यंत्यज्ञा वैते यथा सीदंत्यका
रे प्लव धाते मात्स्ये। तस्मात्तीर्थे न गृह्णीयात्तीर्थेष्वायतनेषु च निमित्तेषु च सर्वेषु नप्रयतो भवेद्द्विजः। म
नुः। हिरण्यं भूमिमश्वं गामन्नं वासस्तिलान्घृतं अविद्वान्प्रतिगृह्णानो भस्मी भवति दारुवत्। अत्र मंत्रा
द्यविदुष एतत्प्रतिग्रहनिषिध्यते न तु हिरण्यादीनां कृष्णाजिनादिवत्प्रतिग्राह्यत्वं स्कांदे। अजिनं प्रेतशय्यां
च मेषांश्चोभयतोमुखीं कुरुक्षेत्रे च गृह्णानो न भूयः पुरुषो भवेत्। महादानानि ये विप्रा गृह्णाति ज्ञानदु
र्बलाः। ध्रुवं ते द्विजरूपेण जायंते ब्रह्मराक्षसाः। अयं च निषेध एकैकस्य न वनानेकेषां तथा च वह्निपुरा
णे महादानमिदं यस्मान्नादेकोऽहिनाहरेत्। वसिष्ठः। शस्त्रं विषं चाप्रतिग्राह्याणि ब्राह्मणस्य। पाद्मे त्रैलोक्यं भू
मिदानं च ग्राह्यं नैकेन तद्भवेत्। गृह्णन्दोषमवाप्नोति ब्रह्महत्यां न संशयः। भूमिदानं षोडशमहादानांतर्गत
कांचनं मेदिनीदानमिति धर्मप्रकाशे हेमाद्रौ। ब्राह्मण एव तिलक्रीयात्सर्पसाधकतः सदा। अप्यं च मणि
मातंगतिलिलोहानि वर्जयेत्। कृष्णाजिनं तिलग्राहीन भूयः पुरुषो भवेत्। शय्यालंकारवस्त्राणि प्राति

प्रा॰म॰ गृह्यन्तस्य च। नरकान्न निवर्तेत धेनुं तिलमयीं तथा। वह्निपुराणे। हस्त्यश्वरथयानादि मृतशय्यासना।
॥११५॥ दिग्य। कृष्णाजिनं चर्म गृह्णन्निश्चना पशुर्गतो द्विज। तथैव मुसुरवा घोरा सप्तैः समेदिना द्विज। कुरुक्षेत्रे च
य दानं च जलात्पतिताश्च या। मासिके च नवश्राद्धे तु जप्तेत ब्रमाप्नुयात्। हेमाद्रौ स्मृत्यन्तरे। कृष्णाजिनप्र
तिग्राही विक्रयी चैव रेतस। गजच्छायास्थितो भुक्त्वा न भूयः पुरुषो भवेत्। पाद्मे। न तीर्थे प्रतिगृह्णीयात् प्राणैः
कंठगतैरपि। अपि कामातुरो जंतुरेकोऽर समातरं तीर्थे प्रतिग्रहो यस्तु तीर्थविक्रय एव सः। विक्रीतायां तु गं
गायां विक्रीतस्या जनार्दनः। जनार्दने तु विक्रीते विक्रीते विक्रीतं भुवनत्रयं। यस्तु लौल्यात् द्विजः क्षेत्रे प्रतिग्र
ह्णीयान्न वेत्। नैवं तस्य परो लोको नायं लोको दुरात्मन। ब्राह्मे। प्रवाहमवधिं कृत्वा यावद्धस्तचतुष्टयं तत्र नारा
यणः स्वामी नान्यः स्वामी कदाचन। तत्र न प्रतिगृह्णीयात् प्राणैः कंठगतैरपि दानधर्मे। भाद्रशुक्लचतुर्द रामः
श्यां यावदाक्रमते जलं तावद्गर्भं विजानीयात् ऊर्ध्वं तीरमुच्यते। ब्राह्मे सार्धहस्तशतं यावद्गर्भतस्तीर ॥१०७
मुच्यते स्कांदे तीराद्गव्यूतिमात्रं तु परतः क्षेत्रमुच्यते अत्र दानं जपो होमो गंगायां नात्र संशयः। तटयोः प्र

त्येकः क्रोशद्वयं गव्यूतिमात्रं गंगायाः क्षेत्रमन्यत्र नद्यादावत्तु क्षेत्रं नेति धर्मप्रकाशे याज्ञवल्क्यः। विद्यातपोही
नो हीनेमनुयाद्यः प्रतिग्रहः। गृह्णन्प्रदातारमधो नयत्यात्मानमेव चेति च निषेधा अनेकविधा। कालदे
शकर्तृदात्रादिभेदात्। तत्र कालत उपरागादौ देशतः कुरुक्षेत्रादौ भव्यते। मेषादौ। कर्तृतस्तु विद्यात
पोहीनस्य दातृ। दातृतस्तु द्वैधा जातितः कर्मतश्च। यथा चंडालादेः पतितादेश्च। प्रायश्चित्तमाह योगीश्वरः। गो
ष्ठे वसन् ब्रह्मचारी मासमेकं पयोव्रतः। गायत्रीजप्यनिरतः शुध्यते सत्प्रतिग्रहात्। मनुः। जपित्वा त्रीणि सावि
त्र्याः सहस्राणि समाहितः। मासं गोष्ठे पयः पीत्वा मुच्यते सत्प्रतिग्रहात्। मासमित्यत्र संयोगात् वा चिन्त्या द्वितीय
पावित्रसहस्रजपस्य प्रतिदिनव्यापित्वं गम्यते। इदं च गुरुत्वात् निमित्तद्वयसमुच्चये। यत्तु षट्त्रिंशन्मते। पवि
त्रे ष्टा विष्णु ध्यायंति सर्वे घोरोऽप्रतिग्रहाः। ऐंद्रवेनम गारे ष्टाकदाचिन्मेत्रविंदं यादेव्यालक्षजपेनैव शुध्येतदुः
प्रतिग्रहात्। इति तद्देशकालकर्तृद्रव्याणामन्यतरदुष्टत्वे ज्ञेयः। अत एव द्वित्रादिचतुःसन्निपाते प्रायश्चित्तं गौ
रवं कल्प्यं। पूर्वोक्तगायत्रीलक्षजपो वेति केचित्। षट्त्रिंशन्मते। निशामात्रे गृहीते तु पुण्यं मंत्रमुदाहरेत्।

प्रा॰म॰

॥११६॥

हारीतः॥ मासिवासेगवादीनां प्रतिग्रहे सावित्र्यष्टसहस्रं जपेत्॥ पंचमध्यमे द्रव्योत्तमे॥ द्वादशरात्रं पयो व्र
तं शतसहस्रमसत्प्रतिग्रहे चेति॥ उत्तमत्वादिकं च मराणपादीनां वृहस्पतेर्वचनाज्ज्ञ॥ तत्र वचनानि नारद
देवब्राह्मणराज्ञां च विज्ञेयं द्रव्यमुत्तमं॥ छंदे गोत्रणपाऊरतिदानानि गावः पृथ्वी सरस्वतीति॥ देवल
नवोत्तमानि चत्वारि मध्यमानि विधानतः॥ अधमानानि शेषाणि त्रिविधत्वमिदं विदुः॥ अन्नं दधि मधुत्रा
णं गोभूरुक्माश्वहस्तिनः॥ दानान्युत्तमदानानि उत्तमद्रव्यदानतः॥ विद्याद्वादनवासपरिभोगौपधानकं दा
नानि मध्यमानीति मध्यमद्रव्यदानतः॥ उपानत्प्रेंखयानानि छत्रपात्रासनानि च॥ दीपकाष्ठफलादीनि च
मरं बहुवार्षिकं॥ बहुत्वादस्य जातानां संख्यादेशेषु नेष्यते॥ अधमान्यविशिष्टानि सर्वदानान्यनेकशः इति॥
आदेशेषु गणनासु इयत्तापरिच्छेद इतियावत्॥ नारदः॥ व्यासः॥ कौशेयवर्जं च गौर्वर्ज्यो पृष्ठवस्तथा हिरण्य
वर्जितो हं च मध्यं ब्राह्यिवान्यपि देवलः॥ क्षेत्ररत्नवेश्मदेमक्रूपान्नरणान्युत्तमानि॥ चतुष्पदद्विपदस्थ्वा रामः
न्यफलोदकवस्त्रकार्षापणादानि मध्यमाख्यानि अपर्यसारे॥ सर्वत्रानुक्तौ दातृदेशकालद्रव्येषु उद्देशेषु ह्रास्या ॥१०८॥

निष्कत्रमाणद्रव्यप्रतिग्रहे कार्यं॥ एवं सर्वत्र द्रव्यानुसारात्प्रायश्चित्तवृद्धिह्रासाविति हेमाद्रौ पापेन्नति
दुष्टप्रेतशय्यानस्त्राह्याद्विजसत्तमैः॥ गृहीता यां तु तस्याश्च पुनः संस्कारमर्हति॥ एतानि च प्रायश्चित्ता
नि प्रतिग्रहात्प्राक् तु ज्ञेयानि व कार्याणि तथा च मनुः॥ यद्गर्हितेनार्जयंति कर्मणा ब्राह्मणा धनं॥ तस्योत्स
र्गेण शुध्यंति दानेन तपसैव वा॥ इदं तु शक्तालनाद्यनेकनिषेधसत्वे॥ एकतरनिषेधसत्वे तूत्सर्गः प्राय
श्चित्तयोर्विकल्पः॥ तथाच कल्पतरौ यमः॥ कर्मणा गर्हितेनैव यद्वित्तं समुपार्जितं॥ तस्योत्सर्गेण शुध्यंति धर्म
स्यान्वेषणेन वा॥ उत्सर्गप्रकारमाह स एव॥ अप्सु स्यैतु तद्द्रव्यमन्यायेन यदागतं॥ प्रतिग्रहो वा दातव्यो विशिष्ट
नां ब्रह्मचारिणां॥ यत्तु चतुर्विंशतिमते प्रतिग्रहे तु सर्वेषु दृष्टं परिकल्पयेत्॥ जपहोमादिकं कुर्यात्कित्वाय
त्प्रतिग्रहे॥ यत्र पात्रे॥ अपचेत्प्रतिगृह्णाति ब्राह्मणो ह्यतिकर्षितः॥ दशांशमर्जितं दद्यादेवं तन्नमहीय
त इति॥ तत्तु स्वल्पप्रतिग्रहविषयं॥ उपपातकसामान्यप्रायश्चित्तान्यपि जातिशक्त्याद्यपेक्षया योज्या
नि॥ इति दुष्टप्रतिग्रहप्रायश्चित्तं॥ अथ कौशीलव्ये॥ यमः॥ नटनर्तकनदाणश्चर्मकारः सुवर्णकृत् छात्र

ण्कार्षं ठगणिकान्नभोज्यान्नाः प्रकीर्त्तिताः ॥ गांधर्वी लोहकारश्च सौचिकस्तंतुवायकः ॥ चक्रोपजीवी रजकः कि-
तवस्तस्करस्तथा ॥ ध्वजामालोपजीवी वा चर्मशास्त्राध्यापकयाजकौ ॥ कुलालश्चत्रकसचिवार्द्धुषीश्चमर्मविक्र-
क्रयी समर्घं पिण्यमाहृत्यमहर्घं यः प्रयच्छति ॥ सर्वैवार्द्धुषिको नाम यश्च वृद्ध्या प्रयोजयेत् ॥ वृथाश्रमी ह-
प्यादाता श्रोत्रमार्गाणां च भेदाक पुण्यस्य विक्रयाय श्चपोनि संकरकस्तथा ॥ रंगोपजीवी कुंडाशी वीरहा
गुरुतल्पगः ॥ भिषक्गरदश्चैव रूपाजीवी च सूचकः ॥ पार्थिकश्चैव वृश्च निषादेन समाः स्मृताः ॥ कर्मस्वेतेषु पेमो-
हान्न स्नणो वर्त्तते सदा प्रायश्चित्तेपि चरितेपरिहार्यो भवेत्सदा ॥ एते ब्राह्मणचांडालाः सर्वे ब्रह्महणाकिनः
तस्मादेव च पैत्रे च पैत्रे च वर्जितास्तत्त्वदर्शिभिः ॥ एतेषामेव सर्वेषां प्रत्यापत्तिर्न मार्गतां ॥ नैष्ठान्नमुपजं-
जानो द्विजश्चांद्रायणं चरेत् स्यात्पुकान्नभ्रातमती इति मदनः ॥ वृथाश्रमी वेदबाह्यजगधारणादिना

श्रामनार्गान्तु भेदकः ॥ तन्भेदकः तद्विरुद्धकारित्वात् आश्रमधर्महिंसक इति कल्पतरौ ॥ योनिसंकरि

कौव्यभिचारी ॥ कुंडाशी चतुःषष्टिपलान्नभक्षक इति शूलपाणि ॥ मुक्तास्त्र पत्नीजीवति कुंडस्तु मृते भ-

र्त्तरि गोलकः ॥ यस्तु पारलमश्नाति सकुंडः परिपुच्यते बुधैरिति मनुकरणे वा ॥ वीरहा त्यक्ताग्निः ॥ गुरुतल्पगो दंडा-
दिना गुरोर्हस्तेति भार्या ॥ गुरुनिकृष्टकारो रति मदनः ॥ रूपाजीवी वेश्याकरः ॥ ताम्रादीनां स्वर्णादिस हवा-
रूपकारी वा ॥ सूचकः पिशुनः ॥ सूनाघातस्थानं तेन जीवत्समो सौनिकः ॥ अत्रापि काशीलाव प्रक्रितिध-
नत्यागः ॥ अथ विप्लुदृष्टेषु ॥ विष्णुः ॥ समुत्कर्षाभिमते गुरोश्चालीकनिर्बंधे तदाराधने च मासं पयसा वर्त्ते-
ति ॥ इदं च मतिपूर्वं ॥ आहारणं व्यभिचारा निशापः शंखः ॥ द्वित्वायां वस्तुभिर्व्यंतदेवांश मिमानवः ॥ मास-
मेकेव्रतं कुर्यात् पाकस्य तथा गुरुणा मंतु ॥ देवर्षिब्राह्मणाचार्यमातृपितृनरेंद्राणां प्रतीच्छीवते आक्रोशनेचो-
त्मुकेन जिह्वां दहेद्धिरण्यं दद्यात् ॥ अमतिपूर्वे गुरोर्निबंधे तु वसिष्ठः ॥ गुरोरलीकनिर्बंधे कृच्छ्रं वा दशरात्र-
के चरित्वा सचैलं स्नातो गुरुप्रसादात्पूतो भवति ॥ याज्ञवल्क्यः ॥ गुरुं त्वंकृत्य हुंकृत्य विप्रं निर्जित्य वादतः ॥ बद्ध्वा
श्रावा समाह्निसंस्नात्वा चोपवसेद्दिनं बृहस्पतिनात्र रात्रं तदपि त्वात् एनापि प्रसाद्यैव विशुध्यती तिपवि-
ताः इदमकामतः कामतस्तोषं रवाजिरिविंतो ॥ आक्रोशादितवादेएकरात्रं त्रिरात्रं चोपवास इति प्रभृ

प्रा॰म॰
॥१२९॥

वसिष्ठः। आचार्यमातृपितृहंतारस्तत्प्रसादादप्यपाया इति तदप्यज्ञानतः। हंतारोऽप्यतरङः स्वकर। यत्स्वायत्त
वः। अनार्कोरपमार्कोरपत्रिरात्रमक्षारलवणं भोजनं भूशय्यासप्तरात्रमभोजनं स्त्रीणां चैतदपि ज्ञानतः। अ
नातुक्तविशेषप्रायश्चित्तेषु वार्हस्पत्यकृच्छ्रवरणादिपादिष्टुउक्तविशेषप्रायश्चित्तेषु गोवधादिषु उपपातकसामा
न्यप्रायश्चित्तानि जातिरात्रा। घयेदृपायोज्योतितवोक्तमं मानं वृषभैकावशारा शेयुतंत्रे मासिकं ततो
न्यून द्वैमासिकं। ततोऽन्यूनं मासं पावाग्रपानमिति। एता निकामतः। अकामतस्तु उपपातकशुद्धिस्यादे
वं चांद्रायणेन वा पयसा वा पिमासेन पराकेण यववापुनरिति याज्ञवल्क्योक्तानि। इत्युपपातकप्रायश्चि-
त्तानि समाप्तानि ॥ अथ जातिभ्रंशकराण्याह मनुः। ब्राह्मणस्य रुजः कृत्वा घ्रातिरघ्रेयमद्ययोः। जैह्म्यं पुं
सि च मैथुनमपि मयावाते घ्रुप्रायश्चित्तमाह मनुः। जातिभ्रंशकरं कर्म कृत्वान्यतमं इच्छया चरेत्सांतपनं कृ
च्छ्रं प्राजापत्यमनिच्छया। एतच्च अभ्यास इति शूलपाणिः। संकरीकरणान्याह मनुः। खराश्वोष्ट्रमृ
गेभानां मजाविकवधस्तथा संकरीकरणं ज्ञेयं मीनाहिमहिषस्य चेति। विष्णुः। ग्राम्यारण्यपशूनां रामः ॥१२०

हिंसनं संकरीकरणमिति। अपात्रीकरणान्याह मनुः। निंदितेभ्यो धनादानं वाणिज्यं शूद्रसेवनं। अपात्री
करणं ज्ञेयमसत्यस्य च भाषणमिति। उपपातकेषु शूद्रसेवापदिष्टत्वेतु सच्छूद्रस्यापदि सेवकं च न मिति
ज्ञेयः। एवमन्यत्रामलिनाकरणान्याह मनुः। कृमिकीटवयोहत्या मद्यानुगतभोजनं। फलैधःकुसुमस्तेय
मधैर्यं च मलावहमिति विष्णुः। पक्षिणां जलजानां स्थलजानां च घातनं। मलावहमिति। अत्र जाति
भ्रंशकत्वादिसंज्ञा रूढा न योगिकाः। आ ब्राह्मणं ब्राह्मणेऽपि जातिभ्रंशापत्तेः। स्त्रीयाप्पादीनां यातत्वान्नाव
तान्यत्य पात्रीकरणसंबाधाच्च। विष्णुप्रायश्चित्तमाह मनुः। संकरापात्रकृत्यासु मासं शोधनमैंदवः
मलिनीकरणीयेषु तप्तः स्याद्यावकं त्र्यहमिति। विष्णुः। संकरीकरणानुष्ठाने मासपावकान्नानं ज्ञाना
त्कृच्छ्रातिकृच्छ्रं। अज्ञानायासेतु चांद्रायणं द्वयं कल्प्यं। विष्णुः। अपात्रीकरणं कृत्वा तप्तकृच्छ्रेण शुध्य
ति। शीतकृच्छ्रेण वा भूयो महासांतपनेन वा। अज्ञानादपात्रीकरणे तप्तकृच्छ्रं वा ज्ञानात्तु महासांतपनं
चांद्रायणं पूर्ववत्। विष्णुः। मलिनीकरणीयेषु तप्तकृच्छ्रं विशोधनं कृच्छ्रातिकृच्छ्रमप्यत्र प्रायश्चित्तं विशोध

प्रा॰म॰

॥२२९॥

नं। अज्ञानान्मलिनीकरणानुष्ठाने त्र्यहं पावको ज्ञानात्तप्तकृच्छ्रः। अज्ञानतो मासं कृच्छ्रातिकृच्छ्रं। एतानि जा
तिभ्रंशकरादिषु सामान्यप्रायश्चित्तानि ब्रह्मरुग्जःकरणादिमध्यपन्नत्वात्। विकं प्रायश्चित्तं नोक्तं तत्र
पत्र चोक्तं तत्र पिजातिशक्तिगुणाद्यपेक्षया योज्यानि। विशेषवधप्रायश्चित्तमुक्तं प्राक्। इति जातिभ्रंश
करादिप्रायश्चित्तं॥ ७॥ अथ प्रकीर्णप्रायश्चित्तानि तत्स्वरूपमाह विष्णुः। यदनुक्तं तत्प्रकीर्णकमिति महापात
कादिमलिनीकरणांतेषु यत्र परिगणितं तत्प्रकीर्णकमित्यर्थः। मनुः। शरणागतं परित्यज्य वेदं विप्लाव्य
च द्विजः। संवत्सरं यवाहारस्तत्पापमपमृजु। वेदविप्लावनं चांडालादिस्पृष्टिपथ्ये अजध्याये वसिष्ठः। पतितचंडा
लश्रावणे। त्रिरात्रं वाग्यतश्चानश्नंत। आसीरन् संहस्रपरमं तदभ्यस्यंत पूता भवंतीति विज्ञायतइ
ति। शातातपः। त्रिधा वधा वयतां सहस्रपरममिति। यावन्नागश्चांडालादिनिःसृतः तावंतमागं सह राम:
स्रकृत्वा जपेदित्यर्थः। यत्तु षड्त्रिंशन्मते। चंडालश्रोत्रावकाशे श्रुतिस्मृतिपाठे एकरात्रमभोजनमिति ॥२२९
तदबुद्धिपूर्वकं सकृत्कृच्छ्रवणे निरस्यकरणे सामान्यप्रायश्चित्तं मनुराह। वेदोदितानां नित्यानां कर्म

णां समतिक्रमे। स्नातकव्रतलोपे च प्रायश्चित्तमभोजनमिति। नित्ययज्ञार्थकरणे तु आचारमाधवी
ये प्रजापतिः। दर्शं च पूर्णमासं च लुप्त्वा धीमान्यमेव वा। एकस्मिन् कृच्छ्रपादेन द्वयोरर्धेन शेषं धनं। ह
विर्यज्ञेषु शाकस्य लुप्तमप्येकमादितः। प्राजापत्येन शुध्येत पाकसंस्थासु चैव हि। संध्योपासनहानौ तु नित्यस्ना
नेतु लोप्य च। होमं च नैत्यकं शुध्येद्गायत्र्यष्टसहस्रकृत्। समाते सोमयज्ञानां हानौ चांद्रायणं चरेत्। अकृत्वान्य
तमं यज्ञं यज्ञानामधिकारतः। उपवासेन शुध्येत पाकसंस्थासु चैव हीति। कात्यायनः। पितृयज्ञात्यये चैव वैश्व
देवात्यये पि च। अनिष्ट्वा नवयज्ञेन न चाग्राशनेन तथा। भोजने पतितोन्नस्य चरुर्वैश्वानरो भवेदिति। विहितद
क्षिणापयाप्रत्यक्षा तानपि नित्यान्न लोपयेत्। तदाह बौधायनः। यस्य नित्यानि लुप्तानि तथैवागंतुका
नि च। विपद्यापि न स स्वर्गं गच्छेत यतितो हि सः। तस्मात्कंदैः फलैर्मूलैर्मधुनाप्यरसेन वा। नित्यनिकर्वी
तन च नित्यानि लोपयेदिति। पंचमहायज्ञाकरणे तु बृहस्पतिः। अग्निवर्षमहायज्ञान्यो भुंक्ते त्वत्य हंयदि।
अनातुरः सति धने कृच्छ्रार्धेन स शुध्यति। एतच्च त्रिदिनातिपात इति केचित्। तथा। आहिताग्निरुपस्थानं

नकुर्याद्यस्तु पर्वणि कृतौ न गच्छेद्भार्यां च सोपि कृच्छ्रार्द्धमाचरेत् ॥ विष्णुरपि ॥ पर्वानारोग्यवर्जं ऋतावगच्छन्पत्नीं
त्रिरात्रमुपवसेत् ऋतुरत्र स्नानदिनाद्यारभ्य षोडशदिनानि ॥ यत्संवर्त्तः ॥ ऋतौ नोपैति यो भार्यां नियतां व्रत
चारिणीं ॥ नियमातिक्रमात्तस्य प्राणायामशतं स्मृतमिति तदकामतः ॥ एतच्च समानदेशविषयं ऋतुस्नानां
तु यो भार्यां सन्निधौ नोपगच्छति घोरायां भ्रूणहत्यायां पितृभिः सह मज्जतीति मिताक्षरावचनात् ॥ एतदेव प्रा
यश्चित्तं स्त्रिया अपि ऋतौ भर्तुरनुपसर्पणे भवति तस्या अपि नारदीये दोषदर्शनात् ॥ आहूता या तु वै भर्त्रा
तापयंति नराश्चिता साध्वी ज्ञा जायते पुत्रा दशवर्षाणि पंच च ॥ ब्रह्मात्कमंडलुभक्षमश्नातो यः सभोजनं अ
होरात्रेणास्य हस्यादिनजप्येन चैवहि ॥ अत्र च कारेणोपवासदिनजपयोः समुच्चयः ॥ कृष्णपक्षे दंडच्चा
पंपलाशाग्निं जघन्यस्य प्रदर्शयेत् ॥ प्रायश्चित्तमहोरात्रं धनुर्दंडश्च दक्षिणेति ॥ धनुषो दंडस्य च क्रमेण ॥
दानं तातव्यं ॥ अंगिराः ॥ अनापदि च वरे यस्तु सिद्धान्निशां गृहे वसन् दशरात्रं पिबेद्दुग्धं आपत्काले ग्रहं द्वि
जइति वस्त्रं वस्त्रकृच्छ्रं सबंधि नव्यं ॥ एकस्यां पंक्तौ विषमदाने तु यमः ॥ अनुपंक्त्या विषमं दद्यात्तस्माच्चैतन्न दाप

येत् ॥ याचको दापको दाता वै स्वर्गस्य गामिनः ॥ प्राजापत्येन कृच्छ्रेण मुच्यन्ते कर्मणस्ततः ॥ स एव ॥ नदीसंक्रमं हन्तु
श्च कन्याविघ्नकरस्य च ॥ समं विषमकर्तश्च निष्कृतिर्नोपपद्यते ॥ त्रयाणामपि चैतेषां प्रत्यापत्तिर्नु मार्गतः ॥ नै
हलक्षेन चान्नेन द्विजश्चान्द्रायणं चरेत् ॥ संक्रमं उदकान्तरमार्गे ॥ समे विषमकर्त्ता ॥ पूजादौ द्विजस्य ॥ एकपं
क्त्युपविष्टानां विषमं विषमं यः प्रयच्छति ॥ यश्च पाचस्स सोपसंकुर्याद्ब्रह्महत्याव्रतं ॥ वसिष्ठः ॥ दंड्यो सगराजैकेरा
त्रमुपवसेत् त्रिरात्रं पुरोहितः ॥ कृच्छ्रमदंड्यदंडने पुरोहितस्त्रिरात्रं राजा कृच्छ्रं नरवोश्चाव दातश्च कृच्छ्रं द्वादशरात्रं च
रित्वाद्वरे पातमिति उद्धरे यातां नरवानां चोद्धरणं कुर्यादित्यर्थः ॥ ब्राह्मणस्य क्षत्रियादीनभिवादने हारीतः
क्षत्रियाद्यभिवादनेहोरात्रमुपवसेद् द्वैवैश्यस्याभिवादने त्रिरात्रमुपवास इति ॥ सतितुष्प हस्ताभिवादनेप्ये
वमिति केचित् ॥ तथा उपप्यारूढपादको पानद्वारो पितु पादो च्छिष्टो धकानस्तभस्त कृकजपदो व पूजाभिवादने
त्रिरात्रमुपवासः ॥ स्यादन्यत्र निमंत्रितेनान्नभोजने पित्रराचमिति ॥ देवादिनामभिमुखेन ष्ठीवनादौ सुमंतुः
देवर्षिगोब्राह्मणाचार्यमातृपितृनरेन्द्राणां प्रतिष्ठीवनाक्रोशने जिह्वाच्छेदे हिरण्यं दद्यादिति दाहोज

वनादिविशेषेणामंडपोद्यानदेवतागाराद्भिन्नेदेवालयपः वापीकूपारामसेतुलतातडागवप्रदेवतायतनभेदने।
प्रायश्चित्तं ब्राह्मणोत्सो निर्वेद्यचतस्रस्ताभ्यां कृतार्द्धं कुर्यादिदं विष्णुरिति प्रथमां मानस्तोक इति द्वितीयां वि
ष्णोः कर्माणीति तृतीयां पादोस्येत्यामिति चतुर्थीं यां देवतामुद्दिश्य तितस्यै देवतायै ब्राह्मणान्भोजयेत् इति
एतच्चाल्पीयघाते महतोपघाते त्वासे प्राजापत्यादिकल्पनीयं देवताचात्रग्रन्थकर्तोपजितोक्तिं वयाह्याप्रा
यश्चित्तस्याल्पत्वादन्यत्रतु दंडगौरवदर्शनेनं प्रायश्चित्ते कल्प्यं दंडवत्प्रायश्चित्तं भवतीति वचनात् तथात्र दं
डगौरवमाह कात्यायनः हरेच्छिद्याद्दहेद्वापि देवानां प्रतिमां यदि तत्कृत्यं चैव योभिन्द्यात्ताच्च मुल्यं सा
हसं स्वमत्स्यस्याविक्रेयविक्रयाप्रतिमाभेदकश्च उत्तमसाहसं दंडनीयः यत्तनयो द्वारादिकमप्याहतुः शंख
लिखितौ प्रतिमारामकूपसंक्रमणध्वजसेतुनिपानभंगेषु तत्समुत्थापनप्रतिसंस्कारौ स्वरत्नं चेति भनुः
संक्रमध्वजयष्टीनां प्रतिमानां च भेदकः प्रतिकुर्याच्च तत्सर्वं पंच दद्याच्छतानि वेति अत्रच प्रतिमातार रामः
तम्येन तद्भेदतारतम्येन दंड्या मश्चित्तपोर्थवस्थोयेया दारिद्र्यादिना भर्तुरतिक्रमेऽप्याप्तं ब भर्तुरतिक्र ॥१२१॥

मेऽकृच्छ्र इति अतिक्रमोदारिद्र्यरोगाधमात्म्यर्यादिनावमाननं पर्वणि मैथुने विष्णुः पुराणे निंदा श्रवणे च तुर्द
श्यष्टमी चैव अमावास्याथ पूर्णिमा पर्वाण्येतानि राजेन्द्र रविसंक्रांतिरेव च स्त्रीतैलमांससंभोगी पर्व
स्वेतेषु यो नरः विण्मूत्रभोजनं नाम प्रयाति नरकं मृतः मिताक्षरायां स्मृत्यंतरे अष्टम्यां चतुर्दश्यां दि
वा पर्वणि मिथुनं कृत्वा सचैलं स्नात्वा वारुणीभिश्च मार्जयेदिति श्राद्धदिनमैथुने स्नातकव्रतलो
पे चेत्यनेनोपवास एव वमने शातातपः छर्दनं द्विजातीनां भिन्नभांडे च भोजने पंचगव्येन शुद्धि
स्यादिति शातातपोऽब्रवीत् मांसादिवमनेतु विशेषमाह यमः मस्तरमांसमारवानि भुक्त्वा वाचमति द्वि
जः त्रिरात्रमुपवासस्य प्रायश्चित्तं विधीयते प्राणायामैस्त्रीन् स्नात्वा घृतं प्राश्य विशुध्यति तथा यज्ञोपवीता
दिनाशे मेखलादंडाजिनयज्ञोपवीतादिनाशेमेखलां दंडाजिनयज्ञोपवीतावपाते पुनर्नवाकाव्रती निष्क
समभ्यस्याकृत्वा कृत्वा पुनर्यथार्थं प्रतीपादसहस्रं भोजनेऽभ्युदितोऽ निर्मोक्तिके चांते दिवा स्वप्नेन य स्त्री
दर्शने न मस्वापे स्मशानमाक्रम्य हयादी आरुह्य इत्यातिक्रमे चैतां निरेव जुहुयाद स्य समिध नेछाव

प्रा॰म॰
॥१२२॥

रसरीसृपादीनां वधे यद्देवा देवहेलनमिति कूष्मांडीभिराज्यं जुहुयात् मणिवासोगवादीनां प्रतिग्रहे गायत्र्यष्टसह
स्रं जपेदिति मनोज्योतिर्जुषतामिति मनोलिंगाभिस्त्वमग्ने व्रतपा असीति व्रतलिंगाभिश्च यथार्थं उपनयनोक्ते
न विधिना समंत्रकं प्रतीयायाच्छुद्धीयात् अभ्युदितादिस्वरूपमाह यमः सूर्योदये तु यः शेते स सूर्योदि
त उच्यते अस्तं गते तु यः शेते सूर्योनिर्मुक्त एव स इति अकामतोभ्युदिते प्रायश्चित्तमाह यमः अजास्येभ्यु
दिते चांद्रमस्कर्मणि नोजनेऽस्वप्नेऽर्जने स्यूर्योपस्थानमात्रं विधीयते अत्रैव कामतो गौतमः सूर्याभ्युदि
तो ब्रह्मचारी तिष्ठेदहरभुंजानोऽभ्यस्तमितो रात्रिं सावित्रीं जपेत् अभ्यासे त्वाह हारीतः गर्भाधानादिसंस्का
रातिपत्तौ तु आश्वलायनः आरभ्याधानमाचौलात्कालेऽतीते तु कर्मणां व्याहृत्याज्यं सुसंस्कृत्य हुत्वा क
र्म यथाक्रमं एतेष्वेकैकलोपे तु पादकृच्छ्रं समाचरेत् चूडाया अर्धकृच्छ्रः स्यादापदीत्येवमाह हारीतः अना
पदि तु सर्वत्र द्विगुणं चरेत् तत्र सतंनहस्पाभ्यां इमं मे तत्वा यामि ऋचा येते शतमया श्वास्यां उदुत्तमं च ऋ
ता कृत्वाष्टपकरणकादं अर्द्धं चौले समाचरेत् स्त्रीणामप्येवमेवस्याज्जातावामंत्रिकक्रियेति गर्भाधाना

रामः
॥१२४॥

करणे आश्वलायनः गर्भाधानस्याकरणे तस्य तु उष्यति अकृत्वा गां ततो दत्वा कुर्यात्पुंसवनं पति हुताशे
वृद्धपराशरः विप्रः क्षुत्वा तथा निष्ठीव्य कृत्वा चानृतभाषणं वचनं पतितैः कृत्वा दक्षिणं श्रवणं स्पृशेत् वेद
णं वाग्निनोर्कस्य ब्रह्मलेशा विष्णुसंस्मृति एतच्च जलाभावे कर्मणि स्यादृतौ वा अत एव वृद्धशातातपः
क्षुत्वा निष्ठीव्य वासस्तु परिधायाचमेद्बुधः कुर्यादाचमनं स्पर्शे गोपृष्ठस्य च दर्शने यथा विप्रवतो
होततत्पूर्वाभावे ततः परं अविद्यमाने पूर्वोक्ते उत्तरं नातिरिष्यत इति संवत्सरे क्रियातीते विष्णु
पुराणे संवत्सरं क्रियाहानिर्यस्य पुंसः प्रजायते तस्यावलोकनात्सूर्यो निरीक्ष्यः साधुभिः सदा स्पृष्टे स्ना
ने सचैलं तु शुद्धिहेतुर्महामते पुंसो भवति तस्योक्ता न शुद्धिः पापकर्मण इति अत्र च प्रायश्चित्तविशे
षाश्वलायनादेकाहातिक्रमे चैकाहमभोजने तस्योक्तत्वात्तदनुसारेण च षष्ट्यधिशतत्रयदिनाप्रचारे ता
वदुपवासकरणाशक्तौ तत्प्रत्याम्नायत्वेन षडुपवासैरेकैकप्राजापत्यकल्पनया षष्टिर्योज्या निमंत्रणं
गृहीत्वा त्यागे तु यमः केतनं कारयित्वा तु योऽतिपातयति द्विजः ब्रह्महत्यामवाप्नोति शूद्रयोनौ च

प्राम·

॥२२३॥

जायते ॥ तस्मिन्नेतस्मिन्नेव सिद्धे ब्राह्मणो नियतव्रतः ॥ प्रतिचांद्रायणं वा त्वा ततः पापात्प्रमुच्यते इति ॥ निमंत्रि
तस्यानाह्वानेप्येतदेव ॥ एतच्च कामाभ्यासे ॥ अन्यत्र निमंत्रितो नान्यत्र भोजने त्रिरात्रमिति ॥ अत्र तत्र दत्तात्रे
खलिखितौ ॥ आक्रोशनानृतवादे एकरात्रं वोपवास इति कामतोभ्यासे तु ॥ असत्यभाषणे गुरु
सेवनमित्यपात्रीकरणं कृत्वा तप्तकृच्छ्रं कृत्वा शुध्यतीति विस्तृतं ज्ञेयं ॥ वधफलकेन्ते तु व्यसनप्रा
यश्चित्तप्रसंगेनोपपातकेषु प्रागुक्तं ॥ निषिद्धदेशगमने देवलः ॥ सिंधुसौराष्ट्रसौवीरांस्तथा प्रत्यंतवा
सिनः ॥ अंगवंगकलिंगांश्च गत्वा संस्कारमर्हति ॥ कर्मनाशाजलस्पर्शादौ स एव ॥ कर्मनाशाजलस्पर्शा
त्करतोयाविलंघनात् ॥ गंडकीबाहुतरणात्पुनः संस्कारमर्हतीति ॥ तीर्थयात्रां विना चैतत् ॥ अंगवंगकालि
गांश्च सौराष्ट्रमगधानपि ॥ तीर्थयात्रां विना गत्वा पुनः संस्कारमर्हतीति स्मरणात् ॥ तद्देशवासिनां तु प्रा
यश्चित्ततारतम्यं कल्पनीयं ॥ व्रणमध्ये कृमिपाते गरुडपुराणे ॥ जायते यस्य शिरसि कृमयो विनतात्मजा ॥२२५॥
छ्रं तदा चरेत्प्राज्ञः ॥ शुद्धयेकरूपात्मजेति ॥ पत्लुच्चवनः ॥ कृमिदर्शने सांतपनं ब्राह्मणो दक्षिणेति त

रामः

द्युगपदनेकव्रणेषु कृच्छ्रमुत्तरोज्ञेयं ॥ अनहत्रियादीनां यादपादन्यूनं ॥ खरयानाद्यारोहणे याज्ञवल्क्य
॥ प्राणायामैर्जले स्नात्वा खरयानोष्ट्रयानगः ॥ नग्नः स्नात्वा च सुप्त्वा च गत्वा चैव दिवा स्त्रियं ॥ खरस्तु कंया
नेशयादि ॥ एतच्च ॥ उष्ट्रयानं समारुह्य खरयानं च कामतः ॥ सवासा जलमाप्लुत्य प्राणायामेन शुध्यतीति मनु
वृहस्पतिस्मरणात् कामकारविषयं ॥ अकामतस्तु स्नानमात्रं तत्रैव विज्ञानेश्वरः ॥ उष्ट्रेण खरेण वा गत्वा नग्न
ः स्नात्वा च सुप्त्वा च प्राणायामं कुर्यादिति ॥ म॰ ज्ञात खरोष्ट्राद्यारोहणे तु यमः ॥ खरयानमुष्ट्रयानं वायो
विरोहेद्द्विजोत्तमः ॥ अपो वा प्रविशेन्नग्नः ॥ त्रिरात्रं क्षपणं स्मृतमिति ॥ दिवामैथुनादौ तु प्रायश्चित्तमाह यं
ख ॥ दिवा मैथुनं कृत्वा नग्नः स्नात्वा तथांभसि ॥ नग्नां परस्त्रियं दृष्ट्वा दिनमेकमभोजनमिति ॥ अत्र न स्नानदा
वेकरात्रत्रिरात्रयोरभ्यासाद्यपेक्षया व्यवस्था द्रष्टव्या ॥ अनुदकमूत्रपुरीषकरणे यमः ॥ आपत्तौ य
हीतेयं शारीरं यो निषेवते ॥ एकाहं क्षपणं कृत्वा सचैलं स्नानमाचरेदिति ॥ अनापदि द्विगुणं तच्च कामत
॥ अत्रैव सुमंतु ॥ अनुदकमूत्रपुरीषकरणे नखकेशरुधिरप्राशने सद्यः स्नानं ॥ घृतकुशाहिरण्योदक

प्रा॰म॰ नेचेति॥ अत्र घृतादिपानस्य प्रायश्चित्तायत्वाद्भोजननिवृत्तिः यस्त्वंगिरा॥ कृते मूत्रे पुरीषे वाप्यदत्ते वोदकं

॥२२५॥ नवतु॥ स्नात्वालभ्योदकं पश्चात्सचैलस्तु विशुध्यतीति॥ यच्च शातातपः॥ अनुदकमूत्रपुरीषकरणे
सचैलं स्नानं महाव्याहृतिहोमश्चेति॥ तदकामतः॥ अत्रैव मनुः॥ विनाद्भिरप्सु वाप्यार्तः शारीरं संनिषे
व्य तु॥ सचैलो बहिराप्लुत्य गामालभ्य विशुध्यतीति॥ यत्तु मरीचिः॥ अटव्यामवमानस्य ब्राह्मणस्य विशेषतः
प्रणष्टसलिले देशे कथं शुद्धिर्विधीयते॥ अपां दृष्टैव विप्रस्तु कुर्याद्वै वसचेलकं॥ गायत्र्यष्टशतं जप्त्वा
न मेतत्समाचरन्॥ देशकालं समासाद्य अवस्थामात्मनस्तथा॥ धर्मशौचे व्रतिष्ठेत न कुर्याद्वेगवारणं
त्रिरात्रं चाप्युपवसेत् महं त्रिषवणो भवेत्॥ तथैवांभसि मग्नस्तु त्रिः पठेदघमर्षणमिति॥ धर्मशौचं शा
स्त्रीयं शौचं वेगधारणं शास्त्रीयशौचप्रतीक्षयामूत्रपुरीषोत्सर्गविलंबनं कुर्यादित्यर्थः॥ त्रिरात्रोपवासस्त
नायदिकामतः॥ अबुद्धिकामतो मूत्रसपुरीषोत्सर्गयोरभ्यासे शंखलिखितौ॥ रेतो मूत्रपुरीषाणामुदकल रामः
त्वात् त्रिरात्रोपोषित इदमापः प्रवहतेति जपेदिति॥ यत्तु सुमंतुः॥ अपत्वप्रोवमेहतत्समकृच्छ्रमिति तत्कामतो ॥२२६॥

ऽभ्यासे॥ स्वपुरीषदर्शनाद्दोषः पराशरो॥ प्रत्यादित्यं न मेहेत न पश्येदात्मनः शकृत्॥ दृष्ट्वा सूर्यं नि
रीक्षेत गामग्निं ब्राह्मणं तथेति॥ यज्ञोपवीतं विनामूत्रोत्सर्गादिकरणे तु मदनरत्ने स्मृत्यंतरे॥ विना
यज्ञोपवीतेन यच्चोच्छिष्टो भवेद्द्विजः॥ प्रायश्चित्तमहोरात्रं गायत्र्यष्टशतं जप इति व्यवस्था॥ यत्तु तत्रैव पि
बतो मेहतश्चैव भुंजतोऽनुपवीतिनः॥ प्राणायामत्रिकं षट्कं चत्वारिंशत्क्रमादिति॥ तदकामतः॥ यत्तु वृद्ध
पराशरः॥ यज्ञोपवीतेन विना भोजनं कुरुते द्विजः॥ अथ मूत्रपुरीषे वा रेतःसेचनमेव वा॥ त्रिमंत्रोपोषितो वि
प्रः यादकृच्छ्रं तु भूमिपः॥ अहोरात्रोषितो वैश्यः प्रशुद्धिरेषा सनातनीति॥ तत्कामतोऽभ्यासे॥ भुक्त्वैवं तोनाचांतस्यो
च्छिष्टाच्छादनेपि तत्रैव॥ यदोच्छिष्टमनाचांतो भुक्तवानशनान्वितः॥ सद्यः स्नानं प्रकुर्वीत सोन्यथाप्रयतो भवेदिति
पालाशशयनारोहणे शंखः॥ अध्यस्य शयनं चैव मासनं पादुके तथा॥ पालाशस्य द्विजश्रेष्ठस्त्रि
रात्रं तु व्रती भवेदिति॥ निषिद्धकाष्ठदंतधावने वृद्धपराशरः॥ पलाशत्रिपाकाष्ठैर्दंतधावनकृन्नरः॥ दिवाकी
समस्तावद्यावन्नैव पश्यति॥ एतच्च निषिद्धकाष्ठांतराणामप्युपलक्षणं॥ अंतरागमनेपि तत्रैव॥ दैवि

प्रा॰म॰
॥१२५॥ यो ब्राह्मणाग्नीचरंदंपती तौ द्विजोत्तमौ। अंतरेणयदा गच्छेछं शुंसांतपनं चरेत्। होमकालेतथा याशेहोम
स्याध्याये दानसंग्रहे। अंतरेणयदा गच्छेत् द्विजश्चांद्रायणंचरेत्। यस्वंगिरा। दंपत्योर्विप्रयोरस्योविप्रायो
गोद्विजातिषु। अंतरंयो वगछेत्तु द्विजश्चांद्रायणंचरेदितिलकामत। एतदेवंच विप्राम्ग्नोर्विप्रपिंडानां नगो।
ह्मेो। विध्रुतास्वयी। नानुवोमादिकानांचनकुर्याद्वंतरागतिमिपराज्ञो रोक्तेपि द्रष्टव्यं हरपराशर।
ऐतेषामाचरणमेकैकस्याभिचारे एकरात्रोपोषणमिति। ब्रह्मचारीधर्मलोपे बौधायन। शौचाच
मनसंध्यावंदनदर्भभिक्षाग्निकार्यराहित्यस्त्र्यादिस्पर्शनकौपीनकटिसूत्रयज्ञोपवीतमेखलादंडाजि
नदिवास्वापछत्रधारणपादुकाध्यारोहणमालाधारणोद्वर्तनानुलेपनांजलक्रीडाद्यूतनृत्यगीतवा
द्याव्यभिरतिः पाषंडादिसंभाषणपर्युषिताभोजनादिब्रह्मचारिव्रतलोपजसकलदोषनिहारार्थंब्र
ह्मकूर्चारीकछ्रत्रयंचरेत्। महाव्याहृतिहोमंचकुर्यात्। प्रथमंव्यस्तसमस्तव्याहृतिभिर्घृतमिश्राज्याज्ञ
तीर्हुत्वाऽत्रस्मयेच पृथिव्यैचमहतेचस्वाहा उँ भुवोवायवेचांतरिक्षायच महतेचस्वाहा उँ सुवरा रामः
॥१२७॥

दित्यायचदिवेचस्वाहा उँ भूर्भुवः सुवश्चंद्रमसेचनक्षत्रेभ्यश्चदिग्भ्यश्चमहतेचस्वाहा उँ याहिनो अय
शनसेस्वाहा। पाहितोअग्नेविश्ववेदसेस्वाहा। उँ यज्ञं याहिविभावसोस्वाहा। उँ सर्वं याहिशतक्रतोस्वाहा उँ पु
नरूर्जानिवर्तस्वयुतरग्नइहायुः। पुनर्नःपाह्यंहसःस्वाहा। सहरय्यानिवर्तस्वाग्नेपिन्वधारया। विश्वप्स्नियावि
श्वतस्परिस्वाहा। पुनर्व्याहृतिभिर्जुहुयादिति। एतदल्पधर्मलोपविषयं प्रायश्चित्तं विशेषमाहकृत्यचिंताम
णौ नकः। तं बोधियाजपेन्मंत्रं नक्तं चैवेशिवालये ब्रह्मचारिणोधर्मभ्रष्टस्यचेत्पूर्णमेवहीति। इतिब्रह्म
चारिधर्मलोपप्रायश्चित्तं। क्षत्रियस्यरणेपृष्ठदर्शनेरौरवः। क्षत्रियस्तुरणेपृष्ठं दत्वाप्राणपरायणः। संवत्स
रंव्रतंकुर्याच्छित्वावृक्षंफलंप्रदं। एतच्चकामतोभ्यासे। वनात्त्वल्पं दिनेभ्यः गृहीतव्रतभंगे। वायुपुराणे
लोभान्मोहात्प्रमादाद्वा व्रतभंगोयदा भवेत्। उपवासत्रयंकुर्याच्चकेशमुंडनं। प्रायश्चित्तमिदं कृत्वापुन
रेवव्रतीभवेत्। वाराहपुराणे मिथ्याशपथेयमः। विप्रस्यवधसंयुक्तं कृत्वातु शपथं नृपः। ब्रह्महापाव
कान्तेन व्रतं चांद्रायणं चरेत्। एतच्चशपथांतरस्याप्युपलक्षकं। सुकृतंयेप्रयच्छति। यावज्जीवं कृतेन

रा॥ ते पिष्यंते शिलायेवै यथैते पापकारिणः॥ इति मार्कंडेयपुराणवाक्यात्॥ यत्त्वोक्तं यत्र वानोक्तमित्यौशनवा
क्यात् तत्र प्राजापत्यः कल्पनीयः॥ ब्राह्मणस्य क्षत्रियादिवृत्त्या धनार्जने प्रचेताः॥ ब्राह्मणस्याप्यकालेपि
माहवतुर्दतस्यानंतरं क्षत्रोपजीविका॥ तत्र संवत्सरमर्धं प्राप्नो चांद्रायणं चरेदिति वैश्यवृत्तिजीवनेत्त्र
वर्षाभ्यंतरे मासद्विमासादौ चांद्रायणम् नागहारः कल्पनीयः॥ संवत्सरादूर्ध्वं द्विगुणं पत्रे गुणपादिच कल्पनीयं
शूद्रवृत्त्यार्जने मनुः॥ न कथंचन कुर्वीत ब्राह्मणः कर्म वार्षिकं॥ वृषलकर्म वा ब्राह्मणं पतनाये द्विते नयोः॥ वा
र्धलं कर्मसेवा॥ एवमुपक्रम्य पुनरुपनयनसहितकृच्छ्राद्यनुवृत्तौ स एव॥ प्रायश्चित्तं प्रकुर्वंति विकर्मस्था
स्तु ये द्विजाः॥ ब्राह्मणस्य परित्यक्तो स्ते पामप्येतमादिशेत्॥ एवं शूद्रस्यापि द्विजकर्मरणेप्येतदेव तस्य
पितद्विकर्मत्वात्॥ अर्जितधनत्यागपूर्वकं चैतत्॥ यदर्जितेनार्जयंतीति मनूक्तेः॥ स्त्रीधनोपजीवने तु चां
द्रायणेनैव केन सर्वपापमवैदिन्त्यापस्तंबोक्तं चांद्रायणं स्त्रियं तद्धनं दत्वा कार्यं॥ नार्यावा मुखमैथुनेतु शु
नायस्तु ब्राह्मणो धर्मपत्नीमुखे मैथुनं सेवेन सद्दुष्यतीति वैवस्वतः॥ प्राजापत्येन शुध्यतीति हारीत इति

गोयुक्तयानस्थस्य मैथुने यमः॥ यदि गोभिः समायुक्तं यानमारुह्य वै द्विजः॥ मैथुनं सेवते चैव मनुः॥ स्वायं
भुवो ब्रवीत्॥ त्रिरात्रं क्षपणं कृत्वा सचैलं स्नानमाचरेत्॥ गोस्नाय वा सकंदद्या घृतं तं प्राश्य विशुध्यती॥
ति यत्तु स्मरणं॥ मैथुनं तु समासाद्य पुंसि योषित वा द्विजः॥ गोयाने त्वप्सु दिवा चैव सवासाः स्नानमाचरेत् तदका
मतः॥ सहकृत्करणे ज्ञेयं॥ क्रोधाद्भार्यायास्तु मे मात्रा सदृशी स्यगम्येत्युक्त्वा पुनरुपभोगे प्रायश्चित्तमाहप
राशरः॥ यस्तु क्रुद्धः पुमान् ब्रूयात् जायायास्त्वगम्यतां॥ पुनरिच्छति नार्यां च विप्रमध्ये उच्चाचयेत्॥ श्रांतं क्षुध
समंधी वा क्षुत्पिपासा नयादिति॥ दानं पुण्यमकृत्वा वा प्रायश्चित्तं दिनत्रयं॥ उपस्पृशेत्त्रिषवणं महानद्याः
संगमं॥ चीर्णांते चैव गां दद्याद्ब्राह्मणान् भोजयेद्दश॥ इति वाचयेत् प्रायश्चित्तोपदेशं कारयेत् पुण्यं पयागादि
संकल्पितं दानयागाद्यकृत्वेत्यर्थः॥ वस्तिकर्मणि यमः॥ वस्तिकर्मणि रूढे श्च प्रच्छर्दन विरेचने॥ शिश्नु
ह छेणदुग्धे च तस्मात् सापानसंशयः॥ प्रच्छर्दनविरेचनयोरभ्यास एव शिश्नुकृच्छ्रः॥ अन्यत्र तु स्नानमामा
त्रं॥ तथा च सरएव॥ अजीर्णेभ्युदिते वांते श्मश्रुकर्मणि मैथुने॥ दुःस्वप्ने दुर्जनस्पर्शे स्नानमात्रं विधीयत

प्रा॰म॰

॥१२९॥ इति देवागारशिलादिनाश्च गृहकरणे यमः । इष्टकाकाष्ठाश्मलोष्टान् देवालयसमन्वितान् गृहान् मगृह्णैये
तुलोमादै योजयंति च । एकाकिनस्तपोद्रव्याः क्षुत्तृष्णापरिपीडिताः । बंधने नेतु तिष्ठंति यावत्पापस्य सं
क्षयः । अनग्रजायतें चांद्रायणादिकल्पं वानप्रस्थपत्नीव्रतभंगे । वानप्रस्थो दीक्षाभेदे कृच्छ्रं द्वादशरा
त्रं चरित्वा महाकक्षं वर्द्धयेत् । भिक्षुर्वनिप्रस्थवत्सोमवृद्धिवर्जं स्वशास्त्रसंस्कारश्चेति । दीक्षाभेदे यमनि
यमातिक्रमे महाकक्षमोषधायनप्रदेशं उदकसेचनादिना वर्द्धयेत् सोमशब्देनौषधीसामान्यं गृ
ह्यते । तद्वृद्धिः परं भिक्षोर्निवर्तते परंतु सर्वं सममित्यर्थः स्वशास्त्रसंस्कारः प्राणायामाभ्यासः हारीतः
अनृतपिशुनवचनं भिक्षूणां तप्तकृच्छ्रः क्रोधाहंकारपिशुनेषु च छागलेयः व्रतानि यानि भिक्षूणां तथैवोप
व्रतानि च । एकैकातिक्रमे तेषां प्रायश्चित्तं विधीयते अहोरात्रोषितो भूत्वा कृच्छ्रं चांद्रायणं चरेत् कृच्छ्रप
दं चांद्रायणविशेषणं व्रतोपव्रतान्याह बौधायनः अष्टमो निव्रतानि अहिंसासत्यवचनमस्तेयं मैथु राम:
नस्य च वर्जनं अथोपव्रतानि अक्रोधो गुरुशुश्रूषाप्रमादः शौचमाहारशुद्धिश्चेति जलेप्रतिबिंब दृष्टौ ॥१२९॥

नारदो याज्ञवल्क्यः । मयि तेज इति छायां स्वां दृष्ट्वाऽम्बुनि वै जपेत् सावित्रीमशुचिदृष्टे चापल्ये वानृतेऽपि च । मयि
तेज इति मंत्रो वाजसनेयप्रसिद्धः । अशुचौ मूत्रपुरीषादौ चापले वृथाचेष्टायां प्रतिश्रुत्यान्नतोक्तौ हारीतः
प्रतिश्रुत्यानृतं तु या मिथ्या सत्यमथापि वा सप्तकृच्छ्रसहितं चरेच्चांद्रायणं व्रतमिति । गुरुवस्तु विष
यकप्रतिश्रुताकरणपरमेतत् प्रायश्चित्तस्य गुरुत्वात् भोजनकालीनमौनत्यागे पराशरः मौनव्र
तं समाश्रित्य आसीनो न वदेद्द्विजः । भुंजानो हि वदेद्यस्तु तदन्नं परिवर्जयेदिति । अर्द्धभुक्तान्नपात्रेण जल
पाने स एव । अर्द्धभुक्ते तु यो विप्रस्तस्मिन्पात्रे जलं पिबेत् हतं दैवं च पित्र्यं च आत्मानं चोपघात
येत् पशुवन्मुखेन जलपाने पुनः स एव । अर्द्धभुक्ते तु यो विप्रस्तस्मिन्पात्रे जलं पिबेत् । हतं च पित्र्यं च आ
त्मानं चोपघातयेत् पशुवन्मुखेन जलपाने पुनः स एव । विधमानेषु हस्तेषु ब्राह्मणो ज्ञानदुर्बलः तो
यं वितिवक्त्रेण श्वयोनौ जायते ध्रुवमिति । त्रिरात्रोपवासप्रायश्चित्तं असपिंडोऽसहशीरोदने पारस्कर
ः । मृतस्य बांधवैः सार्द्धं कृत्वा तु परिदेवनं वर्जयेत्तदहोरात्रं दानश्राद्धादिकर्म चेत्यनेनैकाहः एतच्चका

प्रा॰म॰
॥ १२८ ॥ मतः। अकामतस्तु स्नानमेव प्रेतालंकरणे शौचं। कृच्छ्रपादो सपिंडस्य प्रेतालंकरणे कृते। अज्ञानादुपवासस्याद
शक्तौ स्नानमिष्यते इति कामनाधिगुणं यत्तत्सकृच्छ्रानुवत्तावंगिराः। आत्मत्यागिनां चैव संस्कर्तृतौत दृष्ट्र
पातकाराचेति तदस्थ्यास्ते समानोत्कृष्टज्ञाति प्रेतानुगमने मनुः। अनुगम्येच्छया प्रेतं ज्ञातिमज्ञा
तिमज्ञातिमेव च स्नात्वा सचैलः स्पृष्ट्वाग्निं घृतं प्राश्य विशुध्यतीति। अत्रेच्छयेति प्रकरणादेतत्कामतः। अ
कामतस्तु स्नानमेव। यत्तु याज्ञवल्क्यः। ब्राह्मणेनानुगंतव्यो न शूद्रो न द्विजः क्वचित्। अनुगम्याम्भसि स्नात्वा
स्पृष्ट्वाग्निं घृतभुक्शुचिरिति। ब्राह्मणेन सपिंडेन द्विजो विप्रादिः। अस्य घृतप्राशनस्य भोजनकार्यैवि धा
नेत्रयाणानावान्नभोजननिवृत्तिरिति मिताक्षरायां। तन्मीनवसमानविषयं वस्तुतो घृतप्राशनं
स्य प्रायश्चित्तार्थत्वात्। अभोजनमेव युक्तं। अत एव वसिष्ठेन मानुषास्थिस्निग्धं स्पृष्ट्वा त्रिरात्रमनस्निग्धे रा॰म॰
त्वहोरात्रं शवानुगमने पराशरः। प्रेतीभूतं तु यः शूद्रं ब्राह्मणो ज्ञानदुर्बलः। अनुगच्छेन्नीयमानं स त्रि ॥ १३० ॥
रात्रेण शुध्यतीति त्रिरात्रे तु ततश्चीर्णे नदीं गत्वा समुद्रगां प्राणायामशतं कृत्वा घृतं प्राश्य विशुध्यतीति।

अत्र घृतप्राशनस्य शुद्ध्यर्थत्वाभिधानाद्भोजननिवृत्तिः। एतच्च कामतः। अकामतस्त्वर्धं। एवं क्षत्रियस्य
वैश्यशूद्रानुगमने वैश्यस्य शूद्रानुगमने कल्प्यं। इष्टापूर्तस्य मप्यद्य कर्मस्वनुपद्रष्टुं च महाकर्मस्वनु
पहतानामपि ऋत्विगाचार्यादीनां कृच्छ्रातिकृच्छ्रं चांद्रायणं संवत्सरं प्रायश्चित्तं तत्स्थाने द्वादश प्राजापत्या व्रातद्र
र्ध्वं नाचरंतीति स्मृत्यर्थसारे। कन्याया विवाहात्पूर्वं रजोदर्शने प्रायश्चित्तमाह प्रयोगपारिजाते आचार्यः। कन्या
मृतुमतीं शुद्धां कृत्वा निष्कृतिमात्मवान्। तया च कारयित्वा तां उद्वहेतानशंसधीः॥ पिता कर्तुं न स्वपु
त्रास्ताः गणयेद्दादितः सुधीः। दानावधि गृहे यत्नात्पालयेद्दादितधीः। दद्यात्तदनु संख्यायाः। शंखः। कन्या
पिता यदि दातव्यैकापि निस्छेन दानेन तस्याय यथाविधि दद्यात् ब्राह्मणेभ्यो वस्त्रोतिनिस्वः सदक्षिणं तस्मा
नीतउसंस्थेषु वराय प्रतिपादयेत्। उपोष्य त्रिदिनं कन्या रात्रौ पीत्वा गवां पयः। अदृष्टरजसे दद्यात् कन्या
येतत्रन्दूषणं। तामुद्वहन्वरश्चापि कूष्मांडैर्जुहुयाद्घृतमिति। श्राद्धोपवासदिने दंतधावने विष्णुरहस्ये।
श्राद्धोपवासदिवसे खादित्वा दंतधावनं। गायत्र्याशतसंपूतं अंबु प्राश्य विशुध्यतीति॥ इति प्रकीर्णप्रायश्चित्तं

नि॥ अथ पतितत्यागविधिः॥ सच महापातकिन एवेति केचित् युक्तं तु पतितस्य बहिः कर्तुरित्यादौ पतितमात्रो॰
मादानात्संकोचने मानाभावादुपपादिनापतितस्यापि भवतीति प्रतीमः॥ यदाप्येवं बंधुभिः प्रेर्यमाणोपि
प्रायश्चित्तं न करोति तदा कार्यः॥ शंखः॥ तस्य तु गुरोर्बांधवानां राज्ञश्च समदोषानभिख्याप्य पुनः पुनरा
चारं लभस्वेति स यद्येवमनवस्थितमतिः स्यात्पात्रं विपर्यस्येत्॥ अत्र कालमाह मनुः॥ पतितस्योदकं कार्यं स
पिंडैर्बांधवैः सह॥ निंदितेहनि सायाह्ने ज्ञात्यृत्विग्गुरुसन्निधौ॥ निंदितेहनि रिक्तादितिथौ॥ देशमाह योगीश्व
रः॥ पतितस्य बहिः कुर्युः सर्वकार्येषु चैव तं॥ दासीकुंभं बहिर्ग्रामान्निनयेरन् स्वबांधवाः॥ नन्वयं न विधिमाह गौ
तमः॥ तस्य विद्यागुरुयोनिसंबंधाः सर्वाण्युदकादीनि प्रेतकर्माणि कुर्युः॥ पात्रं चास्य विपर्यस्येयुर्दासः क
र्मकरो वा अवकरात्पात्रमानीय दासीघटात्पूरयित्वा विपर्यस्येदमुमनुदकं करोमीति नामग्राहं ते सर्वेन्वारभे
रन् प्राचीनावीतिनो मुक्तशिखा विद्यागुरवो योनिसंबंधाश्च वीक्षेरन्॥ अप उपस्पृश्य ग्रामं प्रविशेयुः॥ योनिसं
बंधाः पित्रादयः॥ उदकदानादीनात्मनेनांजलिप्रायाविदाहादि निवृत्तिः॥ प्रेतकर्माणीति सपिंडीकरणांतानामे

वंधाश्च सर्वे॥ दासो गर्भदासः कर्मकरो वेतनसंपादितः॥ दासीघटाद्दास्याहृतघटजलेन॥ नामग्राहममुमित्यस्य
स्थाने पतितनाम गृहीत्वा अस्मत्स्पर्शसारे॥ त्वस्माकं त्वमृत इत्युक्त्वा निनयेदिति क्रांदास्येन वा निनयेत यथा
मनुः॥ दासीघटमपां पूर्णं पर्यस्येत्प्रेतवत्पदा॥ अहोरात्रमुपासीरन्नाशौचं बांधवैः सह॥ प्रेतवदित्यसव्यद
क्षिणमुखत्वाद्यतिदेशार्थं॥ तथा सनव्यवहार्यः॥ यथा मनुः॥ निवर्त्तेतत्तस्मात्संभाषणसहासने दाय
दस्य प्रदानं च यात्रामेव च लौकिकीं॥ स्त्रीत्यागे विशेषमाह योगीश्वरः॥ पतितानामेष एव विधिः॥ स्त्रीणां प्र
कीर्तितः॥ वासो गृहांतिके देयमन्नं वासः सरक्षणं॥ अन्नं जीवनमात्रं जघन्यं वस्त्रं मलिनं॥ यत्तु वसिष्ठः चतस्रस्तु
परित्याज्याः॥ शिष्यगा गुरुगा च या॥ पतिघ्नी च विशेषेण जुंगितोपगता च येति तत्सर्ववदेव सामान्नवस्त्राद्या॰
च्छादनादित्यागार्थं॥ अन्यासां तु पतितानामन्नवस्त्रादि देयमिति विज्ञानेश्वरः॥ जुंगितः प्रतिलोमजः॥ संभाषणो
प्रायश्चित्तं मिताक्षरायां॥ अत ऊर्ध्वं तेन संभाष्य तिष्ठेदेकरात्रं जपन्सावित्रीमज्ञानपूर्वं ज्ञानपूर्वं च त्रिरात्रमिति
त्यागेतर मनुनापादिना प्रायश्चित्तं कृत्वा समायाते विशेषमाह मनुः॥ प्रायश्चित्ते तु चरिते पूर्णकुंभमपां नवं

॥१२०॥ तेनैव सार्द्धं ग्रासे ग्रासेषु स्नात्वा पुण्यजलाशये। गौतमोपि यत्तु प्रायश्चित्ते नष्टधने तस्मिन् शुद्धे तत्कुंभमयं पात्रेषु
ण्यपतमात्रस्ता दास्त्वरपि त्वा स्रवंती त्पोवा ततएनमयत्रयस्पर्शयेयुः रथ्यास्मित साद्वं दद्यस्तस्मति गृह्यजपेष्टंना
यो: स्नाता घृषिवाशो तंशिवमंतरिक्षं योरोच नस्तामिगृह्णाती त्सेतैर्यजुर्भिःपावमानीभिस्तरत्समंदीभि
ऊरमांउष्मा शांतं शिवमंतरिक्षं योचनस्तमिगृह्णा। तीत्सेतैर्यजुर्भिःपावमानीभिस्तरत्समंदीभिकु
रमांउष्मात्पेनजुऊयात्। हिरण्यंब्राह्मणाय दद्यात् गांवाचार्याय। यस्यतु प्राणांतिकं प्रायश्चित्तं सम्यतः
शुद्धेनगत देवसंस्कृतदकं सर्वे घूपपातकेषु। ततएनं कृतं प्रायश्चित्तं नैवकुर्यसयेयु। तथासर्वकार्येषु।
क्रियेविक्रीयादिषुः तेन सहसंव्यवहारोयुरितिउस्पर्शयेयुराचमनं कारयेयुः। उपपातकेषु न्यासेन
महापापतौल्येन पातित्यापादकेषु न्यत्रविशेषमाह हारीतः। स्वशिरसायवसमाहाय गोभ्यो दद्यात्।
द्युदिता पतिगृह्णीयुरथैनं प्रवर्तयेयुरितरथानेत्यभिप्रेतं प्रतिग्रहोमस्त्रणं तरथा ग्रहणाभावेन राम:
समंव्यवहारार्थ इत्यर्थः मिताक्षरायांस्मृत्यर्थसारे च ग्रहणाभावे प्रायश्चित्तावृत्तिरुक्ता वसिष्टः तथा निषि ॥१२२॥

क्तस्य प्रत्यवहारः। पुनर्जन्मना ख्यात इति व्यभिषिक्तस्य पूर्वोक्तरीत्या स्नातस्य प्रत्यवहारः संग्रहे सचपुनर्ज
न्मना व्याख्यातः संग्रहे नरं जातकर्मादिना संस्कुर्यादित्यर्थः। कश्चित्प्रायश्चित्तोत्तरमपि संव्यवहाराया
वादमाह योगीश्वरः शरणागतबालस्त्रीहिंसकान् संविशेन्नतु चीर्णव्रतानपि सर्वाः कृतघ्नसहितानि
मान् संविशेद्व्यवहरेत् इतिपतितत्यागविधिः। ७। अथ रहस्यप्रायश्चित्तं। रहस्यं कर्तृनिरिक्तेनाज्ञा
तं व्यगम्यागमनेचद्वयोः कर्तृत्वं व्यासक्तेम तस्तत्र तदतिरिक्तेनाज्ञाने रहस्यत्वं। एतेनपापमात्रेतृतीये
नाज्ञाते रहस्यप्रकाशे प्रकाशमिति। व्यवपर्षदुपस्थानमपिनास्ति। तथायाज्ञवल्क्यः विख्यातदोषः कुर्वीत
पर्षदोनुमतं व्रतं। अनभिख्यानदोषेषु रहस्यं व्रतमाचरेत्। तत्र यद्यनभिज्ञः कर्त्तातदा कथंचुकस्मिन्न्रर
हस्यपापे किं प्रायश्चित्तमिति व्याजांतरेण पृष्ट्वा कुर्यात् तत्र साधारणं प्रायश्चित्तानि मनुः एते द्विजातयः
शोध्या व्रतैराविष्कृतैनसः। अनाविष्कृतपापांस्तु मंत्रैर्होमैश्च शोधयेत्। संवर्तः दानैर्होमैर्जपैर्नित्यं प्रा
णायामैर्द्विजातयः। पातकेभ्यः प्रमुच्यंते वेदाभ्यासात्संशयः। वसिष्टः जपिनां होमिनां चैव ध्यायिनां तीर्थ पृ

प्रा॰ म॰ सेविनां॥ निवसंति न पापानि येषस्मात्तच्छिरोव्रतैः॥ मनुः॥ वेदाभ्यासोन्वहं शक्त्या महायज्ञतपक्रिया॥ नाशयं
॥१३२॥ त्याशु पापानि महापातकजान्यपि॥ यथैधस्तेजसा वह्निः प्राप्तं निर्दहति क्षणात्॥ तथा ज्ञानकृतं पापं त
याद्दहति वेदवित्॥ सव्याहृतिकाः प्रणवाः प्राणायामास्तु षोडश॥ अपि भ्रूणहनं मासात्पुनंत्यहरहः
कृताः॥ अन्वहमित्यत्रापि कात्ताकौशायामासादित्यन्वेति माधवीयेयम॥ सहस्रपरमां देवीं शतमध्यां
दशावरां॥ गायत्रीं सजपेन्नित्यं महापातकनाशिनीं॥ विरजं द्विगुणं जप्त्वा तदह्नैव निशुध्यति वामदेव्य
द्विरावृत्य तद्द०॥ पौरुषं सूक्तमावृत्य मुच्यते सर्वकिल्बिषात्॥ ऋषभं त्रिंशतं जप्त्वा तद्द०॥ वेदमकुणंकृ
त्वा तद्द०॥ रुद्रैकादशकं जप्त्वा॥ चतुर्विंशतिमते॥ पावमानीस्तथा कौत्सं पौरुषं सूक्तमेव च॥ जप्त्वा पापैः प्रमु
च्येत सपुत्रं मधुच्छंदसं॥ विशालब्राह्मणं रुद्रं शुक्रियोमीढकस्तथा॥ वामदेव्यं बृहत्साम जप्त्वा पापैः प्रमुच्य
ते॥ यज्ञायज्ञियमादित्यं जप्त्वा ज्येष्ठसाम च राजनं पारुच्छेपं चमासानि जप्त्वा मुच्यत किल्बिषात्॥ अथर्वशिरस राम:
श्चैव पुरुषसूक्तं तथैव च॥ नीलरुद्रांस्तथैवैतं जप्त्वा पापैः प्रमुच्यते॥ आथर्वणाश्चये केचित् मंत्राः कामविव ॥१३२॥

र्जिता ते सर्वे पापहंतारो याज्ञवल्क्यवचो यथा॥ ऋग्वेदमभ्यसेद्यस्तु यजुःशाखामथापि वा॥ सामानि सरहस्या
न्यथर्वांगिरसस्तथा॥ ब्राह्मणानि देवतास्तवनानि च॥ जप्त्वा पापैः प्रमुच्येत धर्मस्थानैस्तथा तथा प
रैः शिति बौधायनः॥ विधिना शास्त्रदृष्टेन प्राणायामान्समाचरेत्॥ यदुपस्थकृतं पापं पद्भ्यां वा यत्कृतं भवेत् वा
तान्यामनसा वाचा श्रोत्रत्वक् घ्राणचक्षुषेति॥ प्राणायामसपर्यंतं षोडश॥ पूर्वोक्तमनुवाक्यात्॥ चतुर्विंश
तिमते॥ मृगारेष्टिः पवित्रेष्टिः त्रिहविः॥ यावमान्यपि॥ ऋषयः पापनाशिन्यो वैश्वान —— मन्विताः॥ कौर्मेऽज
पस्तपस्तीर्थसेवा देवब्राह्मणयाजनं॥ ग्रहणादिषु कालेषु महापातकशोधनं॥ पुण्यक्षेत्राभिगमनं सर्वपाप
प्रनाशनं॥ देवताभ्यर्चनं पुंसां महशेषाघविनाशनं॥ अमावास्यां तिथिं प्राप्य मासमाराधयेज्जवं॥ ब्राह्मणान्
भोजयित्वा तु सर्वपापैः प्रमुच्यते॥ कृष्णाष्टम्यां महादेवं तथा कृष्णचतुर्दशीं॥ संपूज्य ब्राह्मणमुखे सर्वपापैः प्र
मुच्यते॥ त्रयोदश्यां तथा रात्रौ सोपहारं त्रिलोचनं॥ दृष्ट्वेशं प्रथमे यामे मुच्यते सर्वपातकैः॥ एकादश्यां निराहा
रः समभ्यर्च्य जनार्दनं॥ द्वादश्यां शुक्लपक्षस्य सर्वपापैः प्रमुच्यते उपोषित चतुर्दश्यां कृष्णपक्षे समाहितः॥

प्रा·म·

॥१३२॥

यमायधर्मराजायमृत्यवेचांतकायच। वैवस्वतायकालायसर्वभूतक्षयायच॥ प्रत्येकंतिलसंयुक्तान्दद्या
त्सप्तोदकांजलीन्। स्नात्वानद्यांतुपूर्वोक्तंमुच्यतेसर्वपातकैः। तत्रैवनान्यत्स्मरणामिमिजंतूनांतुस्नात्वावाराणसीपु
री। सर्वपापप्रणाशनंप्रायश्चित्तंकलौयुगे। यम। जपेद्वाप्यस्यवापायंवापमानीरथापिवा। कुंतापंवालखिल्यं
चनिविन्प्रैषान्वृषाकपिं। होतॄन्रुद्रान्सकृज्जप्त्वामुच्यतेसर्वपातकैः। तत्रैवमनुः। एनसांस्थूलसूक्ष्म
णांचाकीर्षंनयनोदनं। अवेत्यृचंजपेदब्दंयत्किंचेदमितीतिच। अवतेहेडोवरुणनमोभिरित्यादिका
जपत्वचयंतिराविरुद्धकाले। शातातपः मद्यंपीत्वागुरुदारांश्चगत्वास्तेयंकृत्वाब्रह्महत्यांचकृत्वा। भस्मछ
नोभस्मशय्याशयानोरुद्राध्यायीमुच्यतेसर्वपापैः। इदमकामतःसकृत्करणेअभ्यासेतुषड्विंशन्मतेम
हाव्याहृतिभिर्होमस्तिलैःकार्योद्विजन्मना। उपपातकशुद्ध्यर्थंसहस्रपरिसंख्यया। महापातकसंयुक्तो
लक्षहोमेनशुध्यति। हारीतः पातकानिपातकोपपातकानामेकतमसंनिपातेवाघमर्षणमेवत्रिर्जपेन
यमः दशप्रणवसंयुक्तैःप्राणायामैश्चतुःसमैः मुच्यतेब्रह्महत्यायाःकिंपुनःशेषपातकैः। अत्रमाहानुपा

राम:

॥१२५॥

पपापेषुक्रमाद्वतुस्त्राद्येकशतप्राणायामाः। संकरीकरणादौप्रकीर्णकेषुक्रमात्। कल्पतइतिमिताक्षरायां
अत्रिः। ब्रह्महागुरुतल्पीवागम्यागामीतथैवच। सुवर्णस्तेयचौर्यश्चगोघ्नोविश्वासघातकः। शरणा
गतघातीचकूटसाक्षीत्वकार्यकृत्। एवमादिषुचान्येषुपापेषुनिरतास्सदा। प्राणायामत्रयंकृत्वाक
ल्पंकल्पंसमाहितः। अहोरात्रकृतात्पापात्तत्क्षणादेवमुच्यते। इतिसामान्यतोरहस्यप्रायश्चित्तानि। अथ
विशेषः। तत्रयोगीश्वरः। त्रिरात्रोपोषितोजप्त्वाब्रह्महात्वघमर्षणं। अंतर्जलेविशुध्येतगांचदत्वापयस्वि
नीं। जपश्चांतर्निमग्नेनत्रिरावृत्तीनीयः। देवद्विजगुरुहंताअघमर्षणंत्रिरावर्तयेदितिमनूक्तेः। इदमका
मतःसकृद्वधविषयंयन्मनुः। सव्याहृतिप्रणवाःप्राणायामास्तुषोडश। अपिभ्रूणहनंमासात्पुनंत्यहरहः
कृताः इतितद्दस्मिन्नेवविषये। गोदनाशक्तिरितिविज्ञानेश्वरः। उपवासत्रयाशक्तौवित्तपरे। यत्तुगौतमेन
मासव्रतमुक्तं। एतद्व्रतएवब्रह्महत्यासुरापानसुवर्णस्तेयगुरुतल्पेषुप्राणायामैः। स्नातोघमर्षणंज
पेदितितदकामाभ्यासे। योगीश्वरः। लोमभ्यःस्वाहेत्यथर्वादिवसंमारुतान्वान। जलेजप्त्वानिजुहुया

प्रा॰म॰

॥१३३॥ चत्वारिंशाहुताकृती। इदमप्यकामतः सकृद्वधविषयं यत्तु मनुः। अरण्ये वा त्रिरभ्यस्य प्रयतो वेदसंहितां
मुच्यते पातकैः सर्वैः पराकैः शोधितस्त्रिभिरिति तत्कामतोऽभ्यासविषयं कामतः श्रोत्रियादिवधविषयं
वा। यच्च बौधायनः। ग्रामात्प्राचीं वोदीचीं वा दिशमुपनिष्क्रम्य स्नातः शुचिवासा उदकान्ते स्थण्डिलमुपलि
प्य सकृत्क्लिन्नवासाः सकृत्क्लिन्नवासाः सकृत्पूतेन पाणिनादित्याभिमुखोऽघमर्षणं स्वाध्यायमधीयीत प्रातः
शतं मध्याह्ने शतमपराह्ने शतमपरिमितं वोदितेषु नक्षत्रेषु प्रसृतियावकं प्राश्नीयात्। ज्ञानकृते
भ्योऽज्ञानकृतेभ्यः। उपपातकेभ्यः सप्तरात्रात्प्रमुच्यते सप्तरात्रान्महापातकेभ्यो ब्रह्महत्यां सुवर्णस्ते
यं सुरापानमिति वर्जयित्वा एकविंशतिरात्रेणैतान्यपि तरतीति। तत्कामतः सकृद्वधविषयं यत्तु बृह
विष्णुः। ब्रह्महत्यां कृत्वा ग्रामात्प्राचीमुदीचीं वा दिशमुपनिष्क्रम्य प्रभूतेन्धनेनाग्निं प्रज्वाल्याघमर्षणे
नाष्टसहस्रमाहुतीर्जुहुयात्तदेतस्मात्पूतो भवति तदनुग्राहकविषयं यदपि मनुः। त्र्यहं तूपवसेद्युक्त राम॰
स्त्रिरह्नोऽभ्युपयन्नपः मुच्यते पातकैः सर्वैस्त्रिर्जप्त्वाचाघमर्षणमिति निर्गुणविषयं। यच्च हारीतः। महापातका ॥१२५॥

तिपातकानां एकतमसन्निपाते वाघमर्षणमेव त्रिर्जपेदिति तन्निमित्तपरं सवनस्थस्त्रीहत्याविप्रविप्रहि
तान्निस्त्रात्रयगमनाप्रविज्ञातगर्भवधेष्येतान्येव प्रायश्चित्तानि पादोनानि योज्यानि। इति ब्रह्महत्याप्रा
यश्चित्तं। अथ सुरापाने। यमः। सुरापः कंठमात्रमुदकमवतीर्य सुतसोमात्मप्रभृतिमाशयोंकारेणाभिमंत्र्य
पिबेत्। इदमौषधार्थपाने। याज्ञवल्क्यः। त्रिरात्रोपोषितो हुत्वा कूष्मांडाभिर्घृतं शुचिः। पूर्वलिखितैतत्सर्वा
हस्तं चत्वारिंशाहित्यनुवर्तते। कूष्मांड्यो यद्देवा देवहेडनमित्याद्याः। इदमकामतः सकृत्पाने। एतदृशाकोमनुः
मासं जपित्वा। अप यन्नोषं चतृचं प्रतिमाह्निकं सुध्यवत्पश्च सुरापोऽपि विशुध्यति। अपनः शोशुचदघमि
तिसप्तर्चं वासिष्ठं प्रतिस्तोमेभिरुषसं वासिष्ठा इतित्र्यृचं माहित्रमहित्रिणामवोऽस्त्विति तिस्त्वं शुद्धवत्यः
एतोन्विंद्रं स्तवामेत्याद्याः। एते षट्चजपो मासं प्रत्यहं षोडशवारमिति विज्ञानेश्वरः। कामतः सुरापाने तु मनुः
मंत्रैः शाकलहोमीयैरब्दं हुत्वा घृतं द्विजः। सुगुर्वप्यपहंत्येनो जप्त्वा वा नम इत्यृचं। देवकृतस्यैनसस्त
षौ शाकलहोमीयामंत्राः। नमइद्रुद्रं नमइत्याविवासेत्यस्याः सवो जपः प्रत्यहं संवत्सरं पर्यंतं तदपि सएव

प्रा॰मु॰

॥१३४॥ महापातकसंयुक्तोनुगच्छेद्व्रताः समाहितः। अभ्यस्य वर्षं पावमानीर्नित्याहारो विशुध्यतीति कामतोभ्यास
विषयं अनेकमहापातकिविषयं वा। इति सुरापानप्रायश्चित्तं॥ अथ सुवर्णस्तेये॥ तत्र याज्ञवल्क्यः
ब्राह्मणः स्वर्णहारी तु रुद्रजापी जले स्थितः। सर्वं लिखितैतत्पूर्वा त्रिरात्रोपोषित इति विशुध्येदिति चात्राप्य
नुषज्यते अत्रिः। एकादशगुणान्वापि रुद्रानावर्त्य धर्मवित्। महापापैरपि स्पृष्टो मुच्यते नात्र संशयः। नि
र्गुणस्वामिकापहरणे तु वर्णपरिमाणहरणे च मनुः। सकृज्जप्त्वास्यवामीयं शिवसंकल्पमेव च। सुव
र्णमपहृत्यापि क्षणाद्भवति निर्मलः। अस्य वामीयमस्य वामस्य पलितस्य होतुरिति द्वापंचाशदृचं सूक्तं
यज्जाग्रतो दूरमुदैति दैवमिति शिवसंकल्पमंत्राः। पृथु माधवीये शातातपः। ब्राह्मणः सुवर्णस्तेये कृत्वा हिर
ण्यशालायां प्रसिप्यास्तु निस्तातो हिरण्यवर्णा मिश्वतस्त्रिरात्मानमनुस्मृत्य त्रीन्प्राणायामान्कृत्वा तदेत रामः
स्मात्पापात्पूतो भवति तद्गुणवतो निर्गुणस्वामिकसुवर्णेन परिमाणहेमहरणप्रयोजकत्वे द्रष्टव्यं॥
इति स्तेयप्रायश्चित्तं॥ अथ गुरुतल्पगमने मनुः। हविष्यांतयमभ्यस्य नतमंह इतीति च। जप्त्वा च पौरुषं ॥९२६॥

सूक्तं मुच्यते गुरुतल्पग इति हविष्पांतीयं हविष्पांतमजरं स्वर्विदि इति। नतमंहो न दुरितमिति
नतमंह इति च। जप्त्वा च पौरुषं सूक्तं मुच्यते गुरुतल्पग इति। इति वा इति मे मनः इति। पौरुषं सहस्रशीर्षेति
ऋतद्व्रतमस्य मासं षोडशं कृत्वौ जप इति मिताक्षरायां इदमकामतः सकृद्गमने। कामतस्तु याज्ञवल्क्यः
सहस्रशीर्षजापी तु मुच्यते गुरुतल्पगः। गौरेया कर्मणोस्यांते दद्यात् पयस्विनी। जापीति ताच्छील्यप्र
त्ययादावृत्तिः। अत्र पुरुषसूक्तकरणकं होममुपवासत्रयं चाह वृद्धहारीतः। त्रिरात्रोपोषितः पुरुषसूक्तजप
होमाभ्यां गुरुतल्पगः शुध्येतीति। अत्र होमसंख्यासंज्ञेयां पूर्वश्लोकगता चत्वारिंशदाहुता इतीत्यत्रापि सं
बध्यते इति विज्ञानेश्वरः। एभिरिति बहुवचनेन सुरापस्तेनगुरुतल्पगा गृह्यंते। तैरेतैः स्वस्वप्रायश्चित्तां
ते एका धेनुर्देया। गुरुतल्पसमेतदतिदेशविषये चार्धपादोनं च क्रमेण योज्यं। महापातकिसंसर्गिण
स्तु येन सह संसर्गस्तदीयमेव प्रायश्चित्तं। प्रायश्चित्तभाजो रहस्यसंसर्गे तु सरहस्यमेव व्रतं संसर्गाख्य
ति भिन्नस्य रहस्य रहस्यत्वात्। केचित्तु रहस्यप्रायश्चित्तभाजो। प्रकाशसंसर्गे प्रकाशप्रायश्चित्तमाहुः। संसर्गे

प्रा॰म ॥१२५॥ स्यादिति प्रकाशात्मममुकपापवत्संसर्गोपमितिपरस्यं ज्ञानं भवेति एवं च परेण ज्ञाते प्रकाशपापवत्संसर्गत्वमे
व तिनतु रहस्यपापवत्संसर्गत्वमतुयोना ध्यापनादिसंयोगस्यानेककर्तृत्वात् नरहस्यत्वमिति चेन्न त
त्राककर्तृत्वस्यव्यासक्तत्वात् ततद्व्यतिरिक्तेनावज्ञाते भवत्येव रहस्यत्वं तथापि पातकादिसंसर्गिणस्तद्वी
यमेव व्रत इति रहस्यमहापापप्रायश्चित्तं अथोपपातादिषु याज्ञवल्क्यः प्राणायामशतं कार्यं सर्वपापाप
नुत्तये उपपातकजातानामनादिष्टस्य चैव हि बौधायनोपि अपि कुर्वा चतुः आत्र प्राणमनोव्यतिक्रमे
श्रुतिनि प्राणायामैः शुध्यति शूद्रस्त्रीगमनान्न भोजने पृथक् पृथक् सप्ताहे सप्त प्राणायामान् धारयेत्
अभक्ष्याभोज्यामेध्यप्राशने तथा चापण्यविक्रयेषु मधुमांसघृततैललाक्षालवणान्नवर्जेषु यच्चान्य ॥१२७॥
मेवंयुक्तं द्वादशाहं द्वादशप्राणायामान् धारयेत् उपपातिकोपपातकवर्जं यच्चान्यदप्येवंयुक्तं स्यादर्ध
मासं द्वादशप्राणायामान् धारयेत् उपपातकीपतनीयवर्जं यच्चान्यदप्येवंयुक्तं मासं द्वादशप्राणायामा
न् धारयेत् तथा पातकवर्ज्यं यच्चान्यदप्येवंयुक्तं द्वादशाहं मासं द्वादश द्वादश प्राणायामान् धारयेत् उ

पपातकेषु द्वादशप्राणायामान् धारयेदुपपातकेषु द्वादश द्वादश प्राणायामान् धारयेदिति अत्र प्रा
णायामत्रयं प्रकीर्णकेषु सप्ताहे द्वादशाहे अर्धसंवत्सरात्मतिपापानुपापेषु संवत्सरा महापातकेषु त
त्र सप्ताहे प्राणायामाः ४९ द्वादशाहे ॥ १४४ अर्धमासे ॥ १८० मासे ॥ ३६० षाण्मासिके ॥ ११६० सं
वत्सरे ॥ ४३१० एतानि च प्राणायामत्रयं समाहादिवृत्तानि सर्वेष्वेषु प्रकीर्णकोपपातकादिषु विप्रयेषु
भवंतीति मिताक्षरायां कामतो मत्यमद्यपाने सुमंतुतो विप्रस्त्रासमर्न्नकृत्वा लशुनपलांडुगृंजनकेत्यादिना
मन्येषां वा भक्ष्याणां भक्षणं कृत्वा ततः कंवमात्रमुदकमवतीर्य शुद्ध्यतीति प्राणायामत्रयं कृत्वा महाव्याहृ
तिभिर्हरोगमुक्तं पीत्वा तदेव तत्स्मृती भवतीति अकामतो याज्ञवल्क्यः ॐकाराभिष्टुतं सोमसलिलं पावनं
पिबेत् कृत्वा तु रेतोविण्मूत्रमासनं हि द्विजोत्तमः उष्ट्रप्रतिग्रहे मनुः प्रतिग्राह्याप्रतिग्राह्ययोस्तु स्नात्वा तु विग
र्हितं जपंतरत्समंदीपं प्रयते मानवस्महादिति एतदभ्यासविषयं स एव अप्रशस्तं तु कृत्वाप्सु मासमासी
त भैक्षभुक् इदं कामतोभ्यासविषयं अज्ञानकृते प्रकीर्णकवाचिकमानसोपपातके यो ह्ययोग्य भ्वरः

निशायांवादिवावापियदज्ञानकृतंभवेत् । त्रैकालवासंध्याकरणात्तत्सर्वंप्रविनश्यति । मनुरपि । यदह्नात्कु
रुतेपापंकर्मणामनसागिरावासनःपश्चिमांसंध्यांप्राणायामैर्निहंतितत् । शातातपः । अनृतंमद्यगंधंच
दिवामैथुनमेवच । चतुरातिवृषलान्नंचवहिःसंध्याउपासिता । शंखः । शतंजप्तातुसावित्रीसर्वपापप्रणाशि
नी । सहस्रजप्ताचमहापातकेभ्यःप्रमोचिनी । दशसहस्रजप्येनसर्वकल्मषनाशिनी । सुवर्णस्तेयकृद्विप्रो
ब्रह्महागुरुतल्पगः । सुरापश्चविशुध्यंतिलक्षजप्यानसंशयः इति सर्वपापानिप्रकीर्णकानिमहापातका
न्युपपातकानिसर्वकल्मषाण्युपपातकान्यनुपपातकानिचेति विज्ञानेश्वरः । सर्वपापेषुरहस्यप्रायश्चि
त्तंतत्प्रकारमाहप्रायश्चित्तविषयेतुविश्वामित्रः । प्रकाशाउक्तयत्किंचिद्विंशांशगोरहस्यकंत्रिंशांशगःप्र
ष्टिभागःकल्पोजात्याद्यपेक्षया । आद्विज्ञैनशक्तिगुणकामाकामाभ्यासानभ्यासादिग्रह्यतेइतिशूलपा
णिः । अत्रद्वादशाहत्यविंशारवप्राजापत्याःत्रिंशांशाः । षष्टंशाःचतुर्विंशत्यब्देएतद्विगुणांशाःषडब्देतद
र्धायन्तुशूलपाणिः । पत्रप्रकाशेपरणांतिकंप्रायश्चित्तंतत्ररहस्येमरणांतिकमेवमरणेकृतासंभवा ।

दित्वादनत्राप्यपिमरणेकृतासोतसंभवतितथापितद्वैकल्पिकेचतुर्विंशत्यब्दोसंभवत्येवतेनचतु
र्विंशतिष्षष्टित्रिंशद्विंशाद्वादशाचतुर्दशाविंशाविंशतिषट्त्रिंशन्मता । प्राजापत्याजात्याद्यपेक्षयाकर्तव्या
ःमरणांतिकस्तुतद्विधिनाप्रकाशेपापविषयत्वेनोक्तस्यारहस्येप्रापकप्रमाणाभावप्राप्तिरेवइ
त्यापास्तमितिसर्वंशिवं ॥ ॥इतिश्रीमीमांसकशंकरभट्टात्मजभट्टनीलकंठकृतेभास्करेप्रायश्चित्तम
यूखःसमाप्तः ॥ लेखकपाठकयोःशुभंभवतु ॥ कल्याणमस्तु ॥ श्री रस्तु ॥ श्री रामस्तु ॥ श्री ॥

